# व्यासश्रीः
# VYĀSAŚRĪḤ

**Impact Factor 7.747**
**(A Refereed Research Journal)**
**January-June 2024**
**Date of Publication: 30.06.2024**

**: Chief Editor:**
Dr. Buddheswar Sarangi

**: Associate Editors:**

Prof. Prasanta Kumar Mahala
Dr. Jagamohan Acharya
Dr. Gyanaranjan Panda
Dr. Swetapadma Satapathy
Dr. Dibakar Dash
Dr. Santosh Majhi
Dr. Priyavrat Mishra
Dr. J. Bali Chakravarthi
Dr. Runima Sharma

*Publisher*

**Padmashree Ramaranjan Mukherjee Chair of**
Maharshi Vyasadev National Research Institute
A Unit of Vyasayanam, Regd. No. 1635-IV-477/04
Vedavyas, Rourkela-4, Odisha
Contact No.: 7003415810, 7044016153
Email: vyasasri12@gmail.com
Website: www.vyasasri.com

**Scholar Members for Scrutiny:**

Prof. Sarita Sharma

Dr. Saroj Kumar Padhi

Dr. Somanath Dash

Dr. Bharat Bhushan Rath

Dr. Preeti Pujara

Dr. Sunil Joshi

Dr. Harapriya Behera

Dr. Prakash Gogikar

Dr. Pradeep Kumar Bag

**Board of Advisors:**

Prof. Abhiraj Rejendra Mishra

Prof. Radhaballava Tripathy

Prof. Harekrishna Satapathy

Prof. Shrinivasa Varakhedi

Prof. Prafulla Kumar Mishra

Prof. Somesh Kumar Mishra

Prof. Chandrakant Shukla

Prof. Arun Ranjan Mishra

Prof. Sukanta Kumar Senapati

Dr. Acharya Devabrata

**Hon'ble Referees:**

**Prof. Kishor Chandra Padhi,**

Ex-Professor, S. J. S. V. Puri

**Prof. Tapan Shankar Bhattacharya,**

Professor in Sanskrit, Jadavpur University, Kolkata

**Prof. Satyanarayana Acharya,**

Professor in Sahitya, National Sanskrit University, Tirupati

**Prof. Dharmananda Rout,**

Professor in Sahitya, LBS National Sanskrit University, New Delhi

**Co-Ordinators:**

Prof. Sarita Sharma (Academic)
Dr. Umakanta Panda (Finance)
Sri Chandradhwoja Majhi (Finance)
Smt. Laxmipriya Pahadi (Publicity)
Dr. Koushik Malakar (Printing)
Dr. Asha Singh Rawat (Printing)
Biswanath Mahata (Printing)

 ISSN: 2320-2025

# प्रास्ताविकम्

**उप समीपे यो वासो जीवात्मपरमात्मनोः।**
**उपवासः स विज्ञेयो न तु कायस्य शोषणम्।।**

(वराहोपनिषद्-२-३९)

उपनिषदि समाम्नातस्यास्य उपवासस्वरूपस्य व्यापकार्थो भवति ईश्वराय समर्पितानां कर्मणामनुष्ठानं तत्रापि ईश्वरस्य च ईशित्वकल्पनम् उपवासः। भगवति दत्तचित्तानां मानवानां भाग सर्वाणि कर्माणि एव उपवासपालनम्। न तु कायस्य शोषणम् इति चतुर्थपादं सर्वदा स्मारयति यत् शरीरे कष्टं मास्तु, शरीरस्य पोषणे कथञ्चिदपि विघ्नं मास्तु अपि तु सुस्थशरीरेण भगवति प्रकटिता श्रद्धा एव उपवासः। अत्रापीदं व्यङ्ग्यवस्तु सहृदयानां बुद्धौ अवभासते यतः शरीरं सम्यक परिपोष्य ईश्वराय समर्पितं सर्वं कर्म उपवासः न तु शरीरशोषणाय अन्नादिभक्षणं विहाय परनिन्दा, परपीडनं, हिंसाचरणं, मिथ्याभाषणं, देवगुरुराजनिन्दा, परनारीषु कामासक्तिः, असत्कर्मजाले रतिः, अनित्यसंसारे रतिः, नित्यब्रह्मणि अनासक्तिः उपवासः। वस्तुतः असत्कर्मणः परित्याग एव उपवासः।

अतएव कायस्य शोषणाय उपवासं न कृत्वा ईश्वरविश्वासेन सह अध्यात्मविद्याप्रकाशनं, वाचनं, सच्छास्त्राध्ययनाय सुस्थमानसिकतायाः सर्जनमेव उपवासः।

व्यासश्रीपरिवारस्य महता प्रयासेन एतादृशः उपवासः सर्वदा क्रियते। स्वाध्यायकर्मपरिपालनाय व्यासश्रीज्ञानदीपव्याख्यानमालाया आयोजनं, ग्रन्थग्रन्थिमोचनपुरसरं नवीनतत्त्वानामविष्करणाय व्यासश्रीरिति शोधपत्रिकायाः परिप्रकाशनं वर्षस्य द्विः, भारतीयसांस्कृतिकमहत्त्वपोषणाय कवितागोष्ठी, शास्त्रगोष्ठी,विद्वत्सम्मेलनं च अनुष्ठीयन्ते।

अस्मिन् कर्मणि परिवारस्य मनोबलवृद्धये विद्वद्वरेण्याः आचार्यहरेकृष्णशतपथी, आचार्यसुदर्शनशर्मा, आचार्यप्रमोदचन्द्रमिश्रः, आचार्यकिशोरचन्द्रपाढी, आचार्यतपनशङ्करभट्टाचार्यः, आचार्यप्रफुल्लकुमारमिश्रः, आचार्यअरूणरञ्जनमिश्रः, आचार्यश्रीनिवासवरखेडी, आचार्यप्रह्लाद- आर. जोशी, आचार्यगोपबन्धुमिश्रः, आचार्यसुकान्तकुमारसेनापतिः, आचार्यसोमेशकुमारमिश्रः, आचार्यपेन्नामधुसूदनप्रमुखाः प्रत्यक्षतया परोक्षतया च कारणीभूताः, तेषां सहस्ररश्मयः व्यासश्रीज्ञानदीपप्रकाशे हेतुभूताः, अतः सारस्वतकर्मण्यस्मिन् २६ तमस्य नवीनकण्डस्य प्रकाशनावसरे तेभ्यः विद्वत्पुङ्गवेभ्यः प्रणतिततिं प्रयच्छामः।

अत्र न सर्वेषां निबन्धाः प्रकाशयितुं शक्यन्ते। केवलं परिशोधमण्डलस्य निर्वाचिताः निबन्धाः प्रकाश्यन्ते, ये निबन्धकाराः महता प्रयासेन शोधविधिमनुसृत्य स्वज्ञानधारामत्र प्रवाहयन्ति तेभ्यः अवसरेऽस्मिन् कार्त्तज्ञ्यं व्याहरामः।

सज्जीकरणपटुः सङ्गणकविशेयज्ञः शिष्यपरम्परायाः आदर्शशिष्यः, संस्कृताय दत्तप्राणः श्रीविश्वनाथमाहातः अहोरात्रमेकीकृत्य प्रकाशनकर्मणि मग्नो वर्त्तते अतः तस्मैरपि शुभाशिषं प्रयच्छामः।

अत्र सम्पादनमण्डलस्यापि भूमिका गुरुत्वपूर्णा, अतः अस्य षड्विंशतिखण्डस्य प्रकाशनावसरे तेभ्यः शुभकामनाः प्रदीयन्ते।

परिशेषे सर्वकारणकारणाय परमात्मने नमोवाकं प्रदाय विरमामः। अन्तिमे इदमस्तु-

**सद्विद्या लोकरक्षायै निर्मिता परमेष्ठिना।**
**तत्पोषणाध्वगानां नो व्यासश्रीग्रन्थकल्पना।।**

इति

दिनाङ्कः ३०.०६.२०२४

विद्वषामाश्रवाः

**डॉ. बुद्धेश्वरषडङ्गी**

तथा व्यासश्रीपरिवारस्य सदस्याः

Scientific Journal Impact Factor

SJIFactor

# CERTIFICATE OF INDEXING (SJIF 2024)

This certificate is awarded to

**VYASASHRIH**
**(ISSN: 2320-2025)**

The Journal has been positively evaluated in the SJIF Journals Master List evaluation process
SJIF 2024 = 7.747

**SJIF (A division of InnoSpace)**

SJIFactor Project Manager
International Advisory Services
INNOSPACE INTERNATIONAL

SJIFactor Project

# GUIDELINE

1. Paper should be prepared with in10 pages**.**

2. Your paper should be recommended by an eminent scholar (Professor/Associate Professor/PhD Guide) of concern field. Send the pdf and soft copy of your paper with recommendation of the scholar to vyasasri12@gmail. Send a message to the contact no.7003415810 that you have sent the paper.

3. Your paper will be send to our export committee for approval.

***Guide line for the preparation of an article for VYASASHREE, ISSN 2320-2025***

...................................................................................................

**A. PRINTING AREA OF THE PAPER**

Length- **17cm**

Wide-**10.5 cm**

Letter size- **13 for Hindi/Devanagari** (Unicode font)

**11 English (Arial Normal)**

**B. PAPER FORMAT**

1. Title of the Paper (all capital). **Font size-16**

2. Authors' name-**Font size 13**

3. Abstract- Font Size 12

4. Key words (italic). **Font size 12**

5. Introduction**. Font size 12**

6. Main Topic**. Font size 12**

7. Conclusion. **Font size 12**

8. Foot Note. **Font size 09**

9. List of Reference Book s. (Author, Name of the Publisher, Publication year) **Font size 09**

10. Page limit. **6 to 10**

 ISSN: 2320-2025

All interested scholars are requested to prepare their research paper as per guide line to avoid the printing hazard.

**The paper not followed the above guide line may be rejected at final stage**.

N. B. The submitted papers are reviewed by the Board of Referees and Editorial Board. Only the selected papers are published in the journal. So, it takes three to six months to publish a paper.

**Dr. Buddheswar Sarangi**

***Chief Editor, Vyasashree***

# सूचीपत्रम्


| | | |
|---|---|---|
| **Editorial Board** | | (I) |
| **प्रास्ताविकम्** | | (IV) |
| **Certificate of impact factor** | | (VI) |
| **Guideline** | | (VII) |
| **सृष्टिः** | **स्रष्टा** | **पृष्ठम्** |
| 1. न्यायशास्त्रदिशा छलतत्त्वविमर्शः | प्रो. बिष्णुपदमहापात्रः | 1 |
| 2. नीतिशतके व्यावहारिकं नैतिकमूल्यम् | डॉ. नवीनकुमारप्रधानः | 11 |
| 3. नैषधीयचरिते सामुद्रिकशास्त्रीयसन्दर्भानामनुशीलनम् | डॉ. ज्योतिप्रसाददाशः | 20 |
| 4. गरुडपुराणे कारकविभक्तिविमर्शः | शुभलक्ष्मी आचार्यः | 25 |
| 5. गव्यूतिः इत्यत्र वलोपवारणविचारः | Prof. G S V Dattatreya Murthy | 31 |
| 6. संस्कृतभाषायाः अवक्षयस्य इतिवृत्तमादाय विरचितानां वङ्गीयरूपकाणां समीक्षणम् | भास्कर-च्यााटाज्र्जी | 38 |
| 7. युधिष्ठिरविजयमहाकाव्ये कविवासुदेवस्य काव्यकृतिवैचित्र्यम् | कल्पना नायक | 47 |
| 8. वैदिकज्योतिर्विज्ञाने स्त्रीजातकसमीक्षणम् | सत्यव्रत वेहेरा | 55 |
| 9. रसतत्त्वविमर्शः | Dr. Mithu Rani Maish | 61 |
| 10. स्थानेन्तरतमः | Dr. Santosh Majhi | 68 |
| 11. नैषधीयचरितमहाकाव्ये दण्डनीतेः एकं विहङ्गावलोकनम् | डॉ. प्रदीपकुमारबाग् | 72 |
| 12. श्रीमद्भागवतमहापुराणे योगदर्शनम् | डॉ. अरविन्दकुमारपाण्डेयः | 81 |
| 13. अग्नेः रहस्यनिरुपणम् | डॉ.जगमोहन आचार्यः | 91 |
| 14. आधुनिकशैक्षणिकसिद्धान्तानां पृष्ठभूमौ प्राचीनसंस्कृत-शिक्षणविधिविमर्शः | Dr. A. Shekar Reddy | 96 |
| 15. एकवाक्यतास्वरूपं भेदाश्च | डॉ.प्रज्ञा | 102 |
| 16. सुपद्मव्याकरणे स्वरसन्धिः – एका आलोचना | Atanu Adhya | 108 |

17. India Knowledge System for the Holistic
Value Education — Dr. Pallabi Saikia — 116

18. Buddhist Ethics and It's Impact on
Successive Generation — Nabanita Giri — 122

19. Multilingualism in Teaching & Learning
in Anganwadis — Dr. Anusha S &
Ms. Ashwini Srinivas — 132

20. Prāṇāgnihotra –Vidyā, An Ancient Healing
Concept as Reflected in The Chāndogyopaniṣad:
A Study — Dr. Biraj Krushna Mishra — 143

21. The Yajña Regulates "Supernatural Agencies"
Time to Time — Dr. Prashanta Kumar Dash — 150

22. Garbhopanishad an Optimal Doctrine over
the neonatal outcome: A Literature Research
Dr. D. Saritha — 161

23. The interstate relation and Diplomacy in
Kautilya Arthasastra and its application in Modern India
Dr. Sudipta Bhakat — 176

24. Scientific Significance of Emblica Officinalis(आमलकी) – Indian View
Dr. Ishwara Prasad A — 184

25. शान्तरसविमर्शः — डॉ. बुद्धेश्वरषडङ्गी — 194

- **Writer's World** — 198

# न्यायशास्त्रदिशा छलतत्त्वविमर्शः

**प्रो. बिष्णुपदमहापात्रः**

आचार्यः,न्यायविभागः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः

नवदेहली- १६

न्यायशास्त्रे षोडशपदार्थानां तत्त्वज्ञानान्निःश्रेयसाधिगमो भवतीति सूत्रकारैः अक्षपादीयैः आदिमसूत्रे संसूचितम्। तथाहि- **"प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्ताऽवयवतर्कनिर्णयवादजल्प-वितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः"**[1]। तत्र षोडशपदार्थेषु चतुर्दशपदार्थो भवति छलपदार्थः। तत्र हेत्वाभासपदार्थस्वरूपनिरूपणानन्तरं छलनिरूपणे का सङ्गतिरिति जिज्ञासायां द्वितीयवाचस्पतिमिश्रः निगदति-"परवाक्योद्भावनीयस्ववाक्यपरिहरणीयहेत्वाभासप्रकरणानन्तरं सत्समाधानोत्तरयो- रस्फूर्तौ तदाभासेनापि वाच्यमिति तद्व्युत्पादनमवसरप्राप्तम्। तत्रापि जातेः स्वव्याघातकत्वेन जघन्यत्वात् छलस्य तात्पर्यतो दुष्टत्वेऽपि नाभ्यर्हिततत्वादस्फूतावपि तदेव प्रयोक्तव्यम्। तस्यास्फूरणे जातिरिति विशेषज्ञापनार्थं जातेः पूर्वं छलमुद्दिष्टमित्यनयैव संगत्यादौ छललक्षणप्रकरणम्"[2] । भाष्यकारैरपि 'अथ छलम्' इति वाक्यस्य प्रयोगः हेत्वाभासनिरूपणानन्तरं छलनिरूपणात् प्राक् प्रतिज्ञातम्।

तत्रेदमवधातव्यं यत् वादजल्पवितण्डाभेदेन कथायास्त्रैविध्यं पूर्वमुक्तं सूत्रकारेण। तत्र जल्पं वितण्डाञ्चाश्रित्य यदा प्रतिवादी सदुत्तरविवक्षणे समर्थो न भवति तदा पराजयभयात् तूष्णीं नैव तिष्ठति अपि च असदुत्तरं जल्पति। एतादृशमसदुत्तरं छलं भवति। अस्य छलस्यापि तत्त्वाध्यवसायसंरक्षणे उपयोगित्वं विद्यते। तत्र प्रमाणरूपेण वाचस्पतिमिश्रः द्वितीय: जयन्तभट्टश्च इत्थं भणति- "सदुत्तरापरिस्फूर्तौ छलादिनापि पराहङ्कारखण्डनेन तत्त्वाध्यवसायसंरक्षणार्थं स्ववाक्ये वर्जनार्थं परवाक्यानुयोगार्थं जात्यादिप्रश्ने तदुत्तरार्थमनन्तरं छलादि। तत्रापि प्रयोगदूषणसामान्याद् आदौ छलम्। उभयपक्षसाम्यात् ततो जातिः। कथावसानिकत्वात् सर्वत्र वर्जनीयतया अनन्तरं निग्रहस्थानानि। एतेषां च कथात्रयपरिकरतया अपवर्गोपयोगः"[3]।

"तत्त्वाध्यवसायसंरक्षणं जल्पवितण्डयोः प्रयोजनमुक्तम् । तदङ्गभूतानि च्छलजातिनिग्रहस्थानानि। यद्यपि च वादे केषाञ्चिदभ्यनुज्ञानमस्ति तथापि जल्पवितण्डे एव तेषां प्राचुर्येण क्षेत्रमिति तदौपयिकतया तत्स्वरूपनिरूपणं युक्तमित्युद्देशक्रमेणच्छलस्य निरूपणम्"[4]।

पुनस्तत्र हेत्वाभासोद्भावनैव परपक्षस्य निग्रहो भवितुमर्हति चेत् किमर्थं छलादीनां पृथगुपदेशः किमर्थं सूत्रकारैरभिहितमिति जिज्ञासायामाचार्याः निगदन्ति- "छलजातिनिग्रहस्थानानां पृथगुपदेशः उपलक्षणार्थं (छलादिस्वरूपज्ञानार्थ:)। उपलक्षितानां स्ववाक्यपरिवर्जनं छलजातिनिग्रहस्थानानां परवाक्ये च पर्यनुयोगः"[5]। अर्थात् उपलक्षितानां ज्ञातानां छलजातिनिग्रहस्थानानां स्ववाक्येष्वप्रयोगः परेण प्रतिवादिना स्ववाक्ये प्रयुक्तानां छलादयः प्रयुक्ता इति निर्देशश्च सम्भवति न त्वज्ञातानामपीत्युपलक्षणार्थं पृथगुपदेशः।

छलस्य कुत्रोपयोगित्वमिति जिज्ञासायामित्थं वक्तुं शक्यते यत् कथायाः यत्त्रैविध्यं वर्तते तत्र वीतरागात्मिकायां वादकथायां तु छलस्योपयोगित्वं कदापि नास्ति, किन्तु जल्प-वितण्डाकथयोः छलस्य सापेक्षता विद्यते। यतः जल्पवितण्डेति कथाद्वयं विजिगीषुकथात्मिका भवति। तथाहि- **"प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नं पक्षप्रतिपक्षपरिग्रहो वादः"**[6]।। **"यथोक्तोपपन्नश्च्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः"**[7]। **"स प्रतिपक्षस्थापनाहीनो वितण्डा"**[8]।

एतादृशं वादिप्रतिवादिनोः पक्षप्रतिपक्षपरिग्रहः कथेति कथात्रयमाश्रित्य वीतराग-विजिगीषुकथेति कथाद्वयमुपपादयितुं शक्यते। तथाहि- यत्र वीतरागो वीतरागेणैव सह तत्त्वनिर्णयार्थं साधनोपालम्भौ करोति, सा वीतरागकथा वादसंज्ञयैवोच्यते। "यत्र तु विजिगीषु विजिगीषुणा सह लाभपूजा ख्यातिकामो जयपराजयार्थं प्रवर्तते, वीतरागो वा परानुग्रहार्थं ज्ञानङ्कुरसंरक्षणार्थं च प्रवर्तते, सा चतुरङ्गा। वादिप्रतिवादिसभापतिप्राश्निकाङ्गा विजिगीषु कथा जल्पवितण्डासंज्ञोक्ता"[9] इति।

तत्र पुनः शङ्का उदेति- यदि छलजातिनिग्रहस्थानैः साधनं कदापि कस्यचिदर्थस्य नैव सम्भवति तर्हि किमर्थं सूत्रे साधनशब्दस्य प्रयोगः सूत्रकारैः कृतः। यतः- वचनविघातोऽर्थविकल्पोपपत्त्या छलम्[10], साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः[11], विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्[12] इति।

तत्र समादधति भाष्यकाराः- प्रमाणैः साधनोपालम्भयोरछलजाति-निग्रहस्थानानामङ्गभावः स्वपक्षरक्षणार्थत्वात् न स्वतन्त्राणां साधनाभावः। तानि च परपक्षविघातेन स्वपक्षं रक्षन्ति। तथाहि- "तत्त्वाध्यवसाय संरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवदिति"[13]। यथा बीजादुत्पन्नस्य अङ्कुरस्य संरक्षणार्थं कण्टकयुक्तशाखावरणस्य आवश्यकं तथैव तत्त्वनिश्चयसंरक्षणार्थं

जल्पवितण्डयोः आवश्यकम्। एवञ्च छलादीनां साधनत्वे स्वातन्त्र्यं नास्ति किन्तु उपालम्भे स्वातन्त्र्यमस्ति इति भाष्यकारस्याशयः।

सामान्यलक्षणज्ञानमन्तरा विशेषजिज्ञासानुदयात् तत्त्वसंरक्षणे उपयोगिभूतस्य छलस्य किं स्वरूपमिति जिज्ञासायामुच्यते सुत्रकारैः - **"वचनविघातोऽर्थविकल्पोपपत्या छलम्"**[14]। अर्थात् अर्थस्य विरुद्धत्वेन कल्पनमर्‌थविकल्पः, तस्योपपत्तिः सम्भवः, तथा वचनस्य विघातो दूषणं यत् तच्छलम्। अर्थविकल्पस्य अर्थभेदस्य वक्तुरनभिप्रेतस्यार्थान्तरस्योपपादनेन यो वचनविघातः वाक्यविरोधः तत् छलम्। नवीनकम्बलाभिप्रायेण 'नवकम्बलः' इत्युक्ते नवत्वसंख्यानुपपत्तिप्रदर्शनेन वाक्यविरोधप्रदर्शनं छलम्। वाचस्पतिमिश्रास्तु 'वचनविघातोऽर्थ' इत्यत्र सूत्रे 'अर्थोविकल्पोपपत्या' इत्यस्य इत्थं व्याख्यां प्रकुर्वन्ति- ''यथा वक्तुरभिमतोऽर्थस्ततो विरुद्धोऽर्थस्तस्य विकल्पः कल्पना सैवोपपत्तिस्तया"[15] इति। अर्थात् वक्तुः विवक्षितः यो हि वाक्यार्थः तद्विरुद्धार्थस्य ग्रहणं सूत्रान्तर्गतार्थशब्देन कर्तव्यम्। एवञ्च विकल्पशब्दार्थः कल्पनार्थक इति। तथा च वक्तुः अभिमतार्थस्य विरुद्धार्थकल्पनमेव अर्थोविकल्पशब्दार्थो भवति। एतादृशार्थविकल्पोपपत्या वक्तुः वचनविघात एव छलं भवतीति सूत्राशयः। अभिप्रायस्तु वादिवाक्ये भिन्नविषयकतात्पर्यार्थं कल्पयित्वा तेनैन प्रतिवादिनः यो हि प्रतिषेधः, वादिवाक्ये दोषस्य समुद्भावनार्थं यदसदुत्तरं वा प्रकल्पते तद् छलं भवति।

तत्रेदमवगन्तव्यं यत् छलस्य यत्सामान्यं लक्षणं सूत्रकारैः भाषितं तत्र किमपि साक्षादुदाहरणं किमर्थं नोक्तमिति वक्तुं नैव शक्यते। यतः 'विभागे तूदाहरणानि' इति भाष्यकारैः यदभिप्रेतं तस्यायमाशयः। "विभज्यते इति विभागो विशेषलक्षणं, तस्मिन्नुदाहरणानि"[16]। भाष्यकारस्य प्रथमोक्त-शेषोक्तविभागशब्दः समानार्थक एव। मिश्रैस्तु न्यूनाधिकसंख्याव्यवच्छेदार्थं विभागस्यावतारणेति प्रतिपादितम्। तथाहि- "न्यूनाधिकसंख्याव्यवच्छेदार्थं विभागमवतरयति विभागश्चेति। विभज्यतेऽनेनेति विभागः सूत्रमुच्यते"[17] इति। वस्तुतः भाष्यकारैः विभागशब्दस्य उच्चारणं वारद्वयं कृतम्। तथाहि-"न सामान्यलक्षणे छलं शक्यमुदाहर्तुं विभागे तु उदाहरणानि। विभागश्च"[18]।

एवञ्च वक्त्रभिमतोऽर्थस्तद्-विकल्पोपपत्तिस्तद्-विरुद्धार्थकल्पना, तया वचनविघातो वाक्यार्थदोषाभिधानं छलम्। एतेन ज्ञायते वक्त्रृतात्पर्याविषये तात्पर्यसञ्चारेण दोषाभिधानं छलम्। एतादृशार्थस्वीकारे 'नेपालादागतोऽयं नवकम्बलवत्वात्' इत्यत्र नूतनकम्बलवत्त्वाभिप्रायेण वादिना प्रयुक्ते

प्रतिवादी यद् दूषणं वदति- अत्र नवकम्बलवत्त्वेन नूतनकम्बलवत्त्वमभिप्रेतं संख्याविशेषवत् कम्बलवत्त्वं वा ?

प्रथमकल्पे व्यभिचारो भवति- यतः साध्याभाववति नेपालागतत्वाभाववति अन्यत्र नवीनकम्बलस्य विद्यमानत्वात्। द्वितीये असिद्धि-पक्षे नवसंख्यारूपहेतोः अभावात्। यदि च वक्तृतात्पर्याविषय एव तात्पर्यसञ्चारेण दोषाभिधानं छलमित्युच्यते चेत् तर्हि तत्र तात्पर्यसञ्चारित्वेन दोषाणामपाकर्तुं शक्यते। तथापि सर्वं प्रमेयं धर्मत्वादित्यत्र धर्मपदस्य सम्बन्धमात्रबोधकमित्यभिप्रायेण प्रयुक्तं तत्र यद् दूषणाभिधानं धर्मत्वं पुण्यत्वम्, तच्च भागासिद्धम् इति तत्राव्याप्तिः। सर्वस्यैव तात्पर्यविषयत्वे तदविषया प्रसिद्धेः। तद्रुपेण वक्तुस्तात्पर्याविषय एव तद्रूपेण तात्पर्यसञ्चारेण दोषाभिधानं छलम्। अस्ति च हेतुत्वेन तात्पर्यविषयीभूते धर्मत्वे हेतुत्वेन तात्पर्यसञ्चारस्तत्र इति नोक्तदोष इति चेन्न, यत्र तात्पर्यग्रहमन्तरेणैव 'कुतोऽस्य नवकम्बला' इत्यभिधानं तत्राव्याप्तेः। अतः अव्याप्त्यादि दोषनिराकरणपूर्वकं रामभद्रसार्वभौमैः सूत्रकारस्याशयं विमृश्य नवीनमेकं लक्षणं समुद्भावितं यद्- बुद्धिविशेषपूर्वकदूषणाभिधानं छलम्, बुद्धौ बैलक्ष्ण्यमनुभवसिद्धमानसत्वव्याप्य-जातिविशेषः। यद्वा- बाक्छलत्वाद्यन्यतमवत्त्वं छलत्वम्[19]।

पुनश्च तत्र छलस्वरूपविषये न्यायज्ञाः सुनिपुणं विचिन्त्य इत्थं प्रवदन्ति-

१. अभिप्रायान्तरेण प्रयुक्तस्यार्थान्तरं प्रकल्प्य दूषणं छलम् [20]। अर्थात् यथा 'नवकम्बलोऽयं देवदत्त' इति नवीनकम्बलतात्पर्येण प्रयुक्तस्य नवत्वसंख्याविशिष्टमर्थान्तरं परिकल्प्य दूषयति कश्चित्- नास्य नवसंख्यकाः कम्बलाः सन्ति दरिद्रत्वात् इति।
२. अभिप्रायान्तरेण प्रयुक्तस्य शब्दस्यार्थान्तं परिकल्प्य दूषणाभिधानं छलम्[21]।
३. अनिष्टमर्थमारोप्य तन्निषेधश्छलं मतम्[22]।
४. परतात्पर्याविषये शब्दतात्पर्यसञ्चारेण दूषणाभिधानं छलम्[23]। उदाहरणान्तरम्- न हि अस्य द्वित्वं सम्भाव्यते। यथा- 'नव पुत्रोऽयं देवदत्तः' इत्यत्र नूतनाभिप्रायेण प्रयुक्तनवशब्दस्य नवत्वसंख्या अभिप्रायकत्वं प्रकल्प्य दूषणाभिधानं क्रियते एक एव पुत्रः कष्टेनानेन लब्धं, कुतोऽस्य नवसंख्याकाः पुत्राः।
५. शब्दवृत्तिव्यत्ययेन प्रतिषेधहेतुः छलम्- (व्यत्ययः - व्यत्यासः), छलं त्रिविधम्- अभिधान-तात्पर्य-उपचारत्तिव्यत्ययभेदात्[24]।

   क) अभिधानवृत्तिः - नवकम्बलोऽयं देवदत्तः।

ख) तात्पर्यवृत्तिः - सर्वे ब्राह्मणा: विद्यावन्तः।

ग) उपचारवृत्तिः - मञ्चाः क्रोशन्ति।

६. वचनस्य विघातो यतः क्रियतेऽर्थविकल्पपपत्त्या तच्छलम् । विघातो निराकरणं दूषणम्[25]।

## छलभेदनिरूपणम्

छललक्षणं निरूप्य तद्भेदान् निरूपयति सूत्रकारः "तत् त्रिविधं वाक्छलं सामान्यच्छलमुपचारच्छलञ्चेति"[26]। छलत्रयेस्मिन् द्विविधार्थबोधकशब्दप्रयोगे सति वक्तुरभिप्रेतार्थादतिरिक्तार्थम् अर्थान्तरं वा कल्पयित्वा दोषप्रदर्शनमेव वाक्च्छलं भवति। तथा चोक्तं- "अविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरपल्पना वाक्च्छलम्"। सूत्रेऽस्मिन् 'अविशेषाभिहिते' इति पदेन अनेकार्थबोधकसामान्यशब्दस्यैव ग्रहणं भवति। वस्तुतः वक्तुरनभिप्रेतार्थकल्पनमेव वाक्च्छलम्। यथा नवकम्बलोऽयं माणवकः इति प्रयोगः। अत्र नवकम्बलोऽस्य, नव कम्बला अस्य वेति बहुव्रीहिसमासाधारेण नवकम्बलशब्दः नवकम्बलस्य नवसंख्यककम्बलस्य चोभयार्थको भवति । अत्र विग्रहवाक्ये एव वैचित्र्यं न तु समासे। अर्थात् बहुव्रीहिसमासनिष्पन्नोऽयं शब्दः उभयार्थस्य बोधको भवति। उपर्युक्तवाक्ये प्रथमविग्रहानुसारेण नवीनकम्बलार्थः किन्त्वत्र प्रतिवादी बस्तुरभिप्रेतार्थं बुद्ध्वा अबुद्ध्वा वा द्वितीयार्थस्य नवसंख्यककम्बलार्थस्य कल्पनां कृत्वा वादिवाक्यस्यार्थस्य प्रतिषेधं करोतीति भवति वाक्च्छलम्। तथाहि- "तत्रायं छलवादी वक्तुरभिप्रायादविवक्षितमन्यमर्थं नव कम्बला अस्येति तावदभिहितं भवता" इति कल्पयति, कल्पयित्वा चाऽसम्भवेन प्रतिषेधति 'एकोऽस्य कम्बलः कुतो नव कम्बलाः' इति। तदिदं सामान्यशब्दे 'वाचि छलं वाक्च्छलमिति'[27]। वस्तुतः 'नवकम्बलः' इति सामान्यशब्द एव छलस्य निमित्तं भवति। 'वाचि' इति यो हि शब्दः भाष्यकारैः प्रयुक्तः तदुत्तरसप्तम्यर्थ एव निमित्तत्त्वम्। तथा चोक्तं मिश्रैः- "वाचि निमित्ते छलं वाक्च्छलमिति । नवकम्बल इति उभयत्रापि समानायां वाचि निमित्तभूतायामित्यर्थः"[28]।

वादिना द्व्यर्थशब्दस्य प्रयोगमनादृत्य 'नूतनकम्बलोऽयं माणवकः' इति प्रयोगः किमर्थं न कृतः इत्यादि जिज्ञासायाः समाधानावसरे इत्थं वक्तुं शक्यते यत् अत्र प्रयोगवादिनः नास्ति कश्चिद् दोषः, यतः अभिधानाभिधेययोः नियमनियोगः शब्दार्थसम्बन्धस्य लोकसिद्धत्वात्। तथाहि- "प्रसिद्धश्च लोके शब्दार्थसम्बन्धोऽभिधानाभिधेयनियमनियोगः - अस्याभिधानस्याऽयमर्थोभिधेय इति"[29] ।

शब्दार्थसम्बन्धस्य लोकसिद्धत्वात् अर्थावबोधनार्थं यो हि शब्दः प्रयुज्यते तत्र अनेकार्थशब्दानां योग्यतादिघटितसामग्राः अर्थावधारणं कार्यमिति नियममभ्युपपगत्य भाष्यकारः पुनः निगदति- "अजां ग्रामं

नय, सर्पिराहर, ब्राह्मणं भोजय' इति सामान्यशब्दाः सन्तोऽर्थावयवेषु प्रयुज्यन्ते"[30]। अभिप्रायस्तु यद्यपि वाक्यत्रये प्रयोगभूतः अजादिशब्दः तन्मात्रबोधकशब्दो भवति तथापि योग्यतादिवशाद् अजादिशब्दैः तत्तदजादिविशेषस्य एव बोधो भवतीति। एवञ्च 'घटेन जलमानय' इति वाक्यप्रयोगस्थले वक्तुः तात्पर्यवशात् घटशब्देन घटत्वस्य घटस्य समवायस्य च यथा बोधो भवति तथैव घटत्वरूपेण अछिद्रघटविशेषस्यापि बोधो भवति, न तु तादृशार्थः घटस्य लाक्षणिकार्थः। अछिद्रघटविशेषस्य घटशब्दाद् एव बोधो भवतीत्यत्र प्रमाणं दर्शयति वर्धोमानोपाध्यायः "नहि छिद्रबाधानन्तरं घटपदेन छिद्रेतरत्वेन घटज्ञानं जन्यते, किन्तु योग्यतया छिद्रं विहाय यद् वस्तुगत्या छिद्रेतरत्, तस्य घटत्वेन ज्ञानम्। न च लक्षणापि साहि जहत्स्वार्था अजहत्स्वार्था वा, नाद्यः घटाननुभवप्रसङ्गात्। नान्त्यः शक्यलक्ष्यसाधारणैकरूपाभावात्। एवं सर्वत्र सामान्यशब्दस्य विशेषपरत्वे द्रष्टव्यम्''[31] इति। जगदीशोऽपि द्विगुसमासलक्षणव्याख्यायां वदति- "पञ्चमूलीत्यादौ तु पञ्चमूलकत्वेनैव मूलविशेषेषु तात्पर्यं न तु विशेषरुपेणापि"[32]।

वस्तुतः मुख्यवृत्त्या प्रयुक्ते अर्थान्तरं सञ्चार्य दूषणवचनं वाक्च्छलमिति द्वितीयवाचस्पतिमिश्रः[33]। एवञ्च शक्त्या प्रयुक्ते शक्त्यैवार्थान्तरं सञ्चार्य दूषणवचनं वाक्च्छलमिति। उदयनाचार्यस्तु वाक्च्छलस्य लक्षणम् इत्थं प्रकुर्वन्ति "अभिधावृत्तिसञ्चारो यत्र तद् वाक्च्छलम्, अभिधा मुख्यवृत्तिः, यथा नेपालादागतोऽयं नवकम्बलवत्त्वादिति"[34] अर्थात् नूतने प्रयुक्तस्य नवशब्दस्य संख्यायामभिधासञ्चारेणाभिधानं कुतोऽस्य नवकम्बलवत्त्वमिति। वर्धमानस्तु "मुख्यार्थतात्पर्येण प्रयुक्त मुख्यार्थान्तरसञ्चारेण छलं वाक्छलमिति वाक्छलस्य लक्षणं प्रतिपादितम्"[35]।

सामान्यच्छलं लक्षयति सूत्रकारः- "सम्भवतोऽर्थस्याऽतिसामान्ययोगादसंभूतार्थकल्पना सामान्यच्छलम्"[36] इति। अर्थात् संभावितार्थस्य वाक्यस्य संभावितस्यार्थविशेषस्य वा यथा ब्राह्मणविशेषस्य अतिसामान्यविशेषस्य ब्राह्मणत्वादिधर्मस्य सम्बन्धाद् याऽसंभूतार्थकल्पना तत् सामान्यच्छलम्। यथा 'सम्भवति ब्राह्मणे विद्याया आचारस्य च सम्पत्तिः' इत्युक्ते परो निगदति- यदि ब्राह्मणे विद्याचरणसंपत् तदा सा व्रात्येपि स्यात् व्रात्योऽपि ब्राह्मणः इति। अत्र व्रात्यस्य ब्राह्मणत्वेऽपि उपनयनादिसंस्काराभावाद् वस्तुतो विद्याचरणसंपद् न सम्भवति तत्रातिसामान्यं, ब्राह्मणत्वमाश्रित्य असंभावितार्थस्य व्रात्ये विद्याचरणसंपदो या कल्पना तदेव सामान्यच्छलमिति निष्कर्षः।

अत्रेदमवधातव्यं यत् सामान्यधर्मनिमित्तकं छलमित्यर्थे सामान्यछलस्य व्यपदेशः। सामान्यच्छले अतिसामान्यधर्म निमित्तो भवति। अतिसामान्यं तु अतिव्यापकसामान्यधर्मः। अर्थात् यो धर्मः विवक्षितपदार्थे सम्भवति, तं विवक्षितपदार्थमतिक्रम्य अन्यत्रापि तिष्ठतीति स अतिसामान्यधर्मे भवतीति ।

मूले व्रात्योऽपि ब्राह्मण इति यत् प्रतिपादितमस्ति तत्र 'व्रात्य' इत्यस्य कोऽभिप्राय इति जिज्ञासायामित्थं वक्तुं शक्यते यत्- उपनयनकालातीतः अनुपनीतब्राह्मणबालः व्रात्यो भवति ।

**"जन्मता ब्राह्मणो ज्ञेयः संस्काराद्-द्विज उच्यते ।**

**विद्यया याति विप्रत्वं श्रोत्रियस्त्रिभिरेव च"**[37] ॥

यद्वा भवतु सामान्यच्छले व्यभिचारप्रदर्शनमेव छलवादिनः लक्ष्यमस्ति। वस्तुतः तत्सामान्यविशिष्टे सम्भवतोऽर्थस्यातिप्रसक्तं सामान्यं तद् योगादसम्भूतार्थस्या-विवक्षितार्थस्य कल्पना यत्र छले भवति तत् सामान्यच्छलमिति ।

उपचारच्छलं लक्षयति सूत्रकारः- "धर्मविकल्पनिर्देशोऽर्थ-सद्भावप्रतिषेध उपचारच्छलम्"[38] ।

अर्थात् शक्त्या शब्दप्रयोगे कृते सति लक्षणया प्राप्तस्यार्थस्य प्रतिषेधः, लक्षणया शब्दप्रयोगे कृते सति शक्त्या प्राप्तस्यार्थस्य प्रतिषेधः तदुपचारच्छलम् । यथा 'गङ्गायां घोष' इति लक्षणया उक्ते सति 'न गङ्गायां घोषः सम्भवति' इति शक्त्या यो गंगाप्रवाहे घोषसद्भावप्रतिषेधस्तदुपचारच्छलम् । एवञ्च शक्त्या 'गङ्गायां मीनः' इत्युक्ते गङ्गापदलक्षणया यो गङ्गातीरे मीनसद्भावप्रतिषेधस्तदुपचारच्छलमिति । वस्तुतः धर्मशब्दस्य यो हि प्रयोगः विद्यते तस्य विकल्पो द्वैविध्यं भवति शक्य-भाक्तभेदेन । तेन धर्मविकल्पेन निर्देशे वचने उभयथा प्रयोगसंभवे भक्त्या लक्षणया प्रयुक्ते पदार्थस्य सद्भावप्रतिषेधः, तेन भक्त्या प्रयुक्तस्य पदस्यार्थान्तरे तात्पर्यसञ्चाराद् दूषणाभिधानमुपचारच्छलमिति । एवञ्च इत्थमपि वक्तं शक्यते- शब्दस्य स्वाभाविको धर्मः शक्तिर्भवति, तद्विपरीतं च लक्षणा भवति । तया निर्देशे प्रयोगे कृतेऽर्थसद्भावेन शक्त्या प्रतिषेध उपचारच्छलम् । यथा मञ्चाः क्रोशन्तीत्यत्र मञ्चस्थाभिप्रायेण प्रमुक्ते दूषणवचनं भवति मञ्चस्थाः क्रोशन्ति, न तु मञ्चा इति । अनेन प्रकारेण न्यायशास्त्रे छलस्वरूपस्य तद्भेदानाञ्च निरूपणं विद्यते ।

वस्तुतः छलस्य द्वयी गतिः– तात्पर्यमात्रसञ्चारः, पदार्थतात्पर्यसञ्चारश्च। तात्पर्यमात्रसञ्चारः सामान्यछलस्य । पदार्थतात्पर्यसञ्चारस्य चतुर्धाः गतिः - १. शक्यान्तरे प्रयुक्तस्य सञ्चारः २. शक्यान्तरे

शक्ये प्रयुक्तस्य उपचार्य सञ्चारः ३. उपचार्य प्रयुक्तस्य शक्ये सञ्चारः ४. उपचार्य प्रयुक्तस्य उपचार्यान्तरे सञ्चारः।

एवञ्चात्र मुख्यवृत्त्या प्रयुक्ते वृत्तिमात्रेण दूषणम् वाक्च्छलम्। अथवा मुख्यवृत्त्या प्रयुक्ते अर्थान्तरे सञ्चार्य दूषणवचनं वाक्च्छलम्। तथाहि-

१. गौ विषाणी इत्युक्ते कथमगौ विषाणीति दूषणवचनम्।
२. अग्निर्दाहक इत्युक्ते कथं माणवको दाहक इति।

उपर्युक्तोदाहरणद्वयं वाक्छलस्यैव भवितुमर्हति। उपचारवृत्त्या प्रयुक्ते वृत्तिमात्रे दूषणमुपचारच्छलम्। तथाहि-

३. मञ्चाः क्रोशन्तीत्युक्ते कथं काष्ठपुञ्जाः क्रोशन्तीति।
४. गङ्गायां घोषः प्रतिवसतीत्युक्ते कथं गङ्गा सम्बन्धिनि मकारादौ घोषप्रतिवासः।

अनेन प्रकारेण छलस्य द्वैविध्यमुपपादयितुं शक्यते।

अस्य छलपदार्थस्य तत्त्वाध्यवसायसंरक्षणार्थं यथा उपयोगित्वं विद्यते तथैव सामाजिक-व्यवहारिक-राजनीतिक-न्यायालयादिक्षेत्रेष्वपि अस्य उपयोगः परिलक्ष्यते इत्यत्र नास्ति कश्चिद् विशयावकाश इत्यलम्।

## पादटीकाः

1 न्या.सू. १/१/१

2 न्यायतत्त्वालोकः, छलप्रकरणम्

3 तदेव
4 तदेव
5 न्यायभाष्यम्, छलप्रकरणम्
6 न्या.सू. १/२/१
7 तदेव १/२/२
8 तदेव १/२/३
9 न्यायसारः.कथा. प्रक. पृ. ५७-५९
10 तदेव १/२/१०
11 तदेव १/२/१८
12 तदेव १/२/१९
13 तदेव ४/२/५०
14 तदेव १/२/१०
15 न्या.वा.ता. टीका, छलप्रकरणम्
16 तदेव
18 तदेव
19 न्या.भा. १/१/१०-१

20 न्यायरहस्यम्, छलप्रकरणम्
21 तर्कसंग्रह-दीपिका, छलप्रकरणम्
22 तर्कभाषा, छलप्रकरणम्
23 तार्किकरक्षा, छलप्रकरणम्
24 न्यायचन्द्रिका, छलप्रकरणम्
25सर्वदर्शनसंग्रहः, छलप्रकरणम्
26 न्या.सू. २/२/११
27 तदेव १/२/१२
28 न्या.वा.ता.टीका, छलप्रकरणम्
29 न्या.सू.भा. १/२/१२
30 न्या.सू.भा. १/२/१२
31 न्या.कु.पञ्चमस्तवकः. का- १२ प्रकाशव्याख्या
32 श.श.प्र . द्विगु समासः
33 न्या.त.लोकः, छलप्रकरणम्
34 न्या.सू.वा.ता.टी.परिशुद्धिः, छलप्रकरणम्
35 न्यायपरिशिष्टप्रकाशः, छलप्रकरणम्
36 न्या.सू. १/२/१३
37 अत्रिस्मृतिः
38 न्या.सू. १/२/१४

## सन्दर्भ-ग्रन्थाः

१. अन्नंभट्टः, तर्कसंग्रहः, सम्पा, नारायणचन्द्रगोस्वामी, वाराणसी : व्यास प्रकाशन। उदयनाचार्यः, न्यायकुसुमाञ्जलिः, सम्पा, श्रीमोहनः भट्टाचार्यः, कोलकाता: पश्चिमवङ्गराज्यपुस्तकपर्षत् , १९९५।

२. उदयणाचार्यः . न्यायवार्तिकतात्पर्यपरिशुद्धिः . सम्पा . विन्ध्येश्वरी प्रसाद द्विवेदि . कोलकाता : बिब्लोथिका इण्डिका .

३. उद्द्योतकरः . न्यायवार्त्तिकम् . सम्पा . विन्ध्येश्वरी प्रसाद द्विवेदि , दिल्ली : इस्टार्न वुक लिंकार , १९८६ .

४. भट्टाचार्यः, विश्वनाथन्यायपञ्चाननः, न्यायसूत्रवृत्तिः, सम्पा . आशुबोधविद्याभूषणः . दिल्ली: चौखम्बा संस्कृत प्रतिष्ठान , १९८६ .

५. भट्टः, जयन्तः, न्यायमन्जरी, सम्पा, गौरीनाथशास्त्री, वाराणसी: सं सं वि वि, १९८३।

६. भासर्वज्ञः, न्यायसारः, व्याखाकारः, वासुदेवसूरी, दिल्ली, संजय प्रकाशन, २००५।

७. भासर्वज्ञः, न्यायभूषणम्, सम्पा, स्वामी योगीन्द्रानन्दः, वाराणसी: षड्दर्शन प्रकाशन प्रतिष्ठानम्, १९६८।

८. महर्षिगौतमः, न्यायदर्शनम्, सम्पा, फणिभूषणतर्कवागीशः कोलकाता: पश्चिमवङ्गराज्यपुस्तकपर्षत् , प्रथमसंस्करणम् , २०८९ ।

९. माधवाचार्यः, सर्वदर्शनसंग्रहः (‘प्रकाश’हिन्दीभाष्योपेतः), भाष्यकारः, डाँ.उमाशङ्करशर्मा ऋषि, वाराणसी: चौखम्बा विद्याभवन, तृतीयसंस्करणम्,१९८४ ।

१०. मिश्रः, केशवः, तर्कभाषा, सम्पा, वदरीनाथ शुक्लः, दिल्ली: मोतीलाल बनारसीदास, सप्तम् संस्करणम् , २०१७।

११. मिश्रः, केशवः, तर्कभाषा, सम्पा, गंगाधर कर न्यायाचार्यः, कोलकाता: महावोधि वुक एजेन्सि, २०१४ ।

१२. मिश्रः, वाचस्पतिः, न्यायवार्तिकतात्पर्यटीका, सम्पा, राजेश्वरशास्त्री-द्रविडः, वाराणसी: चौखम्बासंस्कृतसंस्थानम् , द्वितीयसंस्करणम् , १९८९ ।

१३. श्रीमदाचार्यवरदराजः, तर्किकरक्षा, संस्कारकः विन्ध्येश्वरी प्रसाद द्विवेदि, वाराणसी : १९०३।

१४. भट्टः, केशवः, न्यायचन्द्रिका, केरलविश्वविद्यालयः, १९६० ।

१५. महर्षिगौतमः, न्यायदर्शनम्, मिथिला शोध संस्थान, १९६७ ।

१६. वात्स्यायनमुनिः, न्यायभाष्यम्, सम्पा, स्वामी द्वारिकादासशास्त्री, वाराणसी: बौद्धभारतीग्रन्थमाला , १९९८ ।

# नीतिशतके व्यावहारिकं नैतिकमूल्यम्

**डॉ. नवीनकुमारप्रधानः**

साहित्याध्यापकः

श्री सदाशिवपरिसरः, पुरी

संस्कृतसाहित्ये मुक्तकं काव्यं एक- स्वतन्त्र- शैल्या रचितम्। यस्यां रचनायां प्रत्येकस्मिन् श्लोके व्यावहारिकदृष्ट्या स्वयंसम्पूर्णं, तत् मुक्तकं काव्यं नाम्ना अभिहितम् । तदर्थम् अग्निपुराणे उक्तमस्ति यत्, मुक्तकः श्लोकः एवैकश्चमत्कारक्षमः सताम् । कवेः भतृहरेः शतकत्रयं इदं मुक्तक- काव्य- श्रेण्याम् अन्तर्गतम्, नीति-शृङ्गार-वैराग्यविषयाधारेण रचितत्वात् शतकत्रयम् यथाक्रमं नीतिशतकम्, शृङ्गारशतकम्, वैराग्यशतकमञ्च नामभिः अभिहितम्। व्यावहारिकदृष्टेः नीतिशतके विद्यायाः महत्त्वं अतीव गुरुत्वपूर्णं भवति। प्रायः गुणवतां सर्वे गुणाः यथावसरं पूज्यन्ते। यतो हि **विद्वानेव हि जानाति विद्वज्जनपरिश्रमम् । न हि वन्ध्या विजानाति गुर्वी प्रसववेदनाम्।।** यः कोऽपि छात्रः स्वपरिश्रमेण, स्वव्यवहारेण, गुरुकृपया, मातापित्रोः संस्कारपरंपरया वा विद्वान् भवति। स आदरणीय एव भवति । मनुष्यस्य कृते स्वसम्मानाय विद्या अभ्यासनीया । परं तेन साकं विनीतभावोऽत्यावश्यकः। यतोहि विनयोपेता विद्या सर्वेषां चेतांसि हरति। व्यवहारेण विद्वान् सरसां स्वकीयसूक्तिसरितं श्रोतृकर्णपरंपरां सिञ्चन दुष्टानपि शिष्टान्, जडानप्यधिगतपरमार्थान्, अधार्मिकान् धर्मपथानुयायिनः, वितथभाषणपरान् अवितथान् कर्त्तुं प्रभवति। अतएव विद्वान् संसारिणां हिताय जायते । तदर्थं विद्वान् सर्वत्र सत्कारं प्राप्नोति। अतः व्यवहारेण विद्यावद्भिः तादृग् सुयशः सर्वत्र लोके प्राप्यते, तादृक् नान्यैः प्राप्तुं शक्यते। अपि च नीतिकारः सद्व्यवहारं नैतिकमूल्यं प्रतिपादयन् कथयति, अस्मिन् संसारे सर्वेषां प्राणिनां मध्ये मानवः सर्वोत्तमसकलगुणवरिष्ठः वर्तते। अतएव सः अमृतस्य पुत्रः कथ्यते । अतः सर्वेषां मनुष्याणां परमं कर्त्तव्यमस्ति यत् सः स्वात्मकल्याणस्य साधनं चिन्तयेत्। विधिना प्रदत्तानां वहूनां साधकानां मध्ये सद्व्यवहारः एकमतीव सुलभं सरलं च साधनमस्ति । यतो हि सर्वे प्राणिन उत्पन्ना भूत्वा अस्मिन् लोके अन्यस्य संसर्गं प्राप्नुवन्ति । सद्व्यवहारेण विना जीवनं नीरसमरक्षितं च स्यात्। मानवः सर्वेषां प्राणिनां मध्ये कुशलतमः, सामाजिकः, प्राणी अस्ति। सः सदैव समाजे एव निवसितुमिच्छति तथा अन्यैः मानवैः सह सम्पर्कमपि कांक्षति । यतो हि सद्व्यवहारं विना क्षणमपि स्थातुं न शक्नोति। अत्र संसारविरक्ता –नामाप्तपुरुषाणां सन्यासिनां गणना सामाजिकानां मध्ये न भवति । तदतिरिक्ताः सर्वे सद्व्यवहारं सहभावं समाजं वाञ्छन्ति। मूर्खाणां ब्यवहारविषये नीतिकारः सर्वेषां कृते इत्थं निर्दिशति यत्,ये मनुष्याःविद्यया हीनाः भवन्ति, तपसा रहिताः भवन्ति, दानेन रहिताः भवन्ति, ज्ञानेन शून्या भवन्ति, सदवृत्तेन हीनाः भवन्ति, गुणैः रहिताः भवन्ति, धर्मेण हीनाः पशुभिः समानाः भवन्ति, ते मरणशिलेऽस्मिन् संसारे भारभूताः सन्ति। अस्यां पृथिव्यां ते मानवरूपेण

मृगा एव भवन्ति। यथा नीतिकारेण उक्तं यत्-

**येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः।**
**ते मर्त्यलोके भूवि भारभूता मनुष्यरूपेण मृगाश्चरन्ति।।** [1]

ततः नीतिकारः पण्डितानां व्यवहारविषयं प्रतिपादयन् कथयति, पण्डा अस्य अस्ति इति पण्डितः। पण्डा सद्सद्विवेकिन्या वुद्धेः नाम। सत्तावदेव वस्तु सदित्युच्यते, असच्च सत्ताविहीनं वस्तु प्रोच्यते। गीतानुसारं **नासतो विद्यते भावो नाभावो विद्यते सतः**।[(2)] इत्थम् उभयप्रकाराणां सत्तामसत्तां च वस्तूनां तात्त्विकं ज्ञानं पण्डित एवावैति। सतामसताञ्च वस्तूनां स्वरुपयाथात्म्यवेत्ता एव पुरुषाः पण्डितशब्दवाच्यो भवति। नीतिकार अत्र उदाहरणमुखेन वदति, अतीव कुपितो ब्रह्मा कमलनाशेन सह हंसानां लोकप्रसिद्धं तत्र विहारलीलां नाशयितुं शक्नोति, परन्तु कुपितो ब्रह्माऽपि तेषां नीरक्षीरयोः विवेकचातुर्यकीर्तिं नाशयितुं न शक्नोति।अर्थात् विधाता हंसस्यक्षीरनीरयोः विभागविधाने प्रथितां नैपुण्येन या कीर्तिः तां नाशयितुं न शक्नोति तथैव शासकाः पण्डितानां सुखसमृद्धिमेव विनाशयितुं शक्नुवन्ति परन्तु तेषां गुणदोषविमर्शिनीं पाण्डत्यकीर्त्तिं विनाशयितुं न शक्नुवन्ति। तथा चोक्तं नीतिकारेण-

**अम्भोजिनीवनविहारविलासमेव हंसस्य हन्ति नितरां कुपितविधाता।**
**न त्वस्य दुग्धजलभेदविधौ प्रसिद्धां वैदग्ध्यकीर्तिमपहर्तुमसौ समर्थः।।** [(3)]

ततः सज्जनव्यवहारं प्रदर्शयन् नीतिकारः प्रतिपादयति यत् यदि मनुष्याणां समीपे क्षमा वर्तते, तर्हि कवचस्य आवश्यकता नास्ति अर्थात् मनुष्याणां कवचधारणात् क्षमा श्रेष्ठा भवति। यदि मनुष्याणां अन्तिके क्रोधो वर्तते तर्हि अन्यषां शत्रूणां आवश्यकता नास्ति, अर्थात् शत्रुभ्यः क्रोधः श्रेष्ठः। यदि समिपे वन्धुजनो वर्तते तर्हि अग्नेः आवश्यकता नास्ति, अर्थात् अग्निवद् वन्धुजनः दाहकः भवति। यदि मनुष्याणां अन्तिके सुहृदः सन्ति, तर्हि दिव्यौषधीनामावश्यकता नास्ति, अर्थात् सुहृद् एव सर्वरोगाणां निवारकः शान्तिदायकः भवति। यदि मनुष्याणां सविधे दुष्टजनाः सन्ति, तर्ह सर्पाणामावश्कता न वर्तते, अर्थात् ते दुष्टजनाः एव प्राणहरणे पर्याप्ताः यदि मनुष्याणां अन्तिके प्रशस्ता विद्या अस्ति, तर्हि धनस्य आवश्यकता नास्ति।, अर्थात् सा विदया एव महत् धनं वर्तते। यदि मनुष्याणां सविधे व्रिडा वर्तते, तर्हि अन्येषाम् आभूषणानां आवश्यकता नास्तिसा त्रपा सर्वालंकाराणां श्रेष्ठतमा।यदि मनुष्याणां अन्तिके श्रेष्ठं साहत्यं सहृदयानन्दकरी काव्यशक्तिः अस्ति, तर्हि राज्यस्य कोऽपि आवश्यकता नास्ति,अर्थात् सा सुकविता एव सर्वलोकवशकरी प्रभुत्वदायिनी भवति। यथा नीतिकारेण चोक्तम्-

**क्षान्तिश्चेत्कवचेन किं किमरिभिः क्रोधोऽस्ति चेद्देहिनां,**
**ज्ञातिश्चेदनलेन किं यदि सुहृद्दिव्यौषधैः किं फलम्**
**किं सर्पैर्यदि दुर्जनाः किमु धनैर्विद्याऽनवद्या यदि**
**व्रीडा चेत् किमु भूषणैः सुकविता यद्यस्ति राज्येन किम्।।**[(4)] तथैव

लोकव्यवहारनियमं प्रदर्श्य मनुष्याणां कृते नीतिकार उपदिशति यत्, अस्मिन् संसारे ये पुरुषाःआत्मीयजने वन्धुवर्गे वा औदार्यमानुकूल्यमाचरन्ति, सेवकजने कृपां प्रदर्शयन्ति, दुर्जने वञ्चकत्वामाचरन्ति,सज्जने स्नेहभावं प्रदर्शयन्ति, नृपतौ नीतिं प्रदर्शयन्ति, अन्था तत्र राजदण्डस्य भयः भवति। विद्वत्सु सरलत्वमाचरन्ति, रिपौ पराक्रमं प्रदर्शयन्ति, गुरुजने पूज्यजने वा सहिष्णुत्वमाचरन्ति, स्त्रीषु प्रागल्भ्यं प्रदर्शयन्ति, इत्थं आसु कलासु ये जनाः निपुणाःभवन्ति, तेषु एव लोकस्थितिः अधूना वर्तते, अर्थात् एतादृशेषु व्यावहारिकज्ञानेषु जनाः प्रशंसनीयाः भवन्ति। तथा चोक्तं नीतिकारेण-

**दाक्षिण्यं स्वजने दया परिजने शाठ्यं सदा दुर्जने**
**प्रीतिः साधुजने नयो नृपजने विद्वजने चार्जवम्।**
**शौर्यं शत्रुजने क्षमा गुरगजने नारीजने धूर्तता**
**ये चैव पुरुषाः कलासु कुशलास्तेष्वेव लोकस्थितिः।।** (5)

अर्थस्य व्यावहारिकज्ञानविषये नीकार वदति यत्, संसारेऽस्मिन् धननिमित्तं जनाः निन्दनीयं कर्म कर्त्तुं विमुखाः न भवन्ति। ब्राह्मणत्वादि जातिः नश्यतु, शौर्यादिगुणाः अपि नश्यतु, सदाचारोऽपि नश्यतु, कुलिनता अग्निना दाहो भवतु, शत्रुभूते पराक्रमशालित्वे वज्रपातो भवतु, तैः अस्माकं न प्रयोजनम्। अस्माकं केवलं धनमेव भवतु,येन एकेन धनेन विना इमे सर्वे गुन्राः शुष्कतृणवत् अकिञ्चित्कराः सन्ति। यथा कवेः भाषया-

**जातिर्यातु रसातलं गुणगणास्तस्याप्यधो गच्छता,**
**च्छीलं शैलतटात्पतत्वभिजनः सन्दह्यतां वह्निना,**
**शौर्ये वौरिणि वज्रमाशु निपतत्वर्थोऽस्तु न केवलं,**
**येनैकेन विना गुणास्तृणलवप्रायाः समस्ता इमे।।** (6)

धनमेव सर्वेषां गुणानां मूलमिति उपदिशन् कवि कथयति यत्, संसारस्य यस्य जनस्य समीपे धनमस्ति स एव नरः महाकुलप्रसूतोऽभिजनवान् भवति, यद्यपि स जनः नीचवंशे जातः भवति, यतः तस्य अन्तिके धनं स्थतत्वात् सः पण्डितः शास्त्रज्ञश्च भवितुमर्हति। यद्यपि सः जनः गुणहीनः भवति, परन्तु तस्य अन्तिके धनं स्थितत्वात् सः गुणज्ञः भवति। यद्यपि सः जनः किमपि वक्तुं समर्थः न भवति, यतः तस्य सविधे धनमस्ति सः वक्ता इति भवितुमर्हति। यद्यपि सः जनः कुत्सिपुरुषः भवति, परन्तु धनस्य हेतोः सः दर्शनीयः भवति। केवलं वित्तेन सर्वे गुणाः समागताः सन्ति। अर्थात् सर्वे गुणाः काञ्चनमाश्रयन्ते। वाल्मिकीरानायणे अपि वर्णनमस्ति यत्-

**यस्यार्थास्तस्य मित्राणि यस्यर्थास्तस्य वान्धवाः ।**
**यस्यार्थाः स पुमांल्लोके यस्यार्थाः स च पण्डितः ।।** (7)

अपि च धनस्य व्यवहारविषये नीतिकारः उपदिशन् वदति यत्, अस्मिन् लोके धनस्य तिस्रो गतयो भवन्ति। दानं, भोगो नाशश्चेति। यो पुरुषः न ददाति न च भुनक्ति तस्य धनस्य नाशरूपा तृतीया गतिर्भवति।

दानस्य महत्त्वम् अवर्णनीयम् यथा महाभारतस्य वनपर्वणि विद्यते यत्, मृतपुरुषस्य मित्रं किम् उत्तरेण युधिष्ठिरः वदति यत्, दानं मृतपुरुषस्य मित्रं भवति। दानेन मनुष्याः पुण्यमर्जयन्ति, तेन मनुष्याणां जीवनं सफलं भवति। चार्वाक्दर्शने विद्यते यत्, ऋणं कृत्वा घृतं पिवेत्। आत्मनः सन्तुष्ट्यर्थं भोः करणीयः। भोगेन आत्मा सन्तुष्टः भवति। यदि मनुष्याः धनस्य दानं न करोति भोगमपि न करोति, तर्हि तस्य कष्टार्जितस्य धनस्य तृतीयागतिर्भवति अर्थात् धनस्य विनाशः भवति। यथा चोक्तं नीतिकारेण-

**दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य**
**यो न ददाति न भुङ्क्ते, तस्य तृतीया गतिर्भवत्।।**[8]

मनुष्याणां लाभालभौ दौवाधीनौ इति वर्णयन् नीतिकारः उपदिशति यत्, संसारेऽस्मिन् कथितमस्ति भाग्ये यदस्ति तदवश्यं प्राप्तव्यम्। ब्रह्मणा मनुष्याणां भाग्यपदे लिखितं यदल्पं बहु वा धनमस्ति तद्धनं मनुष्यो मरुभूमौ अपि पूर्णरूपेण प्राप्नोति, परन्तु तदधिकं च सुवर्णगरौ अपि न प्राप्नोति। तस्मात् कारणात् हे मनुष्य धीरो भव, अर्थात् स्थिरचित्तो भव, धनिकेषु दिनां वृत्तिं मा कुरु, पश्य घटः कूपात् समुद्रात् वा स्वल्पपरिमाणमात्रं समानमेव जलं स्वीकरोति, नीतिकारेण चोक्तं यत्,

**यद्धात्रा निजभालपट्टलिखितं स्तोकं महद्वा धनं,**
**तत् प्राप्नोतिमरुस्थलेऽपि नितरां नेरौ ततो नाधिकम्।**
**तद्धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः,**
**कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलम्।।**[9]

सुजनानां व्यवहाराः नमस्कारयोग्याः इति नीतिकारः वर्णयन् उपदिशति यत्, उत्तमव्यवहारसंपन्नः जनः साधुसमागमे इच्छा करणीया। परगुणे प्रेम स्थापनीया। पूज्ये नम्रता प्रदर्शनीया, सच्छास्त्रे आसक्तिः करणीया, स्वपत्न्यां प्रेम स्थापनीयम्, लोकनिन्दाभयं करणीयम्। महेश्वरे भक्तिः आचरणीया, आत्मनिग्रहे शक्तिः प्रदर्शनीया, खलैः सह सम्पर्कत्यागः करणीयः। एते प्रशंसनीयाः गुणाः येषु मनुष्येषु सन्ति तेभ्यो नमः। तथा चोक्तं नीतिकारेण-

**वाञ्छा सज्जनसङ्गमे परगुणे प्रीतिगुरौ नम्रता**
**विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादात् भयम्।**
**शक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्ति खले**
**येष्वेते निवसन्ति निर्मलगुणास्तेभ्यो नरेभ्यो नमः।।**[10]

सज्जनव्यवहारः कुत्रस्थापनीयः इति वर्णयन् नीतिकारः वदति-विपत्तौ धृतिः धारणीया, अभ्युदये सहिष्णुत्वम् आचरणीयम्, सभायां वाक्पाटवं भवेयुः, समरे पराक्रमः प्रदर्शनीयः, यशसः संग्रहेच्छा भवेयुः, वेदशास्त्राभ्यासे आसक्तिः रक्षणीया, एतत् सर्वं सज्जनपुरुषाणां निश्चयेन निसर्गसिद्धं भवति। सज्जनानां एते गुणाः स्वभाविकाः भवन्ति। तथा चोक्तं नीतिकारेण स्वभाषया-

**विपदि धैर्यमथाभ्युदये क्षमा, सदसि वाक्पटुता युधि विक्रमः**
**यशसि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम्।।**[11]

अपि च सज्जनानां व्यवहारः एतादृशः भवेत्, यथा सत्पात्रेभ्यः धनं प्रदाय न प्रकाशयेत्। निजमन्दिरं अतिथौ आगते सम्मानं प्रदर्शनीयम्। अन्यस्य हतं कृत्वा कस्मै न व्यक्तव्यम्। अन्यकृतायाः उपकृतिं अन्येषां पुरतः प्रकाशनं करणीयम्। लक्ष्म्यां समृद्धौ गर्वराहित्यं भवेत्। परचर्चाप्रसङ्गे निन्दावर्जनं करणीयम्। इदं कठिनं खड्गधारेण तीक्ष्णं व्रतं सज्जनानां कृते उपदिष्टमस्ति। नीतिकारः स्वभाषया उक्तं यथा-

**प्रदानं प्रच्छन्नं गृहमुपागते सम्भ्रमविधि**
**प्रियं कृत्वा मौनं सदसि कथनं चाप्युपकृतेः**
**अनुत्सेको लक्ष्म्यां निरभिभवसाराः परकथाः।**
**सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम्।।** [12]

अपि च सुजनाः कीदृशेन व्यवहारेण विराजन्ते तस्योपरि नीतिकारः वर्णयन् वदति, सुजनानां प्रशंसनीयेषु दानेषु हस्तः विराजते। यथा चोक्तं दानेन पाणिर्नतु कङ्कणेन गुरुजनानां चरणयोः प्रणामरूपविनयेन तेषां मस्तकः शोभते। सत्यवचनकथनेन तेषां मुखं शोभते। अतुलनीयेन पराक्रमेण तेषां करौ शोभेते। स्वच्छाचरणेन तेषां हृदयं राजते। शास्त्रश्रवणेन तेषां कर्णयुगलं विराजते। धनरत्नसम्पत्या विना अपि तेषां सद्व्यवहारः भूषणं भवति। तथा चोक्तं नीतिकारेण-

**करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणयिता**
**मुखे सत्या वाणी विजयी भुजयोर्वीर्यमतुलम्।**
**हृदि स्वच्छा वृत्तिः श्रुतमधिगतं च श्रवणयो**
**विनाप्यैश्वर्येण प्रकृतिमहता मण्डनमिदम्।।**[13]

अपि च सुजनानां परोपकारः तेषां व्यावहारिकः गुणः वर्तते। नीतिकारः इदाहरणमुखेन प्रतिपादयति यत्, वृक्षाः फलागमैः नम्रीभूताः भवन्ति। यतः ते जीवानां कृते फलं प्रददति। अतः वृक्षाः सज्जनतुल्याः भवन्ति। प्राणीनां कृते जलप्रदानार्थं मेघाः नवजलागमैः दूरप्रदेशं यावत् विलम्बिनः भवन्ति। सज्जनाः ऐश्वर्यादिभिः अनुद्धताः भवन्ति। एष पूर्वोक्तनमत्वव्यवहारः परोपकारिणां परहितसंपादनतत्पराणां स्वभावः निसर्गसिद्ध एव भवति। महान्तः सज्जनाः परोपकारार्थं स्वक्लेशं न गणयन्ति। नीतिकारस्य भाषया यथा-

**भवन्ति नम्रास्तरवः फलोद्गमैः नवाम्बुभिः दूरविलम्बिनो घनाः।**
**अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम्।।**[14]

किञ्च सुजनः केन व्यवहारेण शोभते तस्योपरि वर्णयन् नीतिकारः वदति यत्, सुजनानां कर्णः शास्त्रश्रवणेन विभाति। अपि तु स्वर्णकुण्डलेन न विभाति। तेषां हस्तः सत्पात्रेभ्यः दानेन राजते, परन्तु स्वर्णवलयेन न विभाति। दयालुस्वभावानां शरीरं परोपकारैः विभाति, परन्तु चन्दनविलेपनेन न विभाति। नीतिकारस्य भाषया उक्तं यथा-

**श्रोत्रं श्रुतेनैव न कुण्डलेन, दानेन पाणिर्न तु कङ्कणेन ।**
**विभाति कायः करुणापराणां परोपकारैर्न तु चन्दनेन।।**(15)

अपि च सन्मित्रस्य व्यवहारं वर्णयन् नीतिकार उपदिशति यत्, सन्मित्रं सर्वदा पापाचरणात् निवर्तयति, संसारस्य हितकर्मणि योजयते। गोपनीयं तथ्यं आच्छादयति। सुगुणान् प्रकटीकरोति। विपद्ग्रस्थं न त्यजति तथा च यथोचितसमये अन्येभ्यः धनादिकं ददाति। नीतिकारस्य भाषया उक्तं यथा-

**पापान्निवारयति योजयते हिताय, गुह्यं निगूहति गुणान् प्रकटीकरोति।**
**आपद्गतं च न जहाति ददातिकाले, सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः।।**(16)

सन्तः स्वभावत एव परहितप्रवृत्ताः भवन्ति इति नीतिकारः उदाहरणमुखेन उपस्थापयति यत्, सूर्यः स्वयमेव याचनां विना एव कमलसमूहं विकाशयति, यथा उक्तमस्ति उदिते सूर्ये विकसति पद्मम्, चन्द्र अपि अप्रार्थितः एव कुमुदमण्डलं विकासयति, जलधरो अपि याचनां विना एव जलं ददाति। सज्जनाः स्वयमेव परहितसम्पादने कृतोद्योगाः भवन्ति। यतः सूर्य-चन्द्र-जलधर-सज्जनाश्च निःश्वार्थपराः भवन्ति। तेषां जीवनं केवलं परहिताय भवति। नीतिकारस्य भाषया यथा-

**पद्माकरं दिनकरो विकचीकरोति,**
**चन्द्रो विकासयति कैरवचक्रवालम्।**
**नाभ्यर्थितो जलधरोऽपि जलं ददाति,**
**सन्तः स्वयं परहितेषु कृताभियोगः।।** (17)

व्यवहारक्रमेण पुरुषाणाम् उत्तमादिभेदान् निदर्शयन् नीतिकारः वदति यत्, अस्मिन् संसारे उत्तमकोटिभाजः अर्थात् उत्तमव्यवहारसम्पन्नाः पुरुषोत्तमाः स्वार्थं त्यक्त्वा परहितसाधकाः भवन्ति। अपरे सामान्यकोटिभाजः मध्यमव्यवहारसम्पन्नाः जनाः स्वार्थविरोधेन परार्थसंपादकाः भवन्ति। राक्षसप्रकृतयो अधमकोटिभाजः क्रूराचारतया मनुष्याः स्वर्थाय परार्थघातकाः भवन्ति। परन्तु ये निरर्थकाः परहितविनाशकाः ते परमनीचाः कथंभूताः इति वयं न जानीमहे। उक्तं नीतिकारेण-

**एके सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये,**
**सामान्यास्तुपरार्थमुद्यमभृतः स्वार्थाविरोधेन ये।**
**तेऽमि मानुषराक्षसाः परहितं स्वार्थायनिघ्नन्ति ये,**
**ये निघ्नन्ति निरर्थकं परहितं ते के न जानीमहे।।** (18)

सज्जनव्यवहारं निदर्शयन् उपदेशमुखेन नीतिकारः वदति यत्, हे मनुष्य! अलभ्यपदधनाभिलाषं विदारय, क्षमां सेवस्व, दर्पं त्यज, पापाचरणे अनुरक्तिं मा कुरु, सर्वदा सत्यवचनं वद, सज्जनाचरणम् अनुसर, विद्वज्जनसंसर्गं कुरु, सम्मानार्हान् जनान् सम्मानय, शत्रूनपि प्रसादय, विनम्रतां प्रकटय, कीर्तिरक्षणं कुरु, दुःखिते जने कृपां कुरु, यतः तु एतत् पूर्वोक्तं सज्जनाचरणमस्ति। यथा नीतिकारस्य भाषया-

**तृष्णां छिन्धि भज क्षमां जहि मदं पापे रतिं मा कृथा,**
**सत्यं व्रूह्यनुयाहि साधुपदवीं सेवस्व विद्वज्जनम्।**
**मान्यान्मानय विद्विषोऽप्यनुनय प्रख्यापय प्रश्रयं,**
**कीर्तिं पालय दुखिते कुरु दयामेतत्सतां लक्षणम्।।** (19)

सद्व्यवहारमेव सज्जनानां सर्वोत्कृष्टं भूषणमस्तीति नीतिकारः वदति यत्, प्रभुत्वस्य बैभवस्य वा सौजन्यं विभूषणमस्ति, पराक्रमस्य वाणीसंयमः भूषणं भवति। ज्ञानस्य विषयेच्छानिवृत्तिः भूषणमस्ति। शास्त्रज्ञानस्य विनम्रता भूषणमस्ति। वित्तस्य सत्पात्रेभ्यो दानं भूषणमस्ति। तपश्चरणस्य क्रधराहित्यं भूषणमस्ति। निग्रहानुग्रहसमर्थस्य क्षमा भूषणमस्ति। अधर्मस्य अकैतवं विभूषणमस्ति। परन्तु सर्वेषां कारणम् सद्व्यवहारं तु सर्वेषां भूषणं चास्ति। स्वभाषया नीकारेण उक्तं यथा,

**ऐश्वर्यस्य बिभूषणं सुजनता शौर्यस्य वाक्संयमो,**
**ज्ञानस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्ययः।**
**अक्रोधस्तपसः क्षमा प्रभवितुः धर्मस्य निर्व्याजता**
**सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम्।।** (20)

तथा च धीराः सद्व्यवहारसम्पन्नाः जनाः स्तुतिनिन्दाहानिलभादिभिः अप्रभाविताः नाय्यं मार्गमेवानुसरन्ति इति नीतिकारः कथयति यथा, नयशास्त्रकुशलाः निन्दन्तु अथवा प्रशंसन्तु, लक्ष्मीः आगच्छतु गच्छतु वा इदानीमेव मृत्युः भवतु अन्यस्मिन् वा युगे भवतु, धीराः पुरुषाः न्यय्यात् मार्गात् एकपादविन्यासमात्रमपि न प्रविचलन्ति। नीतिकारस्य भाषया उक्तं यथा-

**निन्दन्तु नीतिनिपुणा यदि वा, स्तुवन्ति,**
**लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्,**
**अद्यैव वा मरणमस्तु युगान्तरे वा,**
**न्याय्यात्पथः प्रविचलन्तिपदं न धीराः।।** (21)

अस्मिन् संसारे यथा मनुष्याः सद्व्यवहरन्तु, दैवं प्रथमं भवति, अतः दैवस्य सर्वातिशायित्वं निदर्शयन् नीतिकारः वदति यत्, यस्य इन्द्रस्य उपदेष्टा देवगुरुः वृहस्पतिः भवति। प्रहारसाधनं वज्रं भवति। सैनिकाः देवाः भवन्ति। गुप्तिस्थानं स्वर्गः भवति। रक्षको देवाधिपतिः विष्णुः भवति। ऐरावतः गजः इत्थं ऐश्वर्यबलान्वितोऽपि इन्द्रो युद्धे अरिभिः पराजितः। अस्मात् कारणात् दैवमेव प्रधानम्। वलं तु न किंचित् व्यर्थभूतं पौरुषं धिक्कारम्। यथा नीतिकारस्य भाषया-

**नेता यस्य वृहस्पतिः प्रहरणं वज्रं सुराः सैनिकाः,**
**स्वर्गो दुर्गमनुग्रहः किल हरेरैरावतो वारणः।**
**इत्यैश्वर्यबलान्वितोऽपि बलभिद् भग्नः परैः सङ्गरे,**
**तद्युक्तं ननु दैवमेव शरणं धक्धग्वृथा पौरुषम्।।** (22)

अपि च दैवोपहतं मनुष्यं विपदोऽनुसरन्ति इति नीतिकारः निदर्शयन् वदति यत्, केशरहिताः पुरुषाः

सूर्यस्य रश्मिभिः शिरसि उत्तप्तः सन् छायायुक्तं प्रदेशं इच्छन् भाग्यात् तालवृक्षस्य अधो गतः। तत्र पतता तालस्य महता फलेन तस्य शिरः सशब्दं विदलितम्। प्रायशो भाग्यहीनाः नराः यत्र गच्छन्ति, तत्र विपत्तयोऽपि गच्छन्ति। यथा नीतिकारस्य भाषया-

**खल्वाटो दिवसेश्वरस्य किरणैः सन्ताडितो मस्तके,**
**वाञ्छन् देशमनातपं विधिवशात् तालस्य मूलं गतः।**
**तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः,**
**प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्त्यापदः।।** (23)

अस्मिन् संसारे मनुष्याः यदाचरन्तु यद्वा व्यवहरन्तु सर्वे कर्मणः अधीनाः वर्तन्ते। अतः बुद्धिमता विचारपूर्वकमेव कार्यं करणीयमिति नीतिकारः निर्दिशति यद्यपि मनुष्याणां सुखदुःखादिरूपं फलं कर्मणः अधीनं वर्तते तथा बुद्धिरपि कर्मानुगामिनी भवति। इत्थं सत्यपि सद्व्यवहारसम्पन्नाः जनाः सुविचार्य एव कर्माणि करणीयानि। यथा नीतिकारस्य भाषया-

**कर्मायत्तं फलं पंसां बुद्धिः कर्मानुसारिणी।**
**तथापि सुधिया भाव्यं सुविचार्यैव कुर्वता।।**(24)

अपि च अस्मिन् संसारे मनुष्याः यद्वा कुर्वन्तु कर्म एव सर्वश्रेष्ठं वर्तते अतः नीतिकारः कर्मणः महत्त्वं प्रतिपादयन् वदति यत्, येन कर्मणा ब्रह्माण्डपात्रे कुम्भकारेण तुल्यः पितामहो ब्रह्मा सृष्टिकार्ये संयोजितः। येन कर्मणा जगदीश्वरः विष्णुः महत्कष्टमये दशावतारधारणे नियोजितः। येन कर्मणा कपालयुक्ते पाणिपात्रे भिक्षाटनं कारितः तथा येन कर्मणा भगवान् सूर्यदेवः गगने सततं भ्रमणकार्ये नियोजितः, अतः तस्मै सर्वसमर्थाय कर्मणे नमः। यथा नीतिकारस्य भाषया-

**ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डोदरे,**
**बिष्णुर्येन दशावतारगहने क्षिप्तोमहासङ्कटे ।**
**रुद्रो येन कपालपाणिपुटके भिक्षाटनं कारितः,**
**सूर्यो भ्राम्यति नित्यमेव गगने तस्मै नमः कर्मणे।।**(25)

अनेन प्रकारेण कवेः भतृहरेः नीतिशतके अज्ञ-पण्डित-मान-शौर्य-अर्थ-दुर्जन-सुजन-परोपकार-धैर्य-कर्म-दैवप्रभृतिषु विषयेषु व्यावहारिकदृष्टिषु विभिन्नासु दिक्षु विषयाः आलोचिताः वर्तन्ते। न्यायधर्मप्रतिष्ठा, आत्ममर्यादायाः सुरक्षा, शृङ्खलितस्य समाजस्य निर्माणमेव नीतिशतकरचनायाः मूलं लक्ष्यं वर्तते।

# पादटीकाः

1 नीतिशतकम्-श्लोकसंक्ष्या-13

2 श्रीमद्भगवद्गाता-श्लोकः-2/42

3 नीतिशतकम्-श्लोकः- 18

4 नीतिशतकम्-श्लोकः-21

5 नीतिशतकम्-श्लोकः-22

6 नीतिशतकम्-श्लोकः-39

7 वाल्मिकीरामायणम्-

8 नीतिशतकम्-श्लोकः-43

9 नीतिशतकम्-श्लोकः-50

10 नीतिशतकम्-श्लोकः-63

11 नीतिशतकम्-श्लोकः- 64

12 नीतिशतकम्-श्लोकः-65

13 नीतिशतकम्-श्लोकः-66

14 नीतिशतकम्-श्लोकः-71

15 नीतिशतकम्-श्लोकः-72

16 नीतिशतकम्-श्लोकः-73

17 नीतिशतकम्-श्लोकः-74

18 नीतिशतकम्-श्लोकः-75

19 नीतिशतकम्-श्लोकः-78

20 नीतिशतकम्-श्लोकः-83

21 नीतिशतकम्-श्लोकः-84

22 नीतिशतकम्-श्लोकः-84

23 नीतिशतकम्-श्लोकः-88

24 नीतिशतकम्-श्लोकः-89

25 नीतिशतकम्-श्लोकः-95

# नैषधीयचरिते सामुद्रिकशास्त्रीयसन्दर्भानामनुशीलनम्

**डॉ.ज्योतिप्रसाददाशः**
सहायकाचार्यः,
ज्योतिषविभागः,श्री सदाशिवपरिसरः, पुरी

अपारे काव्यसंसारे कविरेव प्रजापतिः। कवेः कर्मं काव्यमिति शास्त्रकाराः। संस्कृतसाहित्यवाङ्ग्याकाशे नैषधं विद्वदौषधमिति काचिदुक्ति प्रसिद्धा। श्रीहर्षेण प्रणीतं नैषधीयचरितम्। कथनमस्ति, उदिते नैषधे काव्ये क्व माघः, क्व च भारवी इति। संस्कृतसाहित्यजगति इदमुत्कृष्टतमं महाकाव्यमिति। अस्य महाकाव्यस्याध्ययनेन संस्कृतव्याकरणस्य, पुराणस्य, धर्मशास्त्रस्य, दर्शनशास्त्रस्य, ज्योतिषशास्त्रस्य, ज्योतिषशास्त्रान्तर्गतसामुद्रिकतत्त्वस्य, तन्त्रशास्त्रस्य च ज्ञानं भवितुमर्हति। सम्पूर्णभारतीयविद्यास्थानां प्रयोगेण शास्त्रोऽयं विद्वत्स्वादरभाक् भवति। भारतीयविद्यासु कालशास्त्रस्य महनीयता स्वतन्त्रा। स्व-निर्मिते नैषधीये काव्ये बहुषु स्थलेषु श्रीहर्षः ज्योतिषशास्त्रीय तत्त्वानां, पारिभाषिकशब्दानां च व्यवहारः कृतः। काव्ये साहित्यिकविषयाणां चर्चाः कवेः धर्मम्, परन्तु तस्मिन् काव्ये यदा अन्येषां विषयाणां विचार-विमर्शनं जायते तदा काव्यस्य सौन्दर्यं पाण्डित्यञ्चाभिवर्धते। अभिवर्धिते सौन्दर्ये अर्थगौरवं, पदलालित्यं पाठकानां विद्याविद्योतितान्तकरणा-नामानन्दाय भवतीति मे मतिः। तस्मात् कविषूत्कृष्टतमं स्थानं श्रीहर्षः प्राप्नोतीति। तेषां ज्योतिषशास्त्रीयं यच्चिन्तनं सर्वेषां गणकानां कृते प्रेरणोत्स इत्यत्र नास्ति काचित् विप्रतिपत्तिः। इदानीं नैषधीयचरिते ज्योतिषशास्त्रीयसामुद्रिकतत्त्वानां अनुशीलनं कुर्मः। आदौ तावत्- जानीमः ज्योतिषशास्त्रे फलादेशाय करस्य, कपालस्य, कोष्ठ्याश्च व्यवहारं कुर्वन्ति शास्त्रविदः। तामेवपरम्परामनुसरन् काव्येऽपि कवयः सरलतया नायकानां- नायिकानां च ज्योतिषशास्त्रीयं सामुद्रिकलक्षणानुगुणं वर्णनं कुर्वन्ति स्म। तत्र अङ्ग लक्षणम् प्राधान्यं भजते। कथमिति चेत् **"शरीराकारानुवर्तिनो हि गुणाः दोषाश्च भवन्ति।"**[1]

नैषधीयचरिते श्रीहर्षः नायक-नायिकानां सामुद्रिकलक्षणानां वर्णनमपि सुचारुतया कृतः। ग्रन्थकारः वदति यत्राकृतिस्तत्रगुणाः भवन्ति। ज्ञायते यत् श्रीहर्षोऽपि सामुद्रिकशास्त्रपारङ्गतः आसीदिति। तद्यथा-

**न तुलाविषये तवाकृतिर्न वचो वर्मनि ते सुशीलता।**
**त्वदुदाहरणाकृतौ गुणा इति सामुद्रिकसारमुद्रणा।।**[2]

**केशवर्णनम्-** सप्तमसर्गे विंशतितमे श्लोके एवमुक्तं यत्- दमयन्त्याः कीदृशं केशसौन्दर्यमिति। शिरसि केशाः सौन्दर्यस्य वर्धकाः। ततोऽग्रिमेश्लोके महाकविः वदति- दमयन्त्याः केशाः मयूरस्य कलापौ बर्हभारौ मिथो

विवादितः। समाधानाय ब्रह्माणं निकषा द्वौ गतवन्तौ किम् ? किं ब्रह्मा दमयन्त्याः केशपाशान् पुष्पैः पूजितम्? किं वा ब्रह्मा शिखेः पुच्छभारं दृष्ट्वा भर्छितम्? न तथा। इत्यत्र कवेः सादृश्यजन्या परिकल्पना। अपिच काव्ये सामुद्रिकशास्त्रस्य बहुषु स्थलेषु व्यवहारस्य निदर्शनं मिलति। तद्यथा-

**अस्याः कचानां शिखिनश्च किन्नुविधिं कलापौ विमतेरगाताम्।**
**तेनायमेभिः किमपूजि पुष्पैरभर्त्सि दत्वा स किमर्धचन्द्रम्।।**[3]

**भ्रुवर्णनम्-** दमयन्त्याः भ्रुवौ कथं दृश्येत? नाम मदनदहनात्परं तस्य पुष्पबाणं देवाधिदेवेन महादेवेन द्विखण्डितम्। तद्विखण्डितमाकारं स्वीकृत्य किं ब्रह्मा तस्याः भ्रूल्लतयोः निर्माणं कृतम् ? तद्विचारः ग्रन्थकारेण एवम प्रतिपादितम्-

**पुष्पं धनुः किं मदनस्य दाहे श्यामीभवेत्केशरशेषमासीत्।**
**व्यधाद् द्विधेशस्तदपि क्रुधा किं भैमीभ्रुवौ येन विधिर्व्यधत।।**[4]

**दन्तलक्षणम्-** श्रीहर्षः दन्तसंख्यानां उल्लेखः कृतः। दन्तानां आधारेण व्यक्तेः व्यक्तितत्वस्य निरूपणं भवति। राजा नलस्य दंतपंक्तौ द्वात्रिंशत् दन्ताः आसन्। तत् संकेतं कृत्वा महाकविः वदति नलस्य मुखे स्वतन्त्रेण चतुर्दशस्तथाऽष्टादशविद्यानां निवासः आसीत्। कथं ब्रह्मा एतादृशस्य सामुद्रिकलक्षणयुक्तस्य, स्वरुपस्य निर्माणं कृतमिति कवेः परिकल्पना। उक्तञ्च नैषधीये महाकाव्ये-

**रेखाभिरास्ये गणनादिवास्य द्वात्रिंशता दन्तमयीभिरन्तः।**
**चतुर्दशाष्टादश चात्र विद्या द्वेधापि सन्तीति शशंस वेधाः।।**[5]

इत्यत्र भारतीयज्योतिषशास्त्रं तदनु सामुद्रिकशास्त्रानुसारं दन्तवर्णनप्रसङ्गे उक्तमस्ति-

**द्वात्रिंशता नरपतिर्दशनैस्तैरेकविरहितैर्भोगी।**

**स्यात्त्रिंशतातनुधनोऽष्टाविंशत्या सुखी पुरुषः।।**[6]

यथा राजा नलस्य दन्तपंक्तिवर्णनं सामुद्रिकनियमानुसारं अस्ति, तथैव दमयन्त्या अपि श्लोकत्रयेण दन्तपंक्तिवर्णनम्। तद्यथा-

**चन्द्राधिकैतन्मुखचन्द्रिकाणां दरायतं तत्किरणाद्धनानाम्।**

**पुरः सरस्त्रस्तपृषद्द्वितीयं रदावलिद्वन्दतिबिन्दुवृन्दम्।।**[7]

**सेयं ममैतद्विरहार्तिमूर्च्छातमीविभातस्य विभाति संन्ध्या।**

**महेन्द्रकाष्ठागतरागकर्त्री द्विजैरमीभिः समुपास्यमाना।।**[8]

**राजौ द्विजानामिह राजदन्ताः संबिभ्रति श्रोत्रियविभ्रमं यत्।**

**उद्वेगरागादिमृजावदाताश्चत्वार एते तदवैमिमुक्ताः।।**[9]

अर्थात् भैम्याः दन्तपंक्तयः श्वेताः,समाः,दुग्धकान्तियुक्ताः, द्वात्रिंशत्संख्यकाःआसन्। सा नारी सुभगा, यस्याः उपर्युक्त नियमानुरुपं दन्तपंक्तयः स्युरिति। अस्मिन् प्रसङ्गे भावकुतूहले प्रदत्तःकश्चन श्लोकःयथा-

**उपर्यधः समा दन्ताः स्तोकरूपाः पयोरुचः।**
**द्वात्रिंशदास्यगा यस्याः सा सदा सुभगा भवेत्।।**[10]

केन लक्षणेन लक्षितः मनुष्यः राजा भवति तस्य साहित्यिकवर्णनं महाकविना कृतमिति। कीदृशः सामुद्रिकलक्षणयुक्तः जनः राजयोगसम्पन्नः, कदाचिदपि नरपतिपदमलंकरोति तल्लक्षणं सामुद्रिकशास्त्रानुसारं यथा-

**द्वात्रिंशता नरपतिर्दशनैस्तैरेकविरहितैर्भोगी।**
**स्यात् त्रिंशतातनुधनोऽष्टाविंशत्या सुखी पुरुषः।।**[11]

**कर्णलक्षणम्-** महाकविःश्रीहर्षः भैम्याः सौन्दर्यमभिवर्णयन् तस्याः कर्णयोः विशालतां सौन्दर्यतां च रति-कामदेवं समर्प्य अपूपशब्दस्य प्रयोगं करोति। अनेन विशालकायकर्णस्यबोधो भवति। एतदतिरिच्य दमयन्त्याः कर्णयुगलं आवर्ताकारमासीत्। तत्र कर्णकुण्डलत्वेन नव-नवसंख्यकानां आकल्याष्टादश विद्यानां धारणं सा कृतवतीति कवि उत्प्रेक्षया वदति। उक्तञ्च-

**अस्या यदष्टादश संविभज्य विद्याः श्रुति दध्रतुरर्धमर्धम्।**
**कर्णान्तरुत्कीर्णगभीररेखः किं तस्य संख्यैव नवा नवाङ्कः।।**[12]

सामुद्रिकशास्त्रानुसारं यस्याः स्त्रियाः कर्णद्वयं लम्वितं,विस्तृतं,आवर्तकं दृश्यते चेत् सा नारी प्रथमे स्वपत्याः विच्छेदकारणात् कष्टं, ततः पुनः विच्छेदितपतिस्वीकरणजन्यमानन्दमनुभवति। उक्तञ्च-

**लम्बा विपुला कर्णद्वितयी मिलिता शुभा युतावर्त्तैः।**
**दोलायुगलाविरतिप्रीतिं दम्पतिकृते युगपत्।।**[13]

**कण्ठलक्षणम्-** सामुद्रिकशास्त्रे कण्ठस्य स्वरूपं बहुविस्तारेण वर्णितं विद्यते। त्रिरेखया,आबलिभिः वा आवृतः कण्ठः शरीरस्य सुखाय, सौन्दर्यता निमित्तं च भवति। इत्यत्र नैषधकारःस्व महाकाव्ये दमयन्त्याःकण्ठसौन्दर्यं सामुद्रिकनियमानुरुपं वर्णयति। तद्यथा- स्वयं धाता दमयन्त्याःकण्ठे कवित्वस्य, गायनस्य, प्रियभाषणस्य दक्षतां प्रदत्तवान्। उच्यते-

**कण्ठः किमस्याः पिकवेणुवीणास्तिस्रो जिताःसूचयति त्रिरेखः।**

**इत्यन्तरस्तूयत यत्र काऽपि नलेन बाला कलमालपन्ती।।**[14]

**मांसालो वर्तुलः कण्ठःप्रशस्तश्चतुरङ्गुलः।**

**शस्ता ग्रीवा त्रिरेखाङ्का त्वव्यक्तास्थिः सुसंहता।।**[15]

सामुद्रिकशास्त्रकाराः वदन्ति यत् – गोलीयः , मांसालः , चतुरङ्गुलात्मिका , त्रिरेखयासम्बलिता, अव्यक्त- अस्थियुक्तः कण्ठः मनुष्यः सर्वश्रेष्ठःभवति।

**पादतल वर्णनम्-** सामुद्रिकशास्त्रानुसारं करतले यथा रेखाः भवन्ति तथैव पादतलेऽपि । महाकविश्रीहर्षः राजानलस्य पादतले विद्यमाना ऊर्ध्वरेखायाः वर्णनं कुर्वन् वदति-

राजानलस्य पादतले विविधाः रेखाः स्निग्धाः, कोमलाः, गभीराः आसन् । इत्यत्र कवि चिन्तयति यस्य पादतले ऊर्ध्वरेखा परिदृश्यमाना भवति, सः मनुष्यः सर्वोत्कर्षं प्राप्नोति स्व जीवने । उक्तञ्च नैषधीये-

**अधोविधानात्कमलप्रवालयोः शिरःसु दानादखिलक्ष्माभुजाम्।**

**पुरोदमूर्ध्वं भवतीति वेधसा पदं किमस्याङ्कितमूर्ध्वरेखया।।**[16]

ज्येतिषशास्त्रस्य सामुद्रिक विधायं पादौर्ध्वरेखा विषये वर्णितं यत् कोमलपादतल युक्तः मनुष्यः राजाभवति । तद् यथा-

**पादचरस्यापि चरणतलं यस्य कोमलं तत्र।**
**पूर्णस्फुटोर्ध्वरेखा स भवेद् विश्वम्भराधीशः।।**[17]

**विविध शुभसूचकचिह्नानां वर्णनम्-** नैषधीयकाव्ये कविः श्रीहर्षः सामुद्रिकशास्त्राभिमतशुभचिह्नानां वर्णनं कृतम् । मनुष्यस्य सौन्दर्यमभिवर्णयन् वदति यत्- आकार्णस्पर्शिनी दृष्टिः, तद्रूपवाणः, तदनु हस्ते विद्यमानं चक्राकारं धनुषं सुशोभितं कामदेवरूपीनलः वधुदमयन्तीं पीडयति । उच्यते नैषधीये-

**दृशा नलस्य श्रुतिचुम्बनेषुणा,करेऽपि चक्रच्छलनम्रकार्मुकः।**
**स्मरः पराङ्गैरनुकल्प्य धन्विनाम्, जनीमनङ्गःस्वयमार्दयततः।।**[18]

सामुद्रिकनियमानुसारं हस्ते चक्रस्य चिह्नं भवति चेत् मनुष्यः राजपदं प्राप्नोति उक्तञ्च सामुद्रिकरहस्ये-

**पटुत्वमेकचक्रे स्याद् द्विचक्रे चाऽतिसुन्दरः।**

**त्रिचक्रे तु विलासी स्याद्दरिद्रो वेदचक्रभृत्।।**[19]

**पञ्चचक्रे महाज्ञानी षट्सु पण्डितशौण्डकः।**

**सप्तसु शैलभोगी स्यादष्टसु स्याद् वराटकः।।**

**नवसु नृपतिश्चैव दशसु राजसेवकः।।**[20]

यस्य मनुष्यस्य कराङ्गुलिसु करतले वा चक्रचिह्नं भवेत्तदा सः मनुष्यः राजा, योगी वा भवति। दशाङ्गुलिसु सीपाकारे चिह्ने नरः दुःखितः दरिद्रो वा भवति। उच्यते सामुद्रिकरहस्य वचनम्- **नवसु योगयुक्ता तु दरिद्रा दशसु ध्रुवम्।।**[21] मनुष्यस्य करतले ध्वजचिह्नं , खड्गचिह्नं भवति चेत्, मनुष्यः सकल विद्यानां ज्ञाता , राजपूजितश्च भवति।

**उपसंहारः-**

भारतीयशास्त्रेषु सर्वत्र विविधशास्त्राणां समन्वयनं अस्तीति अनुमीयते। साहित्यशास्त्रे ज्योतिषशास्त्रीयं वर्णनं तथा ज्योतिषशास्त्रे यत्र कुत्रचित् साहित्यशास्त्रस्य चर्चाऽपि प्रसङ्गानुरूपं इङ्गितरूपेण मिलति। यदि शास्त्राध्ययनं गुरुमुखात् भवति चेत् शास्त्रान्तरसम्बन्धः प्रत्येकेषु विषयेषु अस्तीति ज्ञातुं शक्यते। इति।।

## पादटीकाः

1 बृहत्संहिता, साम्वत्सरसूत्राध्यायःसूत्र-1
2 नैषधीयचरिते- 2/51
3 नैषधीयचरिते -7/22
4 नैषधीयचरिते- 7/24
5 नैषधीयचरिते तृतीयसर्गे श्लो. सं. -35
6 सामुद्रिकशास्त्रम् , पृ सं. 33,श्लो.सं.-224
7 नैषधीयचरिते सप्तमसर्गे श्लो. सं. -44
8 नैषधीयचरिते सप्तमसर्गे श्लो. सं. -45
9 नैषधीयचरिते सप्तमसर्गे श्लो. सं. -46
10 भावकुतूहलम्, दशमोऽध्यायः,श्लो. सं.81
11 सामुद्रिकशास्त्रम्,पृ.सं.33 श्लो.सं.-224
12 नैषधीयचरिते सप्तमसर्गे श्लो. सं. - 63
13 सामुद्रिकशास्त्रम्,स्त्रीलक्षणम् , श्लो.सं.-177
14 नैषधीयचरिते षष्ठसर्गे श्लो. सं. - 59
15 ज्योतिषतत्त्वप्रकाश 5/322
16 नैषधीयचरिते प्रथमसर्गे श्लो. सं. – 18
17 सामुद्रिकशास्त्रम्,पृ-4 श्लोक सं.-28
18 नैषधीयचरिते द्वादशसर्गे श्लो. सं. – 109
19 सामुद्रिकरहस्ये उत्तरार्द्धे चक्ररेखाविचारे श्लो.सं. 4
20 सामुद्रिकरहस्ये उत्तरार्द्धे चक्ररेखाविचारे श्लो.सं. 5
21 सामुद्रिकरहस्ये उत्तरार्द्धे सीपफलवर्णने श्लो.पादार्द्धः. 9

# गरुडपुराणे कारकविभक्तिविमर्शः

**शुभलक्ष्मी आचार्यः**
अध्यापिका,संस्कृतविभागः
स्वामिविवेकानन्दस्मारकस्वयंशासितमहाविद्यालयः,
जगतसिंहपुरम्,ओडिशा

**शोधसारः**

समग्रे पुराणवाङ्मये केवलम् अग्निपुराणे गरुडपुराणे च व्याकरणविषयकचर्चा उपलभ्यते। गरुडपुराणे व्याकरणमधिकृत्य या चर्चा विहिता तत्र कारकविभक्तिप्रसङ्गः अन्तर्गताः। कारकविभक्तीनां कानिचित् उदाहरणानि प्रदत्तानि। तेषाम् उदाहरणानां पाणिनिसूत्रानुसारं परिशीलनम् एव अस्मिन् शोधपत्रे प्रस्तुतमस्ति।

**कूटशब्दाः** – अग्निपुराणम्, गरुडपुराणम्, अष्टाध्यायी, कारकविभक्ती, व्याकरणम् ।

**उपक्रमः**

गरुडपुराणे कारकविभक्तीनां केवलं उदाहरणानि प्रदत्तानि। तत्र किमपि सूत्रम् नास्ति। अन्यस्मिन् पक्षे तद्विषयकसूत्राणि तु पाणिनेः अष्टाध्याय्यामेव उपलभ्यन्ते। गरुडपुराणस्य तेषाम् उदाहरणानां विमर्शात्मकम् अध्ययनम् अत्र प्रस्तूयते।

कारकविभक्तिविषये गरुडपुराणे उक्तमस्ति –

**अथ व्याकरणं वक्ष्ये कात्यायन समासतः।**
**सिद्धशब्दविवेकाय बालव्युत्पत्तिहेतवे।।1।।**
**सुप्तिङन्तं पदं ख्यातं सुपः सप्त विभक्तयः।**
**स्वौजसः प्रथमा प्रोक्ता सा प्रातिपदिकात्मके।।2।।**
**सम्बोधने च लिङ्गादावुक्ते कर्मणि कर्त्तरि।**
**अर्थवत्प्रातिपदिकं धातुप्रत्ययवर्जितम्।।3।।**
**अमौशसा द्वितीया स्यात्तत्कर्म क्रियते च यत्।**
**द्वितीया कर्मणि प्रोक्ताऽन्तरान्तरेण संयुते।।4।।**
**टाभ्यांभिसस्तृतीया स्यात्करणे कर्त्तरीरिता।**
**येन क्रियते तत्करणं कर्त्ता यश्च करोति सः।।5।।**
**ङेभ्यांभ्यसश्चतुर्थी स्यात्सम्प्रदाने च कारके।**
**यस्मै दित्सा धारयते रोचते सम्प्रदानकम्।।6।।**
**पञ्चमी स्यान्ङसिभ्यांभ्यो ह्यपादाने च कारके।**
**यतोऽपैति समादत्तं अपादत्ते भयं यतः।।7।।**
**ङसोमामश्च षष्ठीं स्यात्स्वामिसम्बन्धमुख्यके।**
**ङ्योः सुपश्च सप्तमी स्यात् सा चाधिकरणे भवेत्।।8।।**

**आधारश्चाधिकरणो रक्षार्थानां प्रयोगतः।**
**ईप्सितञ्चानीप्सितं यत्तदपादानकं स्मृतम्।।9।।**
**पञ्चमी पर्य्यपाङ्योगे इतरर्त्तेऽन्यदिङ्मुखे।**
**एनयोगे द्वितीया स्यात्कर्मप्रवचनीयकैः।।10।।**
**वीप्सेत्थम्भाव चिह्नेऽभिर्भागे चैव परिप्रती।**
**अनुरेषु सहार्थे च हीनेऽनूपश्च कथ्यते।।11।।**
**द्वितीया च चतुर्थी स्याच्चेष्टायां गतिकर्मणि।**
**अप्राणे हि विभक्ती द्वे मन्यकर्मण्यनादरे।।12।।**
**नमः स्वस्ति स्वधा स्वाहालंवषडयोग ईरिता।**
**चतुर्थी चैव तादर्थ्ये तुमर्थाद्भाववाचिनः।।13।।**
**तृतीया सहयोगे स्यात्कुत्सितेऽङ्गे विशेषणे।**
**काले भावे सप्तमी स्यादेतैर्योगेऽपि षष्ठ्यपि।।14।।**
**स्वामीश्वराधिपतिभिः साक्षाद्दायादसूतकैः।**
**निर्द्धारणे द्वे विभक्ती षष्ठी हेतुप्रयोगके।।15।।**
**स्मृत्यर्थकर्मणि तथा करोतेः प्रतियत्नके।**
**हिंसार्थानां प्रयोगे च प्रतिकर्मणि कर्त्तरि।।16।।**
**न कर्त्तृकर्मणोः षष्ठी निष्ठयोः प्रतिपादिके।**
**द्विविधं प्रातिपादिकं नाम धातुस्तथैव च।।17।।**

संप्रति एषु श्लोकेषु स्थितानां व्याकरणविषयाणां चर्चा पाणिनिसूत्रानुसारम् अधः प्रदीयते।

| **गरुडपुराणे** | **पाणिनिव्याकरणे** |
|---|---|
| सुप्तिङन्तं पदं ख्यातम् | सुप्तिङन्तं पदम् (1.4.14) (1) |
| सुपः सप्त विभक्तयः | स्वौजसमौट्छष्टा - भ्याम्भिस्ङेभ्याम्भ्यस्ङसि - भ्यांभ्यस्ङसोसांङ्योस्सुप् (4.1.2) (2) |
| स्वौजसः प्रथमा प्रोक्ता | स्वौजसमौट्छष्टा - भ्याम्भिस्ङेभ्याम्भ्यस्ङसि - भ्यांभ्यस्ङसोसांङ्योस्सुप् (4.1.2) |
| सा प्रातिपदिकात्मके | सुपो धातुप्रातिपदिकयोः (2.4.71) (3) |

| | |
|---|---|
| सम्बोधने च | सम्बोधने च (2.3.47) (4) |
| लिङ्गादावुक्ते कर्मणि कर्त्तरि | प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा (2.3.46) (5) |
| अर्थवत्प्रातिपदिकं धातुप्रत्ययवर्जितम् | अर्थवदधातुरप्रत्ययः प्रातिपदिकम् (1.2.45) (6) |
| अमौशसा द्वितीया स्यात् | स्वौजसमौट्छष्टा - भ्याम्भिस्ङेभ्याम्भ्यस्ङसि - भ्यांभ्यस्ङसोसांङ्योस्सुप् (4.1.2) |
| कर्म क्रियते च यत् | कर्तुरीप्सिततमं कर्म (1.4.49) (7) |
| द्वितीया कर्मणि प्रोक्ता | कर्मणि द्वितीया (2.3.2) (8) |
| अन्तरान्तरेण संयुते | अन्तरान्तरेणयुक्ते (2.3.4) (9) |
| टाभ्यांभिसस्तृतीया स्यात् | स्वौजसमौट्छष्टा - भ्याम्भिस्ङेभ्याम्भ्यस्ङसि - भ्यांभ्यस्ङसोसांङ्योस्सुप् (4.1.2) |
| करणे कर्त्तरीरिता | कर्तृकरणयोस्तृतीया (2.3.18) (10) |
| येन क्रियते तत्करणं | साधकतमं करणम् (1.4.42) (11) |
| कर्त्ता यश्च करोति सः | स्वतन्त्रः कर्त्ता (1.4.54) (12) |
| ङेभ्यांभ्यसश्चतुर्थी स्यात् | स्वौजसमौट्छष्टा - भ्याम्भिस्ङेभ्याम्भ्यस्ङसि - भ्यांभ्यस्ङसोसांङ्योस्सुप् (4.1.2) |
| सम्प्रदाने च कारके | चतुर्थी सम्प्रदाने (2.3.13) (13) |
| यस्मै दित्सा धारयते | धारेरुत्तमर्णः (1.4.35) (14) |
| रोचते सम्प्रदानकम् | रुच्यर्थानां प्रीयमाणः (1.4.33) (15) |

| | |
|---|---|
| पञ्चमी स्यान्ङसिभ्यांभ्यो | स्वौजसमौट्छष्टा - भ्याम्भिस्ङेभ्याम्भ्यस्ङसि - भ्यांभ्यस्ङसोसांङ्योस्सुप् (4.1.2) |
| ह्यपादाने च कारके | अपादाने पञ्चमी (2.3.28) (16) |
| यतोऽपैति समादत्तं | ध्रुवमपायेऽपादानम् (1.4.24) (17) |
| अपादत्ते भयं यतः | भीत्रार्थानां भयहेतुः (1.4.25) (18) |
| ङसोमामश्च षष्ठीं स्यात् | स्वौजसमौट्छष्टा - भ्याम्भिस्ङेभ्याम्भ्यस्ङसि - भ्यांभ्यस्ङसोसांङ्योस्सुप् (4.1.2) |
| स्वामिसम्बन्धमुख्यके | षष्ठी शेषे (2.3.50) (19) |
| ङयोः सुपश्च सप्तमी स्यात् | स्वौजसमौट्छष्टा - भ्याम्भिस्ङेभ्याम्भ्यस्ङसि - भ्यांभ्यस्ङसोसांङ्योस्सुप् (4.1.2) |
| सा चाधिकरणे भवेत् | सप्तम्यधिकरणे च (2.3.36) (20) |
| आधारश्चाधिकरणो | आधारोऽधिकरणम् (1.4.45) (21) |
| रक्षार्थानां प्रयोगतः | भीत्रार्थानां भयहेतुः |
| ईप्सितञ्चानीप्सितं यत्तदपादानकं स्मृतम् | वारणार्थानामीप्सितः (1.4.27) (22) |
| पञ्चमी पर्य्यपाङ्योगे | पञ्चम्यपाङ्परिभिः (2.3.10) (23) |
| इतरर्त्तेऽन्यदिङ्मुखे | अन्यारादितरर्तेदिक्छब्दाञ्चूत्तरपदा - जाहियुक्ते (2.3.29) (24) |
| एनयोगे द्वितीया स्यात् | एनपा द्वितीया (2.3.31) (25) |
| कर्मप्रवचनीयकैः | कर्मप्रवचनीयाः (1.4.83) (26) |
| वीप्सेत्थम्भाव चिह्नेऽभिर्भागे चैव परिप्रती | लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः (1.4.90) (27) |
| अनुरेषु सहार्थे च | उपोऽधिके च (1.4.87) (28) |
| हीनेऽनूपश्च कथ्यते | हीने (1.4.86) (29) |
| द्वितीया च चतुर्थी स्याच्चेष्टायां गतिकर्मणि | गत्यर्थकर्मणि द्वितीयाचतुर्थौ चेष्टायामनध्वनि (2.3.12) (30) |

| | |
|---|---|
| अप्राणे हि विभक्ती द्वे मन्यकर्मण्यनादरे | मन्यकर्मण्यनादरे विभाषाऽप्राणिषु (2.3.17) (31) |
| नमः स्वस्ति स्वधा स्वाहालंवषडयोग ईरिता | नमः स्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च (2.3.16) (32) |
| चतुर्थी चैव तादर्थ्ये | परिक्रयणे संप्रदानमन्यतरस्याम् (1.4.44) सूत्रस्य प्रसङ्गे प्रदत्तेन<br>तादर्थ्ये चतुर्थी वाच्या (1458) (33) |
| तुमर्थाद्भाववाचिनः | तुमर्थाच्च भाववचनात् (2.3.15) (34) |
| तृतीया सहयोगे स्यात् | सहयुक्तेऽप्रधाने (2.3.19) (35) |
| कुत्सितेऽङ्गे विशेषणे | येनाङ्गविकारः (2.3.20) (36) |
| काले भावे सप्तमी स्यात् | यस्य च भावेन भावलक्षणम् (2.3.37) (37) |
| एतैर्योगेऽपि षष्ठ्यपि | कृत्वोऽर्थप्रयोगे कालेऽधिकरणे (2.3.64) (38) |
| स्वामीश्वराधिपतिभिः साक्षाद्दायादसूतकैः | स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च (2.3.39) (39) |
| निर्द्धारणे द्वे विभक्ती | यतश्च निर्धारणम् (2.3.41) (40) |
| षष्ठी हेतुप्रयोगके | षष्ठी हेतुप्रयोगे (2.3.26) (41) |
| स्मृत्यर्थकर्मणि तथा | अधिगर्थदयेशां कर्मणि (2.3.52) (42) |
| करोतेः प्रतियत्नके | कृञः प्रतियत्ने (2.3.53) (43) |
| हिंसार्थानां प्रयोगे च प्रतिकर्मणि कर्त्तरि | जासिनिप्रहणनाटक्राथपिषां हिंसायाम् (2.3.56) (44) |
| न कर्त्तृकर्मणोः षष्ठी निष्ठयोः प्रतिपादिके | न लोकाव्ययनिष्ठाखलर्थतृनाम् (2.3.69) (45) |
| द्विविधं प्रातिपादिकं नाम धातुस्तथैव च | अर्थवदधातुरप्रत्ययः प्रातिपदिकम्<br>कृतद्धितसमासाश्च (1.2.46) (46) |

**उपसंहारः**

कारकविभक्तिविषये गरुडपुराणे यत् किञ्चित् उक्तमस्ति तत् सर्वम् अष्टाध्यायी सम्मतम्। शोधपत्रेऽस्मिन् तदेव प्रतिपादितम्।

## पादटीकाः

1. अष्टाध्यायी,1.4.14
2. तत्रैव,4.1.2
3. तत्रैव,2.4.71
4. तत्रैव,2.3.47
5. तत्रैव,2.3.46
6. तत्रैव,1.2.45
7. तत्रैव,1.4.49
8. तत्रैव,2.3.2
9. तत्रैव,2.3.4
10. तत्रैव,2.3.18
11. तत्रैव,1.4.42
12. तत्रैव,1.4.54
13. तत्रैव,2.3.13
14. तत्रैव,1.4.35
15. तत्रैव,1.4.33
16. तत्रैव,2.3.28
17. तत्रैव,1.4.24
18. तत्रैव,1.4.25
19. तत्रैव,2.3.50
20. तत्रैव,2.3.36
21. तत्रैव,1.4.45
22. तत्रैव,1.4.27
23. तत्रैव,2.3.10
24. तत्रैव,2.3.29
25. तत्रैव,2.3.31
26. तत्रैव,1.4.83
27. तत्रैव,1.4.90
28. तत्रैव,1.4.87
29. तत्रैव,1.4.86
30. तत्रैव,2.3.12
31. तत्रैव,2.3.17
32. तत्रैव,2.3.16
33. तत्रैव,1.4.44,वार्त्तिक – 1458
34. तत्रैव,2.3.15
35. तत्रैव,2.3.19
36. तत्रैव,2.3.20
37. अष्टाध्यायी,2.3.37
38. तत्रैव,2.3.64
39. तत्रैव,2.3.39
40. तत्रैव,2.3.41
41. तत्रैव,2.3.26
42. तत्रैव,2.3.52
43. तत्रैव,2.3.53
44. तत्रैव,2.3.56
45. तत्रैव,2.3.69
46. तत्रैव,1.2.26

## सन्दर्भ-ग्रन्थाः

1. अष्टाध्यायी,(प्रथम,द्वितीय भागः), ईश्वरचन्द्र (सं), चौखम्बा संस्कृतप्रतिष्ठानः, दिल्ली, 2009 ।
2. गरुडपुराण एकम् अध्ययनम्, अवस्थी, अवधबिहारी लाल, चौखम्बा संस्कृतप्रतिष्ठानः, दिल्ली, 1995।
3. गरुडपुराणम्, भट्टाचार्य, रामशङ्कर, चौखम्बा संस्थान, वाराणसी,1998 ।
4. पुराणविमर्शः, उपाध्याय, बलदेव, चौखम्बा विद्याभवन, वाराणसी, 2009 ।
5. वैयाकरणस्द्धान्तकौमुदी, - व्याख्याकारः, पाण्डेय, गोपालदत्त, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2001 ।
6. वैयाकरणस्द्धान्तकौमुदी, - व्याख्याकारः, मिश्र, व्रजसुन्दरः, सत्यनारायण बुक् ष्टोर, कटक, 2023।

# गव्यूतिः इत्यत्र वलोपवारणविचारः

**Prof. G S V Dattatreya Murthy**

Department of Vyakarana,

Shri Jagannath Sanskrit University,

Shri Vihar, Puri

गवां यूतिः इति विग्रहे गो यूति इति स्थिते छन्दसि **गोर्यूतौ छन्दस्युपसंख्यानम्**[1] इति वार्तिकेन गोशब्दघटक ओकारस्य अवादेशे गव्यूतिः इति रूपम्। गव्यूतिः नाम गोप्रचारभूमिः। एवं लोकेपि अध्वपरिमाणे गम्यमाने **अध्वपरिमाणे च**[2] इति वार्तिकेन अवादेशे गव्यूतिः इति रूपम्।

**अत्र संशयः**

गव्+यूतिः इति स्थिते अन्तर्वर्तिनीं विभक्तिमाश्रित्य गव् इत्यस्य पदत्वात् अवर्णपूर्वकस्य पदान्तवकारस्य यूतिशब्दे परे यकाररूपहल्परत्वात् **हलि सर्वेषाम्**[3] इति सूत्रेण लोपः कुतो न। यदि हलि सर्वेषाम् इत्यत्र यकारमात्रमनुवर्तते न वकारः इत्युच्यते तदानीमपि यकाररूपाश्परकत्वात् **लोपश्शाकल्यस्य**[4] इति सूत्रेण वकारलोपे गयूतिः इति अनिष्टरूपापत्तिः खलु इति।

**समाधानम्**

**वान्तो यि प्रत्यये**[5] इत्यत्र वान्त इत्यत्र वकारात्, गोर्यूतौ छन्दस्युपसंख्यानम् इत्यत्र छकाराद्वा पूर्वभागे **लोपो व्योर्वलि**[6] इति लोपेन वकारः प्रश्लिष्यते। तेन श्रूयमाणवकारान्तादेशः स्यात्। वकारः न लुप्यते इति यवत् इति समाधानमुक्तं सिद्धान्तकौमुद्याम्[7]।

**अत्र दीक्षिताशयः**

वान्तो यि प्रत्यये इति सूत्रे वकारात्पूर्वतया पाणिनिमहर्षिणा अन्यः वकारः निर्दिष्टः व् वान्तः इति। स च वल्परकत्वात् लोपोव्योर्वलि इति सूत्रेण लुप्तः। तथापि वाक्यार्थवेलायां तं प्रश्लिष्य, सः वान्त इत्यस्य विशेषणं क्रियते। तदन्तविधौ वान्तः वान्तादेशः स्यात् इत्यर्थः सिध्यति। वान्तादेशे वान्तत्वाव्यभिचारात् वकारप्रश्लेषः व्यर्थः सन् सर्वदा श्रूयमाणवान्तादेशः स्यात् इति बोधयति। एतादृश वान्तत्वविशेषणः वान्तशब्दः गोर्यूतावित्यादि वार्तिके, अध्वपरिमाणे च इति वार्तिके चानुवर्तते। तथा च छन्दसि यूतिशब्दाव्यवहितपूर्वस्य गोशब्दस्य वान्तः वान्तादेशः स्यात् इत्यादिरीत्या वार्तिकार्थः सिध्यति। अतः गव्यूतिरित्यत्र वकारस्य लोपे कृते वकारप्रश्लेषः व्यर्थस्स्यादिति मत्वा लोपश्शाकल्यस्य इति सूत्रेण नात्र

वलोपः। लोपोव्यर्वलि इति सूत्रे वकारस्य भाष्ये प्रत्याख्यातत्वात् **व् वान्तः, व् छन्दसि** इति निर्देशे लोपोव्योर्वलि इति सूत्रेण लोपः न सम्भवति । अतः सूत्रे वार्तिके वकारप्रश्लेषः न युक्तः खलु इति नाशङ्कनीयम्। कुत इति चेत् तत्र वकारप्रत्याख्यानं लौकिकोदाहरणाभावमात्रतात्पर्यकमेव। छन्दसि आस्रेमाणम् जीरदानुः इत्यत्र वलोपार्थः लोपो व्योर्वति इत्यत्र वकारस्य आवश्यकत्वात्। **छन्दोवत्सूत्राणि भवन्ति** इति भाष्योक्त्या सूत्राणामपि छन्दस्त्वातिदेशात् वा वान्त इत्यादि सौत्रप्रयोगेषु वलोपः सुसाध एव। **अतो ल्रान्तस्य**[8] इत्यत्र लुप्तनिर्दिष्टः वकारः इति इको गुणवृद्धी इति सूत्रभाष्यप्रामाण्यात् लोपोव्योर्वलि इत्यत्र वलोपप्रत्याख्यानभाष्यस्य एकदेश्युक्तित्वस्य अवश्याङ्गीकार्यत्वाच्च। तस्मात् गव्यूतिः इत्यत्र वलोपवारणाय वान्तः इत्यत्र वकारात्, गौर्यूतौ इत्यत्र छकाराद्वा पूर्वभागे वकारप्रश्लेषः कर्तव्यः इति। यदि वान्तो यि प्रत्यये इत्यादि सूत्रोदाहरणभूतेषु गव्यम्, लाव्यम् इत्यादिषु प्रत्ययप्राग्वर्तिनः अपदत्वात् तत्र वलोपप्रसक्तिः नास्ति। अतस्तत्र वकारप्रश्लेषः व्यर्थः इति चिन्त्यते, तदा गोर्यूतौ इत्यादि वार्तिके छकारात्पूर्वं वकारः प्रश्लिष्यते। तेन गव्यूतिरिति इष्टसिद्धिः भवति।

### अत्र लघुशब्देन्दुशेखरकाराणामाशयः[9]

वान्तो यि प्रत्यये, गोर्यूतावित्यादि वार्तिके च वकारप्रश्लेषः न युक्तः, लोपोव्योर्वलि इति सूत्रे वकारस्य भाष्ये प्रत्याख्यातत्वेन तत्र वलोपस्य असम्भवात्। अतो ल्रान्तस्य इत्यत्र लुप्तनिर्दिष्टः वकारः इति इको गुणवृद्धी इति एकदेशिभाष्यम्, न तु वलोपप्रत्याख्यानभाष्यम्। अतः छन्दसि गव्यूतिशब्दे वलोपस्तु छन्दसि सर्वविधीनां व्यवस्थितविभाषामाश्रित्यैव वारणीयः। अध्वपरिमाणार्थके लौकिके गव्यूतिशब्दे वलोपप्रसक्तिः न भवति। तथाहि- सणत्वेन संज्ञायां गम्यमानायां पूर्पदस्थत्वात् रेफषकाररूपात् निमित्तात् परस्य नस्य णत्वं स्यात् इत्यर्थकेन **पूर्वपदात्संज्ञायामगः**[10] इति सूत्रेण रघुनाथादिशब्देषु संज्ञात्वभङ्गापत्या णत्वं यथा न भवति, तथा अध्वपरिमाणार्थकस्य गव्यूतिशब्दस्य संज्ञाशब्दत्वात् तत्र संज्ञात्वभङ्गापत्या लोपश्शाकल्यस्य इति वलोपः न भवति। एवं छान्दसे गव्यूतिशब्दे छन्दसि सर्विविधीनां वैकल्पिकत्वेन, लौकिके संज्ञात्वभङ्गापत्या च वलोपवारणे सिद्धे तदर्थं वान्तो यि प्रत्यये इत्यत्र वकारप्रश्लेषः नावश्यकः इति।

### अत्र केचित्

लोपो व्योर्वलि इति सूत्रे वकारप्रत्याख्यनभाष्यमेव एकदेश्युक्तिः। अतोल्रान्तस्य इत्यत्र लुप्तनिर्दिष्टः वकारः इति इको गुणवृद्धी इतिसूत्रभाष्यप्रामाण्यात्[11]। अत एव प्रौढमनोरमायां[12] न पदान्ते त्यादि सूत्रे पदान्तस्य स्थाने विधौ इत्यर्थे वृक्षव् इत्यत्र लोपोव्योर्वलि इति सूत्रेण वलोपः आपादितः दीक्षितेन। लण्सूत्रभाष्यप्रदीपे[13] वृक्षव् इत्यत्र क्विब्निमित्तकतया लोपो व्योर्वलि इति लोपप्रसङ्गः इत्युक्तं कैयटेन।

लोपश्शाकल्यस्य इत्यत्र अश् ग्रहणप्रयोजननिरूपणावसरे वृक्षव् करोति इत्यत्र विज्निमित्तकः वलोपः आशङ्कितः नागेशेन। अत एव-

**सुधे सुधेवारिवधात्सुराणां, सुकारणे लाघवतश्च रामः।**

**विशेषणे द्वे य इहादिकर्तुः, वदेदधीती स हि कैयटीये।।** इति अभियुक्तोक्तिः सङ्गच्छते।

अत्र सुधे इति सुपूर्वकात् धिवि प्रीणने इति धातोः इदित्वान्नुमि, अन्येभ्योपि दृश्यते इति सूत्रेण विचि, तस्य सर्वस्यापि लोपे, लोपो व्योर्वलि इति सूत्रेण विज्निमित्तकतया धि न् व् इत्यत्र वलोपे, सुधिन् इत्यत्र लघूपधगुणे सुधेन् इति जाते प्रातिपदिकत्वात् सुप्रत्यये, तस्य हल्ङ्यादिलोपे, नलोपे च कृते सुधे इति रूपं निष्पन्नम्। एवमेव सुपूर्वकात् कृवि हिंसाकरणयोः इति धातोः नुमि, विचि वलोपे सु कृन् इति जाते धातोः ऋकारस्य गुणे अरे इत्यादेशे सु कर् न् इति जाते प्रातिपदिकत्वात् सुप्रत्यये, तल्लपे, नलोपे सुकर् इति जाते रेफस्य विसर्गे सुकः इति रूपं भवति। अस्य रणे इत्यनेन सह सन्धौ सुकारणे इति भवति। सूक्ष्मदृष्ट्या परिशील्यमाने लोपो व्योर्वलि इत्यत्र वलोपः प्रत्याख्यायते तदा पूर्वोक्तसकलग्रन्थानां, सुधे इत्यादि प्रयोगाणाञ्च असाङ्गत्यं स्यात्।

किञ्च **च्छ्वोश्शूडनुनासिके च**[14] इति सूत्रभाष्य[15] विरोधश्च। तथाहि- तत्र सूत्रे विधेयः ऊठ् इत्येव किं स्वीक्रियते। ऊट् एव विधीयताम्। स च टित्वात् वस्य अद्यवयवः भवति। अङ्गत्वनिमित्ते अनुनासिकादौ प्रत्यये, क्वौ झलादौ प्रत्यये च परतः वकारस्य ऊट् आगमः स्यात् इति प्रकृतसूत्रार्थः भवति। अक्षदिव् इत्यत्र वकार्तपूर्वतया प्रकृतसूत्रेण ऊडागमे, क्विब्निमित्तकतया वलोपे यणादेशे अक्षद्यूः इति च सिध्यति। तत्किमर्थं ठित्वमादेशत्वञ्च स्वीकार्यम्। इत्यभिप्रायेण **ऊट् आदिः कस्मान्न भवति। आदिः टित् भवतीति प्राप्नोति। कस्य पुनरादिः, वकारस्य। अस्तु। वकारस्य का प्रसक्तिः। लोपो व्योर्वलि इति लोपो भविष्यति** इत्युक्तं भाष्ये। ततः ऊट् इति छित्वा तस्य आगमत्वस्वीकारे, तस्यैव ज्वरत्वरे त्याद्युत्तरसूत्रे अनुवर्तनात् तत्रान्त्यस्य, उपधायाश्च पूर्वतया द्वयोः ऊटोः प्रवृत्तौ ज्वार-ज्-ऊव्-ऊर् इत्यत्र वलोपासम्भवेन जूः तूः इत्यादि रूपाणि न सिध्यन्ति इत्यभिप्रायेण **नैवं शक्यं ज्वरत्वर....इति द्वौ ऊटौ स्याताम्। एवं तर्हि नैव टित्। कस्तर्हि ठित् इति च उक्तम्।** यदि लोपो व्योर्वलि इति सूत्रे वलोपः प्रत्याख्यातः तदा अक्षदि ऊव्- अक्षद्यूः इति सूत्रे वलोपासम्भवेन ऊठः आदेशत्वफलस्य च्छ्वोः इति सूत्रे एव सम्भवात् ज्वरत्वर ...इति सूत्रपर्यन्तमनुधाव्य तत्र ऊठः आदेशत्वकल्पनं भाष्यकारस्य असङ्गतं स्यात्। अपि च च्छ्वोरिति सूत्रे क्ङित् ग्रहणानुवृत्तौ दिव् धातोः यङ्लुङन्तात् लटि तिपि देदिव् ति इति स्थिते वलोपे देदेति, अननुवृत्तौ

देदिव् ति इति स्थिते वकारस्य ऊठि यणादेशे गुणे च कृते देद्योति इति रूपभेदः कैयटेन प्रदर्शितः। वकारप्रत्याख्याने तु देदेति इति कैयटोक्तिः असङ्गता स्यात्।

तस्मात् वलोपप्रत्याख्यानभाष्यम् एकदेश्युक्तिरेव तथा च वान्त इत्यादौ वकारप्रश्लेषे तस्य लोपे व्योरिति लोपः सुलभ एव। छन्दसि सर्वविधीनां वैकल्पिकत्वमाश्रित्य गव्यूतिरित्यत्र वलोपवारणन्तु अगतिकतिरेव। लोके अध्वपरिमाणार्थके गव्यूतिशब्दे संज्ञात्वभङ्गभिया वलोपः न भवतीत्यपि न समीचीनम्, पूर्वपदात्संज्ञायामगः इति सूत्रे अध्वपरिमाणे च इति वार्तिके लोपश्शाकल्यस्य इति सूत्रे वा संज्ञापदाभावात्। किञ्च सवकारेण अध्वपरिमाणे गम्यमाने वान्तादेशः इत्यर्थश्च न सिध्यति तद्वार्तिकस्य।

पूर्वपदात्संज्ञायामगः इत्यस्यापि सणत्वेन संज्ञायामित्यद्यर्थः न युक्तः। तथा सति विष्वक्सेनः इत्यत्रापि संज्ञात्वभङ्गापत्यैव णत्ववारणे सिद्धे तदर्थं सूत्रे अग इत्यस्य वैयर्थ्यापत्तेः। रघुनाथ इत्यत्र तु क्षुभ्नादित्वात् न तत्। एवञ्च पूर्वपदादित्यस्य साम्येन अध्वपरिमाणे च इति वार्तिकस्य सवकारेण अध्वपरिमाणे गम्ये वान्तादेशः इत्यर्थकथनमसङ्गतमेव। अतः लौके वेदे वा गव्यूतिरित्यत्र लोपवारणार्थं वान्त इत्यत्र वकारात्, गोर्यूतावित्यत्र छकाराद्वा पूर्वं वकारप्रश्लेषः आवश्यक एव इति केचित्।

## पूर्वोक्त केचिन्मतपरिशीलनम्

## पूर्वोक्तदोषाणां वरणञ्च

लोपो व्योर्वलि इति सूत्रभाष्ये[16] **अनारम्भो वा पुनर्वलोपस्य न्याय्यः। कथम् आस्रेमाणम्, जीरदानुः इति। आस्रेमाणम्, जीरदानुः इत् छान्दसत्वात् वर्णलोपात् सिद्धम्** इत्यादिना वलोपः प्रत्याख्यातः। तद्भाष्यस्य विना विरोधमेकदेस्युक्तित्वकल्पनमयुक्तम्। अतो ल्रान्तस्य इत्यत्र लुप्तनिर्दिष्टः वकारः इति इको गुणवृद्धी इति सूत्रभाष्यमेव एकदेश्युक्तिः। तथाहि-अलावीत् इत्यत्र अलू-इस्-ईत् इत्यवस्थायां परस्मैपदपरसिज्निमित्तकवृध्यपेक्षया सिज्मात्रनिमित्तकत्वेन अन्तरङ्गत्वाद्धातोः गुणे ओकारे, तस्य अवादेशे च अलव्-इस्-ईत् इति जाते इगन्ताङ्गत्वाभावात् सिचि वृद्धिः परस्मैपदेषु इति सूत्रेण वृद्धिः न प्राप्नोति। हलन्तलक्षणा च वृद्धिः नेटि इत्यनेन निषिद्धा। ततश्च इष्टरूपसिद्धिः न स्यादित्यभिप्राये एकदेशिना प्रकटिते **मा** भूदेवम्, ल्रान्तस्य इत्येवं भविष्यति। ल्रान्तस्य इत्युच्यते न चेदं ल्रान्तम्। ल्रान्तस्य इत्यत्र वकारोपि निर्दिश्यते। किं वकारो न श्रूयते। लुप्तनिर्दिष्टो वकारः इति परेण एकदेशिना उक्तम्। अर्थात् अतो ल्रान्तस्य इत्यस्य अतः समीपस्थाः ये वकारलकाररेफाः तदन्ताङ्गस्य अतः वृद्धिः स्यात् परस्मैपदपरे सिचि परे इत्यर्थः सिध्यति। अलव् इस् ईत् इत्यत्र वकारान्ताङ्गत्वात् अतो ल्रान्तस्य इति सूत्रेण वृद्धौ इष्टरूपं सिध्यतीति भावः। परन्तु अत्र सिचि वृद्धिः परस्मैपदेषु इति वृध्यपेक्षया गुणस्य अन्तरङ्गत्वेपि तस्याः वृद्धेः गुणापवादत्वमस्ति।

चि,लु,कृ इत्यादीगन्तधातुस्थले सर्वत्र गुणे नाप्राप्ते वृद्धेः विधीयमानत्वात्। वृद्धेः गुणापवादत्वादेव उत्तरभाष्ये न सिच्यन्तरङ्गमस्ति इत्युक्तम्।

एवं सर्वतः प्रबले अपवादत्वे वृद्धेः जाग्रति तदनास्थाय दुर्बलमन्तरङ्गत्वमादाय गुणप्रवृत्यङ्गीकारात् अतोल्लान्तस्य इत्यत्र लुप्तनिर्दिष्टो वकारः इति भाष्यस्य एकदेश्युक्तित्वमङ्गीकार्यमेव।प्रकरणान्तरस्थितेन अनेन एकदेशिभाष्येण लोपो व्योर्वलि इति सूत्रस्थस्य सिद्धान्तभूतस्य वकारप्रत्याख्यानभाष्यस्य एकदेश्यक्तित्वकल्पनमनुचितमेव। **न हि पदान्ताः परेणः सन्ति**[17] इति लण्सूत्रभाष्यप्रामाण्येन वृक्षव् प्रभृतीनामनभिधानस्य अवश्याङ्गीकार्यत्वात्, वृक्षव् इत्यत्र वलोपापादपराः अयुक्ता एवेति केचित्। लोपश्शाकल्यस्य इत्यत्र अश्पदप्रयोजनविचारे वृक्षव् करोति इत्यत्र विज्निमित्तकवलोपशङ्कासमाधानयोः प्राचीनमतानुसारित्वात् नागेशमतमेव समीचीनम्। पूर्वोक्ताभियुक्तप्रयोगस्य स हि कैयटीये इति वाक्यशेषात् कैयटानुरोधितया तद्विरोधः अकिञ्चित्करः। च्छवोरिति सूत्रभाष्यमपि वलोपप्रत्याख्यानभाष्यस्य न एकदेश्युक्तित्वसाधकम्। लोपो व्योर्वलि इति सूत्रे वग्रहणं कुर्वतः सूत्रकृतोपि मते ऊठः आदेशत्वफलप्रदर्शनाय ज्वरत्वर...इत्याद्युत्तरसूत्रपर्यन्तानुधावनं भाष्यकृता कृतमिति वक्तुं शक्यत्वेन तावता प्रत्याख्यानभाष्यस्य एकदेश्युक्तित्वकल्पनायाः अनौचित्यात्। **यकारवकारान्तानां च्छवोरिति ऊठ्भाविनां यङ्लक्नास्ति**[18] इति कैयटेन स्पष्टमुक्ततया लोपो व्योर्वलि इत्यत्र वग्रहणस्य देदेति इति फलमपि न सम्भवति। अतः लोपो व्यर्वलि इति सूत्रे वकारप्रत्याख्यानभाष्यं सिद्धान्त्युक्तिरेव। वान्त इत्यत्र वकारात् गोर्यूतौ इत्यत्र छकाराद्वा पूर्वं वकारस्य लोपासम्भवेन तत्र वकारप्रश्लेषः अनुचितः। अतः छान्दसे गव्यूतिशब्दे वलोपाभावः छान्दस्त्वादेव। छन्दस्त्वात् वलोपाभावसाधनमगतिकगतिः इति न भ्रमितव्यम्। छन्दसि दृष्टानां सुब्व्यत्यय-तिङ्व्यत्यय-वर्णव्यत्यय-लिङ्गव्यत्ययादीनां सर्वेषां गतिकल्पनार्थमेव **षष्ठीयुक्तः छन्दसि** इति सूत्रे वा इति योगं विभज्य तेन **सर्वे विधयः छन्दसि विकल्प्यन्ते** इति वचनस्य भाष्यकारेण साधितत्वात्।

एवं लौकिके अध्वपरिमाणार्थके गव्यूतिशब्देपि न वलोपप्रसङ्गः। एवं पूर्वपदात्संज्ञायमगः इत्यत्रापि पूर्वोक्तभाष्यप्रामाण्यात् पूर्वपदस्थान्निमित्तात् परस्य नस्य णत्वं स्यात् तद्धटितेन चेत् संज्ञा गम्यते इत्यर्थ एव वक्तव्यः। अणृगयनादिभ्यः इति सूत्रे ऋगयनशब्दे णत्वाभावनिपातनात् तत्र णत्ववारणार्थम् अग इथि नावश्यकमिति प्रत्याख्यातम्। तस्याप्ययमेवाशयः ऊह्यः यत् पूर्वपदात्संज्ञायामित्यस्य सणत्वेन संज्ञायां गम्यमानायामित्याद्यर्थ एव वक्तव्यः, तत्र स्वत एव णत्वे अप्राप्ते तद्वारणाय पुनः सूत्रे अग इति न वक्ताव्यम् इति। अतः अगः इत्यस्य वैयर्थ्यापत्या पूर्वोक्तरीत्या अर्थवर्णनमयुक्तमिति यत् तदेवायुक्तम्। किञ्च भृञोसंज्ञायाम् इति सूत्रभाष्यप्रामाण्येन पूर्वपदात्संज्ञायामगः इत्यस्य पूर्वोक्तार्थे निर्णीते, यथोत्तरं मुनीनां प्रामाण्येन अग इति सूत्रप्रयोगविरोधस्य अकिञ्चित्करत्वात्। अग इति पदं पूर्वोक्तार्थे

तात्पर्यग्राहकमित्यङ्गीकारे अदोषाच्च। एवमर्थकरणेन रघुनाथादिशब्देषु स्वत एव णत्वाप्राप्त्या इष्टसिद्धौ तदर्थं क्षुभ्नादित्वकल्पनस्य अयुक्तत्वाच्च। अतः पूर्वपदात्संज्ञायामगः इत्यत्रेव अध्वपरिमाणे च इति वार्तिकस्यापि सवकारेण अध्वपरिमाणे गम्ये इत्यद्यर्थस्यैव वक्तव्यतया, वकाररहितेन गव्यूतिशब्देन अध्वपरिमाणाप्रतीत्या तत्र न वलोपः इति सिद्धम्।

**निगमनम्**

- लोपो व्योर्वलि इति सूत्रे वकारप्रत्याख्यानभाष्यं सिद्धान्त्युक्तिरेव।
- अतः वान्त इत्यत्र वकारात्, गोर्यूतौ इत्यत्र छकाराद्वा पूर्वभागे वकारप्रश्लेषः अनुचितः, तस्य लोपासम्भवात्।
- छान्दसे गव्यूतिशब्दे सर्वे विधयः छन्दसि विकल्प्यन्ते इति नियमाल्लोपाभावः।
- अध्वपरिमाणार्थके गव्यूतिशब्दे तु संज्ञात्वभङ्गापत्या वलोपाभावः।

एवमेव छन्दसि गव्यूतिशब्दे अन्यार्थमावश्यकेन **सर्वे विधयः छन्दसि विकल्प्यन्ते** इति वचनेन, लौकिके गव्यूतिशब्दे संज्ञात्वभङ्गापत्या च वलोपवारणे सिद्धे तदर्थं सूत्रे वार्तिके वा वकारप्रश्लेषः अनावश्यकः इति शम् ।

## पादटीकाः

1 (वार्तिकम, सिद्धान्तकौमुदी,पृ-76)
2 (वार्तिकम, सिद्धान्तकौमुदी,पृ-76)
3 भोभगोअघोपूर्वस्य लघ्वलघूच्चारणस्य यकारस्य लोपः स्याद्यदलि सर्वेषां मतेन इति सूत्रार्थः। (8-3-22,अष्टाध्यायी)
4 अवर्णपूर्वयोः पदान्तयोर्यवयोर्वा लोपोशि परे इति सूत्रार्थः। (8-3-17,अष्टाध्यायी)
5 यकारादौ प्रत्यये परे ओदौतोरव् आव् एतौ स्तः इति सूत्रार्थः। (6-1-79, अष्टाध्यायी)
6 वकारयकारयोर्लोपः स्याद्वलि परे इति सूत्रार्थः। ( 6-1-66, अष्टाध्यायी)
7 बालमनोरमा-तत्वबोधनी सहिता सिद्धान्तकौमुदी, पृ-77
8 अतः समीपौ यौ ल्रौ तदन्तस्याङ्गस्यातो वृद्धिः स्यात्परस्मैपदपरे सिचि इति सूत्रार्थः।(7-2-2,अष्टाध्यायी)
9 गुरुप्रसादसहितः लघुशब्देन्दुशेखरः, पृ.संख्या-344
10 पूर्वपदस्थान्निमित्तात्परस्य नस्य णः स्यात्समज्ञायं न तु गकारव्ववधाने इति सूत्रार्थः।(8-4-3, अष्टाध्यायी)
11 इत्थं हि तत्रत्यं भाष्यम्- ल्रान्तस्य इत्युच्यते, नेदं ल्रान्तम्। ल्रान्तस्य इत्यत्र वकारोपि निर्दिश्यते। किं वकारो न श्रूयते। लुप्तनिर्दिष्टो वकारः इति। उद्योतपरिवृतप्रदीपप्रकाशितमहाभाष्यम्, पृ-196.
12 सटीकटिप्पणशब्दरत्नप्रौढमनोरमा,पृ-162,163.
13 उद्योतपरिवृतप्रदीपप्रकाशितमहाभाष्यम्, पृ-143.
14 सतुक्कस्य छस्य वस्य च क्रमच्छ ऊठ् एतावादेशौ स्तः अनुनासिके क्वौ झलादौ किङ्गिति च इति सूत्रार्थः।(6-4-19 अष्टाध्यायी)
15 उद्योतपरिवृतप्रदीपप्रकाशितमहाभाष्यम्,6-4-19, पृ-282-283.
16 उद्योतपरिवृतप्रदीपप्रकाशितमहाभाष्यम्,6-1-66,पृ-66.

 ISSN: 2320-2025

17 उद्योतपरिवृतप्रदीपप्रकाशितमहाभाष्यम्,पृ-141
18 उद्योतपरिवृतप्रदीपप्रकाशितमहाभाष्यम्,6-4-19, पृ-284.

## सन्दर्भ-ग्रन्थाः

1.वैयाकरणसिद्धान्तकौमुदी(बालमनोरमा-तत्वबोधिनीसहिता) प्रथमो भागः, मोतीलाल बनारसीदास.1982।

2. लघुशब्देन्दुशेखरः(गुरुप्रसादसहितः) आन्ध्रविश्वकलापरिषद्, विशाखपट्टणम्। 1970।

3. लघुशब्देन्दुशेखरः(चन्द्रकलासहितः) जयकृष्णदास-हरिदासगुप्तः, बनारस सिटी,1983।

4. महाभाष्यम्(उद्योतपरिवृतदीपप्रकाशितमहाभाष्यम्) चौखाम्बा संस्कृतप्रतिष्ठान, दिल्ली.1990।

5. काशिकावृत्तिः न्यासापरपर्यायकारिकाविवरणपक्किकया, पदमञ्जरीव्याख्यया च सहिता, प्राच्य भारत प्रकाशन, वारणासी,1965।

6. प्रौढमनोरमा(सटीकटिप्पणशब्दरत्नसहिता)जयकृष्णदास हरिदास गुप्तः, चौखाम्बा संस्कृत सिरीज् आफीस्, बनारस सिटी.1939।

 ISSN: 2320-2025

# संस्कृतभाषायाः अवक्षयस्य इतिवृत्तमादाय विरचितानां वङ्गीयरूपकाणां समीक्षणम्

**भास्कर-च्याटार्ज्जी**

शोधच्छात्रः, केन्द्रीयसंस्कृतविश्वविद्यालयः,

भोपालपरिसरः

**सारसंक्षेपः-**

जगति विद्यमानासु भाषासु सुप्राचीना सुसमृद्धा चेति संस्कृतभाषा विश्वविश्रुता सर्वजनसमादृता च देदीप्यते। स्रोतस्विनी यथा समीपस्थां सस्याटवीं परिवर्धयन्ती निर्मलताञ्च परिपोषयन्ती प्रवहति, संस्कृतिं संरक्षयन्ती देववाण्यपि देदीप्यते स्वमहिम्ना तथैव चिरम्। सृष्टिकालतः अद्यावधिः सगौरवम् अवस्थानम् अस्याः नित्यतायाः एव परिचायकम्। एषा परिशीलिता, परिमार्जिता, सुसंस्कृता, जाह्नवीतुल्या, देवैश्च समादृता, संस्कृतभाषा भारतीयभाषाणां जननीस्वरूपा। प्राचीनभारते एषा एव आसीत् लौकिकव्यवहारस्य तथा अध्ययनाध्यपनस्य एकमात्रभाषा। बहुकालं यावत् इयं परम्परा अत्र प्रचलिता आसीत्। अनन्तरं यदा आङ्गलजनाः भारतम् अधिकृतवन्तः तदा ते स्वकीयसंस्कृतेः प्रबलतया प्रचारं कृत्वा भारतीयसंस्कृतेः तथा संस्कृतभाषायाः अवक्षयं साधितवन्तः। क्रमशः भारतीयाः अपि कदाचित् तेषां मधुरवचनेन आकृष्टाः सन्तः कदाचिद्वा भयवशात् तेषां वचनेषु समादरं प्रदर्श्य स्वकीयां संस्कृतिं विस्मृत्य पाश्चात्यसंस्कृतिं समादृतवन्तः आसन्। फलतः संस्कृतभाषायाः व्यवहारे, अध्ययने, अस्तित्वे च महती हानिः आगता आसीत्। कोऽपि संस्कृतं पठितुम् आग्रहं न प्रकटयति स्म। संस्कृतपाठशालाः, गुरुकुलानि च पिहितानि अभवन्। संस्कृतभाषायाः एतादृशं शोचनीयम् इतिवृत्तमादाय बहवः कवयः स्वकाव्यानि व्यरचयन्। तेषु सिद्धेश्वरचट्टोपाध्यायस्य **ननाविताडनम्,** नित्यानन्दस्मृतितीर्थस्य **मातृहननम्, जननीश्राद्धवासरञ्चेति** अन्यतमम्। मदीयेऽस्मिन् शोधप्रबन्धे संस्कृतभाषायाः अवक्षयस्य पश्चात् विद्यमानस्य राजनैतिकवातावरणस्य अन्वेषणपुरस्सरं तदाधारितानाम् एतेषां रूपकाणां विषये विस्तरेण आलोचितमस्ति।

**कूटशब्दाः-** संस्कृतस्य अवक्षयः, राजनीतिः, ननाविताडनम्, मातृहननम्, जननीश्राद्धवासरः ।

**भूमिका-**

भारतवर्षे विद्यमानानां सर्वासामपि भाषाणां जननीस्वरूपा तावत् संस्कृतभाषा। ततः एव अन्यासां सर्वासामपि भाषाणाम् उद्भवः इति कृत्वा तां जननी इति कथ्यते। किञ्च देवाः अपि अनया एव भाषया भाषन्ते इति कृत्वा देवभाषा इत्यपि अस्याः नामान्तरम्। अथवा परिमार्जितया अनया संस्कृतभाषया भाषणेन देवत्वं प्राप्नुवन्ति साधारणाः इत्यर्थं देववाणी इति अस्याः अन्वर्थसंज्ञा। जन्मतः आरभ्य मृत्युपर्यन्तं सर्वविधसंस्काराणां पद्धतयः तथा तेषां मन्त्राः अस्यामेव भाषायां लिपिबद्धाः सन्ति इति तु सर्वजनविदितमेव। तथाहि खलु अस्माकं सर्वविधानुष्ठानेषु संस्कृतमन्त्राणामेव मधुरध्वनिः श्रूयते। भारतीयज्ञान-विज्ञानपरम्परायाः सर्वप्रचीनं सुसमृद्धं सर्वदेशप्रसिद्धं वेदशास्त्रमपि अनया एव भाषया विरचितम्। ततः एव कणां स्वीकृत्य अन्येषां शास्त्राणां समुद्भवः। एवमेव देहधारिणां दैहिकविकाशाय विश्वप्रसिद्धं योगशास्त्रं तथा आयुर्वेदशास्त्रं जनकल्याननिमग्नैः ऋषिभिः अनया एव भाषया विरचितम्। अद्यत्वे अपि देशस्य न्यायव्यवस्थायाः आधारस्वरूपा मनुसंहिता, याज्ञवल्क्यसंहिता प्रभृतयः संस्कृते एव सन्ति। मानवानां मनोरञ्जनार्थं सुप्रसिद्धं यत् नृत्यं, नाट्यं, थियेटर्, चलच्चित्रं भवन्ति तद्विरचनार्थं व्यवहृयमानं नाट्यशास्त्रं, साहित्यदर्पणः, अभिनयदर्पणः इत्यादयः ग्रन्थाः अपि अत्रैव विद्यन्ते। किं बहुना जगद्विख्यातं दर्शनशास्त्रं, विज्ञानशास्त्रं, गणितं, संगणकविज्ञानं, अन्तरिक्षविज्ञानम् इत्यादीनां सर्वविधशास्त्राणेव भाषा एषा सुविख्याता, सुसंस्कृता, मञ्जुला, रमणीया, हृद्या संस्कृतभाषा एव। एकदा संस्कृतभाषायाः पठन-पाठने भारतदेशः अग्रगण्यः आसीत्। असंख्या खलु आसन् संस्कृतशिक्षाश्रमाः आ वदरिकाश्रमात् आ च कन्याकुमार्याः कुत्रचित् पर्वतप्रान्तेषु क्वचिद् अरण्येषु कुत्रचिद्वा नदीतटेषु सञ्चाल्यमाना ऋषिभिराचार्यैश्च। अनन्तरं यदा आङ्ग्लशासकाः भारतम् अधिकृतवन्तः तदा ते स्वकीयसंस्कृतेः भाषायाश्च प्रभूतरूपेण प्रचारं कृतवन्तः। तदा आरभ्य संस्कृतभाषायाः महत्वं क्रमशः क्षीणं सञ्जातम्।

संस्कृतभाषायाः प्राधान्यं ह्रासयितुं तदानीन्तनसर्वकारः तथा संस्कृतपण्डिताः, आधिकारिकाः च सक्रियं योगदानं साधितवन्तः। अतः छात्राः जन्मतः एव वैदेशिकसंस्कारेषु समाच्छन्नाः भारतीयसंस्कृतिं विस्मृतवन्तः आसन्। एषा धारा अधुनापि प्रवर्तिता एव वर्तते। भारते या विश्वविश्रुता संस्कृतिः आसीत् साऽपि संस्कृतस्य विनाशेन सह क्रमशः विनष्टा सञ्जाता। विषयमिममादाय बहुभिः नाट्यकारैः विविधानि रूपकानि विरचितानि। संस्कृतसाहित्येऽपि एतादृशरूपकाणि सन्ति बहुनि। तेषु वङ्गीयकविना सिद्धेश्वरचट्टोपाध्यायेन विरचितं **ननाविताडनम्,** नित्यानन्दस्मृतितीर्थेन विरचितम् - मातृहननम्, जननीश्राद्धवासरञ्चेति अन्यतमम्। अधः एतेषां रूपकाणां विषये सविस्तरम् आलोच्यते -

**ननाविताडनम् इति रूपके संस्कृतभाषायाः अवक्षयस्य चित्रम्-**

सिद्धेश्वर-चट्टोपाध्यायेन विरचितम् उच्चकोटिकं रूपकं खलु इदं ननाविताडणम् इति। रूपकस्य प्रारम्भे एव क्रन्दनरतस्य सूत्रधारस्य मुखात् ज्ञायते यत् नना मृता। नना नाम जननी। किन्तु अत्र भारतीयसंस्कृतेः तथा भाषाणां जननीस्वरूपायाः संस्कृतभाषायाः ग्रहणं कृतं कविना। तथाहि ननायाः मृत्योः संवादं श्रुत्वैव कश्चन पण्डितः **- 'अह-ह-ह नना मृता – किं नु भविष्यति देशस्यास्य अह-ह-नना आसीत् सर्वेषाम् अह्-ह-ह जननीस्वरूपिणी-अद्य-सा-अह-ह'**[1] - एवमुक्त्वा स्वकीयं महत् दुःखं प्रकटीकृतवान्। वस्तुतः सुदीर्घकालयावत् एषा नना अस्वस्था आसीत्। यद्यपि सा न मृता किन्तु अवस्था मृतवत् एव आसीत्। केचन चिकित्सकाः तस्याः चिकित्सां कुर्वन्ति स्म। के खलु इमे चिकित्सकाः, कथं वा तैः चिकित्सा कृता इत्यस्य उत्तरं यच्छन् कश्चन शिक्षकः वदति – '**पृष्टः मया वैद्यराजः, योऽस्माकं गुरुः, सोऽसौ वसुकुम्भमहोदयः। तेन तु उक्तम्- नना पीड्यमाना वर्तते रोगेण, परं नास्ति जीवनाशङ्का। तस्य चिकित्सामाहात्म्येन अचिरेणैव कालेन सा**[2]**-**' इति। एवं एतस्य वचनस्य समाप्तेः समनन्तरमेव सूत्रधारः कथयति- **'मरिष्यति, निश्चितमेव मरिष्यति- अह-ह-, चिकित्सितैव मरिष्यति'**[3] इति।

अनन्तरं कश्चन युवकः भकुम्भनामधेयस्य कस्यचित् प्राच्य-पाश्चात्योभयदेशस्य प्राचीन-अर्वाचीनचिकित्साविज्ञाने अभिज्ञस्य नामोल्लेखं कृतवान्। तन्नये अयं खलु श्रेष्ठः चिकित्सकः, एतस्य चिकित्सायां नना निश्चयेन स्वस्था भविष्यति। प्रसङ्गात् एतयोः वैद्ययोः गुरोः स्वकुम्भस्यापि नाम आगतम्। एवं त्रयाणां चिकित्सकानां मिलितप्रयासेन ननायाः चिकित्सा भवतु इति तत्रोपस्थितानां जनानां निश्चयः।

अनन्तरं सूत्रधारः एकं ध्रुवागानम् आरब्धवान् यस्य आशयः आसीत् – ननानाम्नि एका महीयसी सर्वजनवन्द्या माता आस्ति। तस्याः पूरवी तथा उत्तरा इति द्वे कन्ये आस्ताम्। एवम् इमे तिस्रः यदा आनन्देन कालं यापयन्ति स्म तदा काचित् विदेशिनी कन्या अपि तत्र समागता आसीत्। एषा विदेशिनी रूपयोवनसम्पन्या सर्वजनमान्या च। एतस्याः रूपं दृष्ट्वा समेऽपि भारतीयाः विमुग्धाः आकृष्टाः च अभवन्। किन्तु विविधशास्त्रपारङ्गताऽपि एषा ननायाः पादप्रान्ते उपविश्य ज्ञानार्जने उत्सुका।

विदेशिन्या सह ननायाः, उत्तरायाः तथा पूर्वायाः सम्भाषणे स्पष्टं ज्ञायते यत् – विदेशिन्याः समादरः क्षिनप्रायः जातः, जनाः केवलं स्वप्रयोजनानुगुणं तस्याः उपयोगं कुर्वन्ति, अतः तस्याः निर्वासनं न केवलं वङ्गदेशात् अपितु समग्रजम्बुद्वीपादेव भविष्यतीति धिया सा भीता वर्तते। एतस्याः एतादृशं वचनमाकर्ण्य उत्तरा तां साम्रज्यवादिनी इति अभिहितवती, या खलु मधुरवचनैः ननां प्रतारयति। अतः इमे सर्वेऽपि मिलित्वा तां विदेशिनीं देशात् निर्गमयितुम् इच्छन्ति। वङ्गदेशाद् बहिः भारतस्य अन्यत्र कुत्रचिदपि तस्याः समादरः नास्ति। अपि च वैद्यराजसमीतेः त्रिसूत्रनीतिः अपि अस्ति यया तस्याः देशान्तरगमनं नितान्तम् अपेक्षितम्। उत्तरायाः वचनेषु तस्यापि ननायाः विताडने एव समुत्सुकता प्रकटिता भवति रूपकेऽस्मिन्। तथाहि ज्ञानरोहितायाः ननायाः कथं ज्ञानमागमिष्यति इति पूरव्याः प्रश्ने उत्तरा स्वगतभाषणेन – **'चिरमेव लुप्तसंज्ञा यथा स्यात् तदेव विधास्यते'**[4] इति उक्तवती।

अस्मिन्नवसरे ननायाः चिकित्सार्थं वैद्याः समागताः अभवन्। ते खलु वसुकुम्भः, भकुम्भः, स्वकुम्भः प्रमुखाः।

एतेषु भकुम्भः ननायाः रोगनिर्णयं कृत्वा उक्तवान् – **'नास्ति कोऽपि व्याधिः। मानसी पीडैव दौर्बल्यस्य कारणम्। शुश्रूषयैव संज्ञालाभो निश्चितः। तदनन्तरं बालकैः बालिकाभिश्च सह क्रीडन्ती हसन्ती लसन्ती ननादेवी स्वस्था भविष्यत्यचिरेणैव कालेन'**[5] **इति**। किन्तु बालकैः सह तस्याः अवस्थानस्य विरोधमेव कृतवन्तः सर्वे। तरुणाः तथा युवकाः तां कदाचित् कदाचित् व्यवहर्तुमर्हन्ति। किन्तु वृद्धजनानां सेवया सा द्रुतमारोग्यं लप्स्यते इति तेषां मतिः।

एवंरीत्या यदा एतेषां मध्ये वादविवादं चलति स्म तदा बहुकालं यावत् ननायाः ज्ञानं न आगच्छतीति दृष्ट्वा तस्याः परीक्षार्थं सर्वे समुद्यताः अभवन्। प्राणविहीनं शरीरं तदा शीतलं सञ्जातम्। नना मृता इति समुद्घोषितवन्तः तत्र समुपस्थिताः वैद्याः। अनन्तरं मृतायाः ननायाः स्मृतिरक्षायै कश्चन औषधिद्रव्येन तस्याः शरीरम् अविकृतं रक्षितुम् उपदिष्टवान्, कश्चन प्रत्नशालायां सुरक्षिततया स्थापयितुम् उपदिष्टवान् ननादेहम्। अन्यः कश्चन सर्वकारीय-अनुदानेन तन्नाम्ना एकं गवेषणागारं प्रतिष्ठापयितुं समुद्यतः अभवत्।

अन्ते सूत्रधारः पुनरपि एकेन ध्रुवागानेन समग्रस्य नाट्यवस्तुनः सारसंक्षेपं प्रकटितवान् कथं ननायाः विताडनं जातमिति। तदित्थम् –

**जम्बुद्वीपे रङ्गदेशे किं विचित्ररङ्गम्। ननादेवी पलायिता अहो दुर्भाग्यम्।**

**उत्तरायाः कौशलम्, वैद्यानां हि विधानम्, उपवीतसहायेन गले रज्जुप्रदानम्।।** [6] इति ।

एवं रूपेण कविना संस्कृतभाषायाः अपसारणस्य क्लेशकरं वातावरणं हास्यपरिहासच्छलेन सम्यकरूपेण प्रतिपादितम्। यद्यपि रूपकेऽस्मिन् हास्यरसः मुख्यतया विद्यते किन्तु व्यङ्गोक्तिद्वारेण समाजस्य पण्डितानाम् अभव्याचरणं जनसमक्षम् आनयनमेव कवेः प्रमुखम् उद्देश्यमासीत्।

**मातृहननम् इति रूपके संस्कृतस्य अवक्षयः -**

खलु श्रीमता नित्यानन्द-स्मृतितीर्थेन विरचितं पञ्चाङ्कसम्पूर्णम् एकं विद्रूपात्मकं नाटकम्। रूपकस्यास्य विरचनं १९८७-तमे खीष्टवर्षे अभवत्। ये खलु खलाः राष्ट्रनेतारः देशस्य तथा समाजस्य

समुन्नतये स्वजीवनं समर्पितवन्तः इति भाषन्ते तेषां कपटं चरित्रम् उन्मोचितवान् कविरत्र। एतेषां राजनेतॄणां नये कूपमण्डुकाः खलु इमे

संस्कृतपण्डिताः। वदन्ति च ते –

**जानन्ति नैते न किञ्चिदेव**

**विज्ञानशास्त्रन्त्विति हं तथैव।**

**भूगोलबोधो गणिते न बोधः,**

**चिकित्सने चैव न कश्चिदस्ति।।**[7] **इति।**

अर्थात् ये खलु स्वयमेव मूर्खाः ते एव विदग्धानां संस्कृतपण्डितानाम् अवमाननं कृत्वा विज्ञानं, चिकित्साशास्त्रं, भूगोलम् इत्यादिकम् एते न जानन्ति इति वदन्ति। पुनश्च एतेषामपि बहवः शिष्याः भवन्ति ये खलु एतान् संस्कृतपण्डितान् अन्धरूपेण अनुसरन्ति इत्युक्त्वा तेषां शिष्यानां विषयेऽपि परिहासं कुर्वन्ति। वस्तुतः भारतवर्षे तथा समग्रे विश्वे विद्यमानस्य सर्वविधज्ञानप्रपञ्चस्य मूले या ज्ञानसमृद्धा संस्कृतभाषा वर्तते तामेव न जानन्ति ते देशविरोधिनः वैदेशिकपदलोलुपाः राजनेतारः। तथा हि खलु संस्कृतस्य अभिवर्धये प्रयत्नरतानां संस्कृतपण्डितानां विरोधे इमे **'जानन्ति नैते न किञ्चिदेव'** इति वक्तुमुद्यताः भवन्ति। दुःखस्य अयमपि विषयः यत् एतेषां पृष्टे, एतेषाम् अनुसर्तारः भूयांसः साधारणमानवाः तिष्ठन्ति। यथा राजनेतारः वदन्ति एतेऽपि सर्वम् अविचार्य तथा शृण्वन्ति, पालयन्ति च। संस्कृतभाषा तस्मिन् समये देशस्य काचित् विशिष्टा भाषा आसीत्। बहवः मानवाः संस्कृतभाषया सम्भाषणं कुर्वन्ति स्म। ग्रामे ग्रामे संस्कृतचतुष्पाठ्यः आसन्। वैदिकज्ञानप्रपञ्चस्य परिरक्षणाय वद्धपरिकराः अवर्तन्त संस्कृतमातुः वीरपुत्राः। अतः समाजे किञ्चित् सुदृढं वातावरणमपि आसीत् संस्कृतस्य। एवं यथा बहवः संस्कृतपण्डिताः अपि आसन् तथैव एतस्य विरोधे अपि जनानाम् अभावः नासीत्। तथाहि खलु केचन् संस्कृतविरोधिनः राजनेतृभिः प्रचोदिताः संस्कृतं देशस्य समुन्नतये अपेक्षितं नास्ति इति कृत्वा विद्यालयस्य पाठ्यक्रमात् संस्कृतस्य उत्सारणे उद्धतं

योगदानम् असाधयन्। तदा आधीक्येन संस्कृतपठनं चतुष्पाठीषु एव भवन्ति स्म। अतः एते खलु धुरन्धराः चतुष्पाठीनां ध्वंसं साधयितुं तथा तेषां परिचालसमीतेः लोपं जनयितुमपि उद्यताः अभवन्।

एवं स्थितौ संस्कृतसेविसंगठनस्य मुख्यः किंकरः एतेषां विरोधे उद्यतः सन् अभाषत-

**विताड्यते जनन्यद्य स्वपुत्रैर्निजभूमितः।**

**दुःखं लज्जा च घृणा वा किमस्माद् भविता क्षितौ॥**[8] इति।

अर्थात् तन्नये पुत्राः स्वजननीमेव स्वदेशात् विताडयन्ति इति अस्मात् लज्जास्पदम् अन्यत् किमस्ति। अयं खलु किंकरः वारंवारं संस्कृतविरोधिनः प्रति कटाक्षवचनं निक्षिप्तवान्। यथा – येन मातृदुग्धेन लालिताः जाताः तां एव मातरं हन्तुम् उद्यतान् मानवान् कथं विश्वसितुं शक्यते इत्यादिः। अत्र नामकरणे यः मातृशब्दः विद्यते सः संस्कृतमातुः विषये एव विशिष्य प्रयुक्तः अस्ति। संस्कृतमातुः रक्षणाय कृतप्रयत्नानां देशसेवकानाम् आकुतिः सामाजिकानां हृदयं नितरां गलयित्वा नाटकस्यापि सार्थकतामसाधयत्॥

**जननीश्राद्धवासरम् इति रूपके संस्कृतभाषायाः अवक्षयस्य इतिवृत्तम्-**

कविः नित्यानन्दः स्मृतितीर्थः एकस्मिन्नेव वर्षे अर्थात् १९८७-तमे वर्षे संस्कृतभाषायाः अपसारणविषयमादाय द्वयोः रूपकयोः विरचनं कृतवान्। पूर्वं मातृहननमिति रूपके कथं संस्कृतविरोधिजनानाम् उपरि कटाक्षवचनं निक्षिप्तवान् इति आलोचितमेव। शतचेष्टया अपि संस्कृतस्य रक्षणं कर्तुम् अक्षमः कविः तदनन्तरं जननीश्राद्धवासरमिति रूपकम् अरचयत्। अर्थात् संस्कृतजननी इदानीं मृता सञ्जाता। चतुष्पाठ्यः ध्वस्ताः जाताः। ये खलु तत्र पण्डिताः आसन् तेषां कृते तदा वात्सरिक-अनुदानं सर्वकारपक्षतः दीयते स्म। वस्तुतः इदम् अनुदानं तेषाम् आन्दोलनात् दूरीकर्तुं तथा तेषां परितोषणाय एव। दरिद्राः पण्डिताः अनेनैव तुष्टाः भवन्ति स्म। आङ्गलशासकैः शिक्षिताः तदानीन्तनबुद्धिजीविनः बहवः एव संस्कृतस्य माहात्म्यम् अजानन्तः संस्कृतस्य विरोधं कृतवन्तः। तेषां नये आङ्ग्लभाषा एव देशस्य अभिवर्धये उपयोगिनी। संस्कृतभाषा मृतभाषा एवेति। अतः ते संस्कृतं पठितुं तथा तस्य प्रचारादिकं कर्तुं न इष्टवन्तः। अस्मिन् कालखण्डे सर्वत्रैव बहूनि आन्दोलनानि अभवन्। संस्कृतसेवकाः, संस्कृतच्छात्राः, पण्डिताः सर्वे

अपि मिलित्वा महाविद्यालय-विश्वविद्यालयादिषु आन्दोलनम्, अवरोधञ्च कृतवन्त। किन्तुः तेषां सर्वविधः प्रयत्नः व्यर्थः सञ्जातः तेषां संख्यालघुत्वात्। अपि च तेषां समीपे मधुरवचनं विहाय अन्दोलनस्य अपरं किमपि अस्त्रं नासीत्। अतः तेषां वचनमपि तदानीन्तनसर्वकारः न समादृतवान् आसीत्। क्रमशः संस्कृतभाषा मृता सञ्जाता।

मृत्योः परं पुत्रादयः प्रतिवर्षं मातुः आत्मनः शान्तये वात्सरिकश्राद्धस्य आयोजनं कुर्वन्ति। तस्मिन् ब्राह्मणानाम् आमन्त्रणं कृत्वा तेभ्यः भोजनं दक्षिणादिकञ्च यच्छन्ति। अयं खलु कश्चन अपरिहार्यः अङ्गः श्राद्धस्य। इमामेव परम्परामादाय प्रतीकात्मतया रूपकस्यास्य नामकरणं कृतवान् नाट्यकारः नित्यानन्दः। मातृहननम् इत्यत्र कविना संस्कृतमातुः हननं दर्शितं, तदनन्तरं संस्कृतपण्डितेभ्यः प्रतिवर्षम् अनुदानप्रदानं नाम तस्याः वात्सरिकश्राद्धकर्मणि ब्राह्मणेभ्यः दक्षिणाप्रदानमेव।

एतादृशस्थितौ अपि नाट्यकारः वारं वारं संस्कृतस्य रक्षायै पण्डितान् स्वयोगदानं प्रदातुं प्रार्थितवान्। तथा हि आशावादी अयं भरतवाक्ये संस्कृतजननीम् प्रार्थयत- वयं शक्तिहीनाः, तव रक्षणाय तावती शक्तिः अस्मासु नास्ति। तवैव सन्ततयः वयम्, अस्मभ्यं शक्तिं देहि, हृदयस्थं मोहान्धकारञ्च विनाशय - इति।

**उपसंहारः –**

देवभाषायाः प्रभावः एकदा देशे कथमासीत् तस्य प्रमाणस्वरूपः अस्ति अस्याः शास्त्रप्रपञ्चः। अन्येभ्यः सर्वविधसाहित्येभ्यः संस्कृतभाषया विरचितं साहित्यं सर्वोत्कृष्टं सुसमृद्धञ्च विद्यते। तथाहि अस्मादेव विषयवस्तु तथा रचनाकौशलमादाय इतरसाहित्यानां परिपुष्टिः जाता। एकदा देशस्य लोकभाषा अपि संस्कृतमेव आसीत्। किन्तु आङ्गलजनानामागमनात्परं ते आङ्गलभाषायाः तथा पाश्चात्यसंस्कृतेः प्रभूततया प्रचारं कृतवन्तः फलतः न केवलं साधारणमानवाः अपि तु पण्डिताः अपि तेषां प्रलोभनेन प्रलोभिताः सन्तः संस्कृतस्य प्रचारं विहाय आङ्गलभाषायाः प्रसारे एव आत्मानं नियोजितवन्तः। अयं खलु संस्कृतभाषायाः अवक्षयस्य मूलं कारणम्। तत्परं विविधाः भाषानीतयः अपि समागताः याः खलु संस्कृतस्य अपसारणे उत्कृष्टमवदानमस्थापयन्। एतस्य विरोधे बुद्धिजीविनः, संस्कृतप्रेमिणः तथा साहित्यिकाः

आन्दोलनं कृत्वा प्रबलतया प्रतिवादं कृतवन्तः। साहित्यिकाः स्वकीयसाहित्येषु अस्य विरोधं कृत्वा स्वलेखनीमुत्थापितवन्तः। अत्रापि उल्लिखितेषु रूपकेषु हास्यकौतुकच्छलेन संस्कृतभाषायाः अपसारणस्य गम्भीरम् इतिवृत्तं वर्णयन्तः कवयः सुतरां प्रशंसार्हाः सञ्जाताः।

## पादटीकाः

1 सिद्धेश्वरचट्टोपाध्यायः(वुडोदा), रीता-चट्टोपाध्याय, पृ. – ९
2 सिद्धेश्वरचट्टोपाध्यायः(वुडोदा), रीता-चट्टोपाध्याय, पृ. - ९
3 सिद्धेश्वरचट्टोपाध्यायः(वुडोदा), रीता-चट्टोपाध्याय, पृ. – ९
4 सिद्धेश्वरचट्टोपाध्यायः(वुडोदा), रीता-चट्टोपाध्याय, पृ. – २२
5 सिद्धेश्वरचट्टोपाध्यायः(वुडोदा), रीता-चट्टोपाध्याय, पृ. – २१
6 सिद्धेश्वरचट्टोपाध्यायः(वुडोदा), रीता-चट्टोपाध्याय, पृ. - २६
7 आधुनिकसंस्कृतसाहित्यम्, सम्पा- ऋता चट्टोपाध्यायः, पृष्ठा – १५७।
8 आधुनिकसंस्कृतसाहित्यम्, सम्पा- ऋता चट्टोपाध्यायः, पृष्ठा – १५७।

## सन्दर्भग्रन्थाः


१. चट्टोपाध्यायः, सिद्धेश्वरः। *नना-विताडनम्*। कलिकाता : संस्कृत-साहित्य-परिषत्, १९७४।

२. भरतः। *नाट्यशास्त्रम्*। नागर्, आर्, एस् (सम्पा.) दिल्ली : परिमल पब्लिकेशन, २००३।

३. विश्वनाथः। *साहित्यदर्पणः* (कुसुमप्रतिमाटीकोपेतः)। सिद्धान्तवागीशः, हरिदासः, कोलिकाताविश्वविद्यालयः, १८७५।

४. मम्मटः। *काव्यप्रकाशः*। पालः, विपदभञ्जनः, कोलकाता: संस्कृतपुस्तकभाण्डारः, १४२४ वङ्गाव्दः।

५. चट्टोपाध्यायः, ऋता। *सिद्धेश्वर चट्टोपाध्याय(वुडोदा) १९१८-१९९३*। कलकाता : संस्कृत-पुस्तक-भाण्डारः, २०१७।

६. सेनः शुभ्रजित्। *भारतवर्षे आधुनिकसंस्कृतसाहित्यम् : विहङ्गमदृष्ट्या परिशीलनम्*। कलकाता : संस्कृतपुस्तकभाण्डारः, २०१९।

७. त्रिपाठी, राधावल्लभः। *संस्कृत साहित्य का समग्र इतिहास*। दिल्ली : न्यू भारतीय बुक कारपोरेशन, २०२०।

८. मिश्रः, अभिराज-राजेन्द्रः। *संस्कृत का अर्वाचीन समीक्षात्मक काव्यशास्त्र*। वाराणसी : विश्वविद्यालय प्रकाशन, २०१०।

९. शर्मा मञ्जुलता। *आधुनिक संस्कृत काव्य की परिक्रमा*, नवदेहली : राष्ट्रियसंस्कृतसंस्थानम् , २०११।

# युधिष्ठिरविजयमहाकाव्ये कविवासुदेवस्य काव्यकृतिवैचित्र्यम्

**कल्पना नायक**
अनुसन्धात्री, संस्कृतविभागः
उत्कलविश्वविद्यालयः, वाणी विहार
भूवनेश्वर, ओडिशा

**उपक्रमः**

काव्यशास्त्रं रसात्मककलाकलापैः स्वयं सम्पूर्णं परिपूर्णं प्रतिभाति। वैदिककालादपि सुकुमारकाव्यकल्पना ऋषीणां मनभूमौ देदीप्यमाना आसीत्। संस्कृतसाहित्ये न केवलं रसाभिव्यक्तिरलंकारसंयोजनं लक्ष्यते। अपितु रसात्मकवाक्य[१]कदम्बैः रस[२]स्वरुपपरमेश्वरं लब्ध्वा मनुष्यः स्तव्धो भवति, मुगधः भवति, आत्मारामश्च भवति। अभिनवगुप्तः कथयति – "रसध्वनेरेव सर्वत्र मुख्य भूतम् आत्मतत्वम्"[३] । तत्र काव्यशास्त्रस्य मनोरमं प्रयोजनं मम्मटेनाऽपि समाम्नातम्।

**काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।**

**सद्यः परनिर्वृत्तये कान्तासम्मिततयोपदेशयुजे**[४]।।

**कूटशब्दाः**– काव्यम्, कवित्वम्, महाकाव्यम्, शब्दार्थौ, प्रतिभा ।

## १. कविवासुदेवस्य आत्मपरिचितिः

महाकविवासुदेवः स्वाश्रयदातृणां युधिष्ठिरविजयमहाकाव्ये कुलशेखरेति उक्तवान् । तथा च ग्रन्थान्तरद्वये 'राम' इति शासकः प्रदर्शितः यथा- "तस्य च वसुधामवतः काले कुलशेखरस्य वसुधामवतः"[५] । एतौ राजानौ नवमशतके विद्यमानौ आस्ताम् इति विचार्यते[६]। संस्कृतसाहित्ये कश्चित् विद्वान्कविः तथा संस्कृतसाहित्यजगति कुलशेखरनामधेयः कश्चित् कविः राजाऽपि संञ्जात[७]। महाकविवासुदेवस्य आश्रयदाता राजाकुलशेखरः कतिपयविद्वदभिः 'सुभद्राधनञ्जय' स्तथा 'तपतीसंवरण' नामकनाटकयोः लेखकोमन्यते । एष महाकविवासुदेवः केरलनिवासीति तस्मात् तस्य आश्रयदाता च केरलनिवासी इति मन्यते । तत्र वम्बइ नगरीप्रकाशमानाकाव्यमालायाः सम्पादकौ शिवदत-काशिनाथौ पर्यालोचयत–

कविवासुदेवः द्वादशशतकाभ्यान्तरे भवेदीति; परन्तु एतद्वचनं वक्ष्यमाणपंक्तितः लक्ष्यते – "अयंकुलशेखरो भवेत्, तर्हि युधिष्ठिरविजयकर्तुर्वासुदेवकवेरपि द्वादशखिस्ताब्दशतिका समयोऽवसीयते"[८]। तत्वतः महाकवेः वासुदेवस्य समयः नवमशताब्दीति विचार्यते[९]।

संस्कृतसाहित्ये काटीयगृह्यसुत्रस्य प्रणेता आचार्यपारस्करस्तथा तस्य पद्धतिकारः वासुदेवेति परिलक्ष्यते[१०]। तत्र वासुदेवकवेः गृह्यसंग्रहश्च उपलभ्यते[११]।

कर्पुरमञ्जरीग्रन्थस्य पञ्चमटीका वासुदेवद्वारा लिखिता इति दृश्यते[१२]। वासुदेवविजयकाव्यमपि कविवासुदेवेन प्रणीतमिति ऐतिहासिकग्रन्थात् प्रमाणीक्रियते[१३]। अनेन चतुर्दशशताब्द्यां कविना प्रायतः एकविंशतिकाव्यानि लिखितानि सन्ति[१४]। केरलप्रदेशे वासुदेवाख्यः कश्चितकविः गोविन्दचरितम्, संक्षिप्तभारतम्, संक्षिप्तरामायणम्, कल्याणनिर्णयादिकाव्यानि रचितानि सन्ति। कविवासुदेवस्य पितुर्नाम 'महर्षिः', मातुर्नाम 'गोपालिका' आसीत्। एतेषु कविषु महाकविवासुदेवः युधिष्ठिरविजयकाव्यस्य रचयिता इति मन्यते[१५]।

ड. कपिलदेवद्विवेदीमहोदयविरचित संस्कृतसाहित्य का समीक्षात्मक इतिहासेति पुस्तके समुद्घाटितं यत् युधिष्ठिरविजयमहाकाव्यस्य रचना १३२० तमे ख्रीस्ताब्दे वासुदेवेन सम्पादितेति मतम्, तन्मतम् प्रमाणवर्जितं प्रतिभाति। तत्र द्वीतियसमुल्लेखात् एतत् प्रतीयते यत् कुत्रचित् युधिष्ठिरविजयरचनाकालः नवमख्रीस्ताब्देति एतन्मतमपि निर्दुष्टं नास्ति। पुनश्च युधिष्ठिरविजयमहाकाव्यस्य रत्नकण्ठविरचितटीकायां यत् वासुदेवस्य स्थिति द्वादशशतकमिति उटंकितम्। एतदपि दोषशून्यं नास्ति। तस्य सिद्धान्ते प्रमाणान्तरं समाश्रित्य एतत् निश्चीयते यत् युधिष्ठिरविजयमहाकाव्यकर्तृवासुदेवस्य समयः दशमशतकाभ्यान्तरे इति निश्चीयते।

**२. कवेः जन्मस्थानम्–**

प्रख्यातयशसामग्रधौरेयाणां सुचेतसां कविप्रवराणां जन्मकर्मादिदिव्यता दिशिदिशि प्रद्योतते। तथा हि युधिष्ठिरविजयनिर्मातुः वासुदेवस्य कथागाथा सम्बन्धे जन्मस्थानस्य विवरणमपिरिहार्यत्वात् तदत्र समुपस्थाप्यते।

महाकविवासुदेवस्य जन्मवंशनिवन्धनं तथ्यं तत्र कविवासुदेवेन स्वयं युधिष्ठिरविजयग्रन्थारम्भे वक्ष्यमाणरित्या प्रत्यपादि –

**वेदानामध्यायी भारतगुरुरभवदाद्यनामध्यायी ।।**[१६]

**समजनि कश्चित्तस्य प्रवणः शिष्योऽनुवर्तकश्चित्तस्य ।**

**काव्यानामालोके पटुमनसो वासुदेवनामा लोके ।।**[१७]

तत्र कविप्रवरोऽयं वेदाध्यायी स्ववंशभूषण गुरोः भारतगुरोः महान् अनुचानः शिष्यः आसदिति तथा च परमेश्वरविष्णुं ध्यायं ध्यायं तस्य समयाः व्यतीता इति। एष भारतगुरु तदानिन्तनसमये सुप्रख्यातगुरुणामग्रगण्य आसीत्।

अनन्तरमपि भारतगुरोः वैदुष्यवर्णनव्याजेन कविः वर्णयति– एष भारतगुरुः ज्ञानगरिष्ठत्वात्,आचार्यश्रेष्ठत्वात्,कवित्वकलाकलापनिष्ठत्वात् सः सर्वेषां हृद्रिलये प्रेष्ठः वरिष्ठश्च । सः

भारतगुरुः शान्तस्वरुपः,समाहितः,निर्विक्तस्तथा सर्वजनकल्याणकर्ता अमङ्गलहर्ता तस्मात् सद्भिः विपश्चिद्भिः, समादरवद्भिः,श्रद्धावद्भिः, परमेश्वरत्वेन प्रपूज्यते इति। एवमपि सम्पदामधिष्ठात्री लक्ष्मी,विद्यावैभवविलासिनी सरस्वती अपि भारतगुरुं समाश्रित्य मोदतेतराम्।

तत्र युधिष्ठिरविजयमहाकाव्यस्य मङ्गलाचरणोपरान्तं कविना प्रकटितम्—

**अस्ति स गजराजगती राजवरो येन गतशुगजरा जगति ।**
**भीषणमधिकं कवयः स्तुवन्ति जन्यं यदीयमधिकङ्कवयः ।।**[१८]

**तरवो भूरिच्छायाः समानफलदायिनी च भूरिच्छायाः ।**

**सविनयशोभा जनता यद्राज्ये यस्य भुवि यशोभाजनता ।।**[१९]

अत्र कुलशेखरराजस्य गौरवगाथा वर्णिता— तत्कालिन राज्ञः कुलशेखरस्यवर्णनावैभवप्रसङ्गे कविः कथयति यदा कङ्कपक्षियुक्तभयप्रदयुद्धस्य वर्णनं यदा कवयः कुर्वन्ति, तदा गजराजवतां राज्ञामपि वर्णनं विदधति। परन्तु अत्र तेषां गजराजवतां नृपतीनां मध्ये अयं कुलशेखरः भूयान् पराक्रमी आसीत्। यस्मात् स्वसौर्यवीर्यतेजसा पृथिवीं शोक – सन्ताप – जरा – क्लेशरहितं चकार। यस्मात् प्रभाववतः कुलशेखरस्य राज्ये वृक्षाः घनच्छायासमन्विता आसन्। भूम्यपि राज्ञः कुलशेखरस्य निजेछया फलानि प्रयछन्ति स्म। सर्वे प्रजाः विनयावनताः सौम्याश्च अभूवन्। अतः राजाकुलशेखरः धीमान्, मतिमान्, कीर्त्तिमान् यशस्वी च अभूत्। एषः कुलशेखरः कवेः वासुदेवस्य आश्रयदाता पाता त्राता च आसीदिति। युधिष्ठिरविजयकारो वासुदेवस्य जन्मस्थानं केरलप्रदेशिति समीक्ष्यकैः समुदाहृतः।

संस्कृतसाहित्ये कालिदासवत् अस्य कवेः जीवनवृतान्तः कदाचिद् सन्दिग्धत्वमुपैति । तथापि वाचस्पति गैरुला कृत "संस्कृतसाहित्य का इतिहास" इति ग्रन्थे वर्णितं यत् चतुर्दशशतके जातः एकविंशतिकाव्यप्रणेता वासुदेवः मालावारवास्तव्य आसीदिति[२०]। यद्यपि केरलस्थ कश्चित् अन्यवासुदेवनामधेयः कविरासीत् येन गोविन्दचरितं,संदीपरामायणं प्रभृति काव्यानि रचितानि आचार्यवलदेवोपाध्यायेन सूचितम्[२१]।

मालबारपरंपरामनुसृत्य कविवासुदेवस्य जीवनचर्याव्यतीतत्वात् गुरुशिष्यैः पुराणशास्त्रश्रवणे रुचिः स्थाप्यते स्म। तस्मात् वाल्यवयसि अस्य नाम 'वसुः' कैश्चित् 'वथु' इति कथ्यते स्म[२२]। युधिष्ठिरविजयमहाकाव्यस्याध्ययने एतद् स्पष्टीयते यत् एतस्य निवासस्थली दक्षीणभारतस्थ त्रावनकोर-अन्तर्गत-विप्रसत्तमनामक स्थानमिति[२३]।

युधिष्ठिरविजयमहाकाव्यस्य टीकाकारराजानकरत्नकण्ठस्य किञ्चित् वृत्तान्तमत्र उच्यते— यत् धौमायनगोत्रस्थ प्राज्ञः राजानकश्रीकण्ठस्य पुत्रासीत्। एषः प्रसिद्धकविस्तथा अलंकारशास्त्रज्ञ आसीत्। अनेन कविप्रवरेण सर्गसमाप्तिटीकाप्रारम्भे तथा चतुर्थाश्वाससमाप्तेः परं यत् किञ्चित् लिखितं

तस्मादवधार्यते— अस्य राजानकरत्नकण्ठस्य समयः सप्तदशशतक इति। "शिष्यहिताभिधटीका तु राजानकशंकरकण्ठात्मजराजानकरत्नकण्ठेन गङ्गाधर- शिष्याध्यापनाय अवरङ्गशाहिभूपे पृथ्वीं शासति सति १५९३ शालिवाहनशके विरचिता"— सर्गसमाप्तिलेखः।

रामाङ्केषुशशाङ्कैः(१५९) प्रमिते वर्षे शकेन्द्राणाम्।

अवरङ्गशाहिभूपे शासति सति मेदिनीचक्रम्॥
धर्मात्मजविजयाख्ये सुगभीरे सन्निबन्धेऽस्मिन्।
टीका शिष्यहितैषा विधीयते रत्नकण्ठेन॥
वस्वक्षिसप्ताब्ज(१७२८) मिते वर्षे विक्रमभूभृतः।
कृतैषा रत्नकण्ठेन टीका शिष्यहिताभिधा॥
गङ्गाधरस्य पाठार्थं सुशिष्यस्योपयोगिनी।
टीकैषा विहिता तेन सज्जनानन्ददायिनी॥[२४]

युधिष्ठिरविजयमहाकाव्यस्य लेखकः महाकविवासुदेवः काश्मीरस्याधीवासीति काव्यमालायां विद्यते[२५]। अस्मिन् सन्दर्भे शिवदत्तकाशिनाथयोः एष वितर्कः यत्, काश्मीरं परित्यज्यान्यत्रास्य प्रचारः प्रसारः स्वल्पत्वात् काश्मीरिकराजानकरत्नकण्ठः व्याखानवलात् कवेस्तथा कवेराश्रयदात्तुः निवासस्थलं काश्मीरिति अनुमन्यते[२६]।

### ३. कवेः काव्यकृतयः

महाकविवासुदेवः सारस्वतसाधनक्षेत्रे भूयांसि कीर्त्तिं प्रलभ्य कविवरेषु

स्वस्य प्रचण्डं पाण्डित्यं प्रतनुते स्म। 'युधिष्ठिरविजयं', 'शौरिकथोदयम्',

'त्रिपुरदहनम्' प्रभृति कृतयः तेषां महत्वं महिमानं परिव्याप्नोति। 'नलोदय' इति रचनान्तरमपि महत्तरं काव्यकलासमन्वितं विद्यते। युधिष्ठिरविजयम्-अष्टाश्वासनिवन्धितं महाकाव्यम्। अस्य पद्यानि आर्यावृत्तरचितानि सन्ति। तत्कालीनप्रशासकः कुलशेखर इति दरीदृश्यते। महाकाव्येस्मिन् पाण्डुराजस्य शिकारात् आरभ्य युधिष्ठिरस्य युद्धोपरान्तं राज्याभिषेकं यावत् कथावस्तु वर्णितम्। अस्य ग्रन्थस्योपरि राजानकरत्नकण्ठविरचितटीकामतिरीच्य सोकनाथ-पुत्र सुदर्शन-सत्तनुरप्रभृतीनां टीकाः समुपलभ्यन्ते।

- **त्रिपुरदहनम्—**

त्रिपुरदहनम् इति काव्यं कवेः वासुदेवस्य अन्यतमा कृतिः। यत्र त्रयो आश्वासाः सन्ति,तथा यमकालंकारपूरितमिदं काव्यं ग्रन्थेऽस्मिन् त्रिपुरदहनस्य विषयः

यथा दहनस्य विषयः चर्चितः तथैव कवेः शिवानुरक्तिः भक्तिः विद्यते। अस्मिन् ग्रन्थे

आश्रयदातृभावेन रामाख्यस्य व्यक्तित्वस्य उल्लेखः दृश्यते। एष 'राम' एव कुलशेखर

इति।

- **शौरिकथोदयम्**—

वासुदेवविरचितः 'शौरिकथोदयकाव्यं' यमकालंकारपूरितं तथा भगवत्कृष्णकथा समुल्लसितम् अस्ति। ग्रन्थेऽस्मिन् हरिवंशकथामुपाश्रित्य भगवत्कृष्णस्य जन्मादारभ्य वाणासुरविजयपर्यन्तं वर्णनावैभवः समुपन्यस्त। अस्य ग्रन्थस्योपरि मुक्तिस्थलवास्तव्यस्य ईशानपुत्रस्य नीलकण्ठस्य टीका परिलक्ष्यते। त्रिपुरदहनकाव्ये शङ्करः कृतः पुरत्रयदहनस्य कथा वर्णिता। परन्तु अस्य ग्रन्थस्योपरि अपि टीका रचिता। यद्यपि टीकाकारेण स्वनामनैवगृहीतं, तथापि नित्वप्रियस्य पुत्र इति

तत्र रचनात्रयं यमककाव्यदृष्टान्तेति प्रतीयते।

"कीर्तिमदभ्रां तेन स्मरता भारतसुधामदभ्रान्तेन।

जगदुपहासाय मिता पार्थकथा कल्मषापहा सा यमिता॥"

"बबन्धुरेव बन्धुरे स्ववर्त्मनि स्थितिं जनाः।

पिनाकिनापि नाकिनाममोदि मोदकारिणा॥"

श्री.ए.एस. रामनाथ अय्यरमहोदयेन महाकविवासुदेवस्य रचनान्तरं 'नलोदय' इति कथयति। केचन विद्वांसः कालिदास इति विभावयन्ति मालावारस्य कस्यांश्चित्

पाण्डुलिप्यां काव्यत्रयं लब्धमिति तस्माद् अनुमीयते अय्यरमहोदयस्य मतमांशिकतया सत्यमिति। नलोदये चतुर्सर्गविशिष्टं लघुकाव्यम्। अत्र नलमहाराजस्य जीवनचरितमुपन्यस्तम्। अत्र कवेर्प्रमुखं लक्ष्यं भवति विविधछन्दोवद्धकाव्यकौशलस्य वर्णनम्। अस्य नलोदयोपरि प्रायतः विंशतिटीका उपलभ्यन्ते। रामद्वारा नलोदयोपरि रचिताटीकायां तत् नारायणपुत्ररविदेवस्य इति

सूच्यते, तथा हि –

"इति वृद्धव्यासात्मजमिश्ररामर्षिदाधीच्यविरचितायां रविदेवविरचितमहाका-

व्यनलोदयटीकायां यमकबोधिन्यां नलराज्यप्राप्तिर्नाम चतुर्थ आश्वासः[२७]।"

परन्तु विष्णुनामधेय अपरेण टीकाकारेण रविपुत्र वासुदेवं अस्य ग्रन्थस्य प्रणेतारं मनुते। तथा च—

इति नलोदये वासुदेवकृते चतुर्थः परिच्छेदः।

रवितनुभूयमितायाः कृतेर्गतिशब्दचित्रभूयमितायाः ।

जनहासायमितायाः धियश्च विवृता मयाधुना यमितायाः ॥

एवं रीत्या वासुदेवविरचितत्रिपुरदहने राजारामस्योल्लेखः दृश्यते । येन नलोदयप्रारम्भिकश्लोके रामस्यापि शासकत्वं समुल्लिखितम् ।

वासुदेवनाम्ना वासुदेवविजयम् काव्यमपि षड्सर्गविशिष्टं विद्यते । अत्र अन्तिमसर्गत्रयस्य नाम धातु काव्यमिति अस्मिन् वासुदेवविजयकाव्ये यमकस्य दर्शनं नास्ति । एतद् केनचिद् केरलकविना वासुदेवविजयनामकम् अपूर्णं महाकाव्यं लिखितमिति तस्य पूर्णता निमित्तं केरलनिवासिना खण्डत्रयं विधाय वासुदेवविजयकाव्यं लिखितवान् । तत्र वासुदेवकविसम्बन्धे मतं परिलक्ष्यते ।

**उपसंहारः**

"कवित्वं दुर्लभं लोके शक्तिस्तत्र सुदुर्लभा'' प्रभृति आप्तवचने शक्तिपूर्विका कवित्वकला नितरां सुप्रशस्या अनवद्या च । तत्र आलंकारिकै अलंकारशास्त्रस्य गौरवं शास्त्रकारैः सर्वथा महिमाविमण्डितं विधीयते । तद्रीत्या कविवासुदेवः रसालंकाराणां वैशिष्ट्यं प्रतिपादयन् स्वयं एकाग्रचेतसा समाहितमनसा विरचितेषु काव्येषु युधिष्ठिर-विजयमहाकाव्ये समुद्धृतेर्षु वहुविधालंकारेषु यमकालंकारमेव प्रमुखं कथयति । अतः मया लघु निबन्धेऽस्मिन् सारनिष्कर्षतया वासुदेवविरचितग्रन्थाधारेण यमकालंकारस्य प्रामुख्यत्वात् समुपन्यस्तम् । मया निवन्धेऽस्मिन् वासुदेवस्य कविसुलभकृतित्वं यथामतिः प्रतिपादितं विद्यते ।

## पादटीकाः

०१. वाक्यं रसात्मकं काव्यम् - सा.द. १/३

०२. रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति - तै.उप.-७

०३. अभिनवगुप्तस्य लोचन-टीका

४ काव्यप्रकाशः - मम्मटः -१/१४. यु . वि . पृष्ठा – १६

५. युधिष्ठिरविजयम् - १/६ ।

६. For the identification of kulsekhar and Rama, see A.S. RamnathAyyar, Nalodaya and its author (J. My, XIV,302—II)

७. Article by AS Ramnath Ayyar, Tr. Arch. J1. Vol.V.Pt.2.

८. Indian Antiquary Vol. VIP. 143 . ( 1877 )

९. A.S Ramnath Ayyar Naloday and its author (J My, XIV,302—II)

१०. संस्कृत साहित्य का इतिहास – वाचस्पति गैरोला, पृ०. १७५

११. संस्कृत साहित्य का इतिहास – वाचस्पति गैरोला, पृ०. १७४

१२. संस्कृत साहित्य का संक्षिप्त इतिहास – प० सीताराम जोशी, पृ० ३९६

१३. संस्कृत साहित्य का संक्षिप्त इतिहास – प० सीताराम जोशी, पृ० २

१४. संस्कृत साहित्य का इतिहास – वाचस्पति गैरोला, पृ०. ८६८

१५. History of classical Sanskrit Literature by M. Krishnamacharior and article on Rama katha = A Study by K.R. Pisharoti, Bull of or studies, V.I.V

१६. युधिष्ठिरविजयम् — १/६।

१७. यु.वि. — १/९।

१८. यु.वि. — १/४।

१९. यु.वि — १/५।

२० . संस्कृत साहित्य का इतिहास – वाचस्पति गैरोला, पृ०. ८६८२०. २१ संस्कृत साहित्य का इतिहास- आचार्य वलदेवोपाध्याय — पु०.३२३

२२. यु. वि. , हिन्दी टीका प्रस्तावना – पृ. सं. १३

२३. यु. वि. , प्रस्तावना पृ.सं - १३

२४. . यु. वि. – व्याख्या राजानक रत्नकण्ठः।

२५. काव्यमाला – वम्बई, संपादकः शिवदत्तः तथा काशिनाथः।

२६. काश्मीरमन्तरात्य काव्यस्य विरलप्रचारत्वेन काश्मीरिकावेवै तौ पार्थिवपण्डितौ भवेतम्। अत एवास्योपरि काश्मीरि का राजानक रत्नकण्ठ कृत व्याख्या समुपलब्धा— यु.वि.- व्याख्या राजानक रत्नकण्ठ।

२७. JBAS. Extra No. 1887, P. 337

## सन्दर्भग्रन्थाः

१. युधिष्ठिरविजयम् – चौखम्बा संस्कृत सिरिज आफिस, गोपाल मन्दिर लेन, पो ० आ ० चौखम्बा, पोस्ट वाक्स, वारणसी– १।

२. युधिष्ठिरविजयम् – राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः) ५६–५७, इन्स्टीट्यूशनल् एरिया, जनकपुरी, नवदेहली– ११००५८।

३. Yamaka Bhagavatam of Kaviratna–Purusottama Misra by Pratap Chandra Tripathy, Pratibha Prakashan, Delhi-110007

४. साहित्यदर्पणः – आचार्य शेषराजशर्मा रेग्मी, चौखम्बा कृष्णदास अकादमी, वाराणसी– २२१००१।

५. काव्यप्रकाशः(मम्मटः) – प ० दुर्गाप्रसाद, मोतीलालवनारसी दास, दिल्ली– १९८३

६. काव्यालंकारसूत्रं(वामन) – ड. वेचान झा, चौखम्बासंस्कृतसंस्थानं वारणसी।

७. ध्वन्यालोकः(आनन्दवर्धनः)– ड. रामसागरत्रीपाठी, मोतिलालवनारसी दास, वाराणसी, दिल्ली।

८. रसगङ्गाधरः(पण्डितराजजगन्नाथः) – वद्रीनाथ झा, चौखम्बाविद्याभवनं, वाराणसी-१९७८।

९. नाट्यशास्त्रं(भरतः) – रवीशङ्कर नागर, परिमलपव्लिकेशन् दिल्ली, १९८८।

१०. साहित्यदर्पणः(लक्ष्मीटिका) – कृष्णमोहन शास्त्री, चौखम्बा संस्कृत सिरिज्, वाराणसी– १९७६।

# वैदिकज्योतिर्विज्ञाने स्त्रीजातकसमीक्षणम्

**सत्यव्रत वेहेरा**

शोधच्छात्रः (संस्कृतविभागः)

महाराजा श्रीरामचन्द्रभञ्जदेओ

विश्वविद्यालयः ,वारिपदा,मयूरभञ्ज।

**शोधसारः -** दृश्यमाण - विश्वप्रपञ्चस्य आधारत्वेत्न पुरुष इव जगदम्बा – अंशसम्भूता नारीसृष्टिरपि संसारचक्रविधातुरीश्वरस्य अनवद्या, भव्या, दिव्यायते। सुस्थ - समाहित - सदाचारसम्पन्नजीवननिर्वहणाय नारीपुरुषयोः निमित्तकारणत्वं नितरां स्वीकार्यम्। अतः मानवजीवनयात्रायां पुंसामिव स्त्रीणामपि जातकसमीक्षणे किञ्चित् स्वतन्त्रवैशिष्ट्यं विद्यते यस्मात् मया प्रवन्धेऽस्मिन् वैदिकज्योतिर्विज्ञानेस्त्रीजातकसमीक्षामुपजीव्य कानिचित् विवरणानि समुपन्यस्तानि। वैदिकज्यतिर्विज्ञाने पराशरः, वराहः, जैमिनिप्रभृतीनां महर्षीणां सिद्धान्तमाधारीकृत्य मया द्वादशभावानामुपरि यथा दृष्टिपातः सन्निवेशितः तथैव लग्नादारभ्य भावाधिपतिग्रहाणां स्वतन्त्रतया आर्षसिद्धान्तदिशा फलविचारः प्रदर्शितः।

**कूटशब्दाः-** ज्योतिषम्, ग्रहाः, नक्षत्रम्, स्त्रीजातकम्, भावफलम्।

**उपक्रमः-** वृहत्पाराशरहोराशास्त्रे शिष्यमैत्रेय - गुरुपराशरयोः प्रश्नोत्तररूपमालोचनात्मकं स्त्रीजातकफलमत्र सम्यगुपनिवद्धं यथा-

> “श्रुतं भगवता प्रोक्तं पुंसां जातकजं फलम्।
>
> नारीणामथ कथं वेद्यमेतद् ब्रवीहि मे ।।”[1]

सन्दर्भेऽस्मिन् पराशरं प्रति मैत्रेय उवाच- भो भगवन्! पुरुषाणां जातकफलं मयि ज्ञातेऽपि स्त्रीणां जातकफलमहं जिज्ञासुरस्मि। तस्मात् कृपया मह्यं स्त्रीजातकफलाफलं वाचयतु इति। महर्षिपराशरेणापि मैत्रेयमहोदयस्य प्रश्नस्योत्तरं सोत्साहं प्रत्युच्यते। “भो वत्स्य! यथायोग्यप्रश्नमुररीकृत्य यदहं स्त्रीजातकफलाफलविषयकदम्बं वच्मि तत् श्रूयतामिति। तस्मात् पराशरप्रोक्ततथ्यनिचयेषु सारनिर्यासत्वेन स्त्रीणां लग्नफलम्, पञ्चमभावस्थ सन्तानविचारः, सप्तमभाववोधं दाम्पत्यसौख्यम्, अष्टमभावजन्यवैधव्यविचारप्रभृतयः प्रमुखाः विद्यन्ते ”।[2]

**स्त्रीजातक स्वरूपम्-**

स्त्रीजातकस्वरूपनिरूपणप्रसङ्गे वराहमिहिरेण वृहज्जातकग्रन्थे प्रोच्यते यथा-

**"यद्यत् फलं नरभवे क्षममङ्गनानां तत्तत् वदेत् पतिषु वा सकलं विधेयम्।**

**तासां तु भर्तृमरणं निधने वपुस्तु लग्नेन्दुगं सुभगतास्तमये पतिश्च।।"** [3]

ज्योतिषग्रन्थे पूर्वोक्तपुरुषजातकसम्बन्धे यानि फलानि निगदितानि तानि सर्वाण्यपि स्त्रीषु उपयुज्यन्ते। स्त्रियः भर्तुमरणं अष्टमभावात्, शरीरसम्बन्धीफलं लग्नभावात् चन्द्रमास्थितराशेः वा अपि च स्त्रीणां सौभाग्यविषयं सप्तमभावात् विचार्यते। स्त्रीणां स्वभावनिरूपणे वृहत्पाराशरहोराशास्त्रे विलिख्यते। यथा- "स्त्रीजातके लग्ने चन्द्रमसि वा समराशिगते नारी सुशीला, सुलक्षणा, स्त्रीस्वभावानुगुणा अपि च तत्रापि शुभग्रहदृष्टिसंयोगे स्वस्था, सौख्ययुक्ता भोगशीला च भवति। परन्तु लग्न चन्द्रमा च विषमराशौ विद्यमाने पापयुते पापदृष्टे सति स्त्री विनयादि- गुणविरहिता दुर्भाग्ययुक्ता भवति। शुभाशुभग्रहाणां युतिदृष्टिसम्बन्धे किञ्चित् शुभं किञ्चिदशुभमिति मिश्रफलं निगद्यते। तादृशैव लग्न-चन्द्रमसोः वा एके समराशिगते अन्ये विषमराशिसंस्थिते मिश्रफलं व्रूयात्। लग्नचन्द्रमसोः प्रवल्यानुरोधात् जातकोऽपरि तदनुरूपगुणानां समधिकप्रभावोऽवगम्यते।" 4 सन्दर्भेऽस्मिन् पाराशरीयवचन – वृहज्जातकयोः फलाफलविमर्शः प्रायतः समतामुपैति।

**"युग्मेषु लग्नशशिनोः प्रकृतिस्थिता स्त्रीसच्छीलभूषणयुता शुभदृष्टयोश्च।**

**ओजस्थयोस्तु पुरुषाकृतिशीलयुक्ता पापा च पापयुतवीक्षितयोर्गुणोना।।"** 5

षडोशवर्गकुण्डली, त्रिशांशकुण्डली, नवांशकुण्डल्याधारेणापि स्त्रीजातकफलोदय विधीयते। वृहत्पाराशरहोराशास्त्रे समुपस्थाप्यते। यथा-

**"प्रवलो योऽङ्गशशिनोस्तदधिष्ठितराशितः।**

**त्रिशांशतो वा विवुधैर्नारीणां फलमीरितम्।।"** [6]

एतदाशयः लग्नचन्द्रमसोः यः प्रवलः तस्य राशेः तदधिष्ठितराशेः त्रिशांशात् वा स्त्रीणां विशेषफलमादिशेत्।

**स्त्रीजातकफलाफलम्-** स्त्रीजातकफलाफलविचारचर्चायां वृहत्पाराशरे समुपनिवद्धं यथा - मेषस्थे वृश्चिकस्थे वा लग्ने चन्द्रमसि वलवति जाते तथा मङ्गलस्य त्रिशांशे विद्यमाने कन्यावस्थायां परपुरुषभोक्ता, शुक्रस्य त्रिशांशे स्थिते विवाहादनन्तरं दुश्चरित्रा, वुधत्रिशांशगते मायाविनी, शनित्रिशांशे दासी, वृहस्पतित्रिशांशे समागते सती भवति। अनयोः वलवान् यदि वुधराशौ यथा- कन्यामिथुनराशौ स्थित्वा मङ्गलत्रिशांशे विद्यते तर्हि कपटयुक्ता, शुक्रत्रिशांशाधिष्ठिते कामुकी, वुधत्रिशांशे सन्निवेशे गुणसम्पन्ना,

शनित्रिशांशसन्निविष्टे क्लीवता, वृहस्पतित्रिशांशे जाते साध्वी ”[7] इति निश्चीयते। एवञ्च वृहत्पाराशरे त्रिशांशाधारेण ग्रहाणां राश्यनुसारं फलवैविध्यं स्पष्टीकृतम् यथा –

**वृष-तुलयो**ः- एवञ्च “लग्नचन्द्रमसो वली शुक्रराश्याधिष्ठते मङ्गलनवांशगते दुश्चरित्रा, शुक्रत्रिशांशौ विख्यातगुणा, वुधत्रिशांशसंस्थिते सकलकलासु परिपूर्णा, देवगुरुत्रिशांशे सन्ति चेद् गुणवती, शनौ त्रिशांशे पुनर्भूः कन्या इत्यवगम्यते।

**कर्कटराशौ**- पुनः लग्नचन्द्रमसो वली कर्कराशौ मङ्गलत्रिशांशान्तर्गते नारी स्वतन्त्रा, शुक्रनवांशाधिष्ठिते कुलटा, वुधत्रिशांशसमायुक्ते शिल्पकलाप्रवीणा, गुरुत्रिशांशाधिगते सर्वगुणसम्पन्ना, सौरीत्रिशांशौ सति पतिघातिनीत्यववुध्यते।

**सिंहराशौ**– लग्नचन्द्रमस अधिके वलवति सिंहराशौ भौमत्रिशांशगते वक्रवादिनी, शुक्रत्रिशांशे विद्यमाने सती, बुधत्रिशांशे पुमाकृती, गुरौ त्रिशांशे राजनी, शनित्रिशांशे संस्थिते भ्रष्टा भवति।

**धनुमीनयो**ः– लग्नचन्द्रमसो वली धनुमीनयोरवस्थिते कुजत्रिशांशसमागते अतिगुणवती, शुक्रत्रिशांशे संस्थिते पुंश्चली, बुधत्रिशांशे सति विज्ञानवेत्री, वृहस्पतित्रिशांशे जाते गुणवती, शनित्रिशांशान्तर्गते स्वल्परतीप्सु विजानीयात्।

**मकरकुम्भयो**ः– लग्नचन्द्रमसो वली मकरकुम्भयो उषित्वा मङ्गलत्रिशांशसमधिष्ठिते चेटी, शुक्रत्रिशांशे तिष्ठति चेत् विदुषी, बुधत्रिशांशे अस्ति चेत् पापरता नीचसंगता च, देवगुरुत्रिशांशे सती, मन्दत्रिशांशे सा नीचपुरुषसंगता इति ज्ञायते। [8]

स्त्रीणां सौभाग्य निरूपणसन्दर्भे उत्कलीयज्योतिर्विदा पण्डितबाइकोलिमहापात्रमहोदयेन ज्योतिःसाररत्नावलीग्रन्थे व्याचक्षते यथा-

**“लग्नाद् विधोर्वा यदि जन्मकाले शुभगर्हो वा मदनाधिपो वा**

**द्युनस्थितो हन्त्यनपत्यदोषं वैधव्यदोषञ्च विषाङ्गनोत्थम्**।।”[9]

लग्नात् चन्द्रमसः वा सप्तमस्थानाधिपतयः सप्तमे विद्यमाने शुभग्रहाश्च यदि लग्नगतः सप्तमस्थानगतः वा भवति तर्हि विषकन्याजन्य वैधव्ययोगः अनपत्ययोगश्च विनश्यति। एवं च स्त्रीयः पतिविचारसन्दर्भे श्रीमता कलय़ाणवर्मणा सारावल्यां निगद्यते-

**“शून्यऽस्ते कापुरुषो बलहीनः सौम्यदर्शनविहीने।**
**चरभे प्रवासशीलो भर्ता क्लीबो ज्ञमन्दयोश्च भवेत्।।”** [10]

आशयमिदं यदि स्त्रीयः कुण्डल्यां लग्नात् चन्द्रमसः वा सप्तम भावे कोऽपि ग्रहः न विद्यते तर्हि तस्या पति निन्दितः भवति। यदि सप्तमभावः शुभग्रहेण अदृष्टः भवति तर्हि पति निर्वलः भवति। पुनः सप्तमभावः चरराशिगतत्वात् पतिः परदेशगामी अपि च सप्तमे भावे बुधे शनौ वा सति पति नपुंसकः स्यात्।

**वृहत्पाराशरदृष्ट्या स्त्रीजातकम्-** वृहत्पाराशरहोराशास्त्रदृष्ट्या स्त्रीणां यद् जातकफलमालोचितम् तस्य प्रकामानुरूपता वराहमिहिरप्रणीते वृहज्जातकग्रन्थेऽपि दरीदृश्यते।

**"कन्यैव दुष्टा व्रजतीह दास्यं साध्वी समाया कुचरित्रयुक्त।**
**भूम्यात्मजर्क्षे क्रमशोंऽशकेषु वक्रार्किजीवेन्दुजभार्गवानाम् ।।**

**दुष्टा पुनर्भूः सुगुणा कलाज्ञा ख्याता गुणैश्चासुरपुजितर्क्षे।**

**स्यात्कपटी क्लीबसमा सती च बौधे गुणाढ्या प्रविकीर्ण्णकामा।।**

**स्वच्छन्दा पतिघातिनी बहुगुणा शिल्पीन्यसाध्वीन्दुभे**

**त्राचारा कुलटार्कमे नृपवधूः पुँश्चेष्टिताऽगम्यगा।**

**जैवे नैकगुणाल्परत्यतिगुणा विज्ञानयुक्ताऽसती**

**दासी नीचरतार्किभे पतिरता दुष्टाऽप्रजा स्वांशकैः।** "[11]

एवञ्च "सप्तमभावे सूर्यः तिष्ठति चेत् स्त्री पतित्यक्ता, मङ्गले स्थिते वालविधवा, यदि पापदृष्टः शनिः विद्यते तर्हि अनूढाकन्यकारूपेण वृद्धा भवति। परन्तु शुभग्रहाः सप्तमे सन्ति चेत् कन्या सधवा, पापग्रहाः भवन्ति चेत् वैधव्ययुक्ता विचारणीया । शुभाशुभमिश्रितग्रहसम्बन्धे मिश्रफलरूपं पुनर्भूकर्त्री वक्तव्या । शुक्रमङ्गलौ परस्परौ अन्योऽन्यांशगतौ कन्या परपुरुषगामिनी भवति । संयोगेऽस्मिन् चन्द्रमसि सप्तमभवनगते पत्युराज्ञया परपुरुषगामिनी इति संसूच्यते । लग्नस्थः सचन्द्रशुक्रः शनेः शुक्रस्य राशिषु वा यथा - वृषः, तुला, मकरः, कुम्भराशिषु स्थिते स्त्री मात्रा सह पांशुला भवति। "[12]

**उपसंहारः -** स्त्रीजातकफलविनिर्देशः प्रसङ्गवशात् भावानां ग्रहाणामपि स्थितिं संपरीक्ष्य पराशरेण समुपादित यथा- "स्त्रियोऽष्टमभावे सूर्ये संस्थिते सा दरिद्रा-दुःखिता-खिन्ना-क्षताङ्गी-धर्मपराङ्मुखा, चन्द्रे विद्यमाने कुत्सितदृष्टिः, स्तनः, भोगसम्पन्ना, वस्त्रालङ्काररहिता, रुग्णा निन्दिता च भवति। एवञ्च मङ्गले निधनभावसंयुक्ते सा रुग्णा, दुर्वला, कान्तिहीना, दुःखसन्तप्ता वैधव्यपीड़िता च विचार्यते। बुधः निधनभावे तिष्ठति चेत् सा भीता, कलहप्रिया, धनधर्माभिमानवञ्चिता गुणहीना च भवति। वृहस्पतिः अष्टमभावान्तर्गते शीलरहिता, स्वल्पसन्ततियुक्ता, पतिपरित्यक्ता, स्थूलहस्तपादादियुक्ता, वहुभोजनप्रिया इति निर्दिश्यते।

शुक्रः निधनभावे समागते स्त्री प्रमत्ता, दरिद्रा, मलिना, कपटयुक्ता, क्रुरा, धर्मविरहिता च विद्यते। शनिः अष्टमभावे विद्यते सति मलिना, छलिनी, दुष्टा, पतिसौख्यविहीना तथा अष्टमस्थे राहौ विद्यमाने क्रुरहृदया, रूग्णा, पतित्यक्ता, कुलटा कुरुपा चेति स्वभावं सूचयति। सामाजिकजीवने पुरुषाणामिव स्त्रीणामपि शुभाशुभफलनिर्णयः अपरिहार्यत्वात् पराशर – वराहमिहिर – जैमिनिप्रभृतीनां महर्षीणां दिव्यप्रेक्षापटमवलम्य स्त्रीजातकसमीक्षणमन्वाख्येयमिति।

## पादटीकाः

1 वृ – पा – हो, अ- 80, श्लो - 1।

2 वृ – पा – हो, अ- 80, श्लो - 2 तः 4।

3 वृ – जा, अ -24, श्लो - 1।

4 वृ – पा – हो, अ- 80, श्लो – 5 तः 7।

5 वृ - जा, अ -24, श्लो – 2।

6 वृ – पा – हो, अ- 80, श्लो – 8।

7 वृ – पा – हो, अ- 80, श्लो – 9 - 10।

8 वृ – पा – हो, अ- 80, श्लो – 11 तः 16।

9 ज्यो – सा – र, अ- 7, श्लो – 68।

10 सा – व, अ - 45 श्लो – 15।

11 वृ - जा, अ -24, श्लो- 3 तः 5।

12 वृ – पा – हो, अ- 80, श्लो – 26 तः 33।

## सन्दर्भग्रन्थाः

1. वृहत्पाराशरहोराशास्त्रम्- पराशर चौखम्भा संस्कृत संस्थान, (व्याख्या- पं देवचन्द्र झा) पोस्ट बोक्स नं 1139, वाराणसी- 1।
2. वृहज्जातकम्-श्रीवराहमिहिर चौखम्भा प्रकाशनम्, (व्याख्या-रामचन्द्र पाठक) के. 37/116, गोपाल मन्दिर लेन, वाराणसी।
3. ज्योतिःसार रत्नावली- पण्डित वाइकोलि ज्योतिष विशारदराधाकृष्ण पुस्तकालय-सत्यनारायण मन्दिर रोड़, व्रह्मपुर(गञ्जाम)।
4. सारावली - श्रीमत्कल्याणवर्मा – मोतीलाल बनारसीदास, दिल्ली। (व्याख्या-मुरलीधर चतुर्वेदी)

# रसतत्त्वविमर्शः

**Dr. Mithu Rani Maish**

Assistant Professor,

Department of Sanskrit,

Belda College west Bengal

प्राचीनकालादेव अद्यावधि संस्कृतकाव्यजगति च रसस्य भूयसी आलोचना वर्तते। काव्यशास्त्रस्येतिहासे भरतमुनिरेव रससिद्धान्तस्य प्राचीनतमः प्रतिष्ठापकः आचार्यः। अतः रससिद्धान्तस्य आद्यप्रबर्तक आचार्यो भरतः एव विद्यते। अयं रसशब्दः सर्वप्रथमं वेदेषु उल्लिखितः यथा- **दधानः कलसे रसम्**।[१] यथा **वा रसो वै सः, रसं होवायं लव्धानन्दी भवति इति।**[२] रसं विना काव्यं रसिकानां कृते निरसमनादृतं च भवति। अतः रसस्य अलौकिकमानन्दं सवैरङ्गीकृतम्। प्रकारेण आनन्दार्थेऽपि रसशव्दस्य प्रयोगो दृश्यते भरतमुनिना नाट्यशात्रे उक्तमं यदसौ अथर्ववेदात् नाट्ये रसं जग्राह -

**जग्राह पाठ्यमृग्वेदात सामभ्यो गीतमेव च।**
**यजुर्वेदादभिनयान् रसानाथर्वणादपि ।।** [३]

भागवतपुराणाभिलक्ष्य उक्तं यत्- **"भागवतं रसनालय"** इति। अग्निपुराणे काव्यशास्त्रनिरुपण प्रसङ्गे वाह्यतं यत् **"वाग्वैदग्धप्रधानेऽपि रस एकत्र जीवितम्।"** विष्णुधर्मोत्तर महापुराणेऽपि रसस्य विशिष्टं व्याख्यानं समुपलभ्यन्ते। अतः रसस्य नितरां प्राचीनत्वं स्वत्तः सिद्धम्। इतिहासविदः वदन्ति यत् नान्दिकेश्वरेण कश्चन रसविषयको ग्रन्थे विरचितमासीत्। किन्तु ग्रन्थोऽयं अधुना न समुपलभते । अधुना भरतमुनि प्रणीतं नाट्यशास्त्रमेव नितरां प्राचीनतां भजते। इदमेव शास्त्रं सर्वेषां नाट्यशास्त्रीयग्रन्थानां च आधारभूमि।

नाट्यशास्त्रस्य षष्ठोऽध्याये मुनिना रसनिष्पत्ति विषये आलोचितम्। रसः इति कः पदार्थः? कथम् आस्वाद्यते रसः ? इति प्रश्नस्य उत्तरे भरतमुनिना उक्तं- **यथाहि नानाव्यञ्जनसंस्कृतमन्नं भूञ्जाना रसानास्वादयान्ति समुनसः पुरुषां हर्षादींश्चाप्यधिगच्छृत्ति, तथा नानाभावाभिनय-व्यञ्जितान् वागङ्गसत्वोपेतान् स्थायिभावानास्वादयन्ति सुमनसः प्रेक्षकाहर्षादींश्चधिगच्छन्ति। तस्मान् नाट्यरसाः।**[४]

रसं विना कस्यचिदप्यर्थस्य प्रवर्तनं काव्ये न सम्भवति। **न हि रसादृते कश्चिदप्यर्थः प्रवर्तते।**[५] अस्मिनेव प्रसङ्गे अभिनवभारतीटीकायां लिख्यते टीकाकारेण यथा- एक एव परमार्थतो रसः सूत्रस्थानीयत्वेन रूपके प्रतिभाति। अर्थात् रूपके रस एव सर्वत्र सूत्रवत् प्रतीयते। न नाट्य एव च रसं काव्येऽपीयं प्रकारेण रसविषये भरतमुनिना स्बमतं प्रकटीक्रीयते। व्याकरणशास्त्रदृष्ट्वा रस पदस्य अर्थ आस्वाद्यत इति रसः, रस्यते अनेन

इति रसः, रसति रसयति वा रसः, रसनं रसः आस्वादः इति व्युत्पतयः प्रचलिताः सन्ति। काव्य पठनेन, श्रवणेन, अभिनयदर्शनेन च यदानन्दं वयमनुभवामः स एव रसः इत्यपि विदुषः मतम्। रसस्वरूपविषये विश्वनाथः साहित्यदर्पणे व्रुते यथा -

**सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।**

**वेदान्तरस्पर्शशून्यो व्रह्मास्वादसहोदरः॥**

**लोकोत्तर चमत्कारप्राणः कैश्चित् प्रमातृभिः।**

**स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः॥**[६]

आचार्यः भरतेन नाट्यशास्त्रस्य षष्ठोऽध्याये रसस्वरूपस्य रसानुभुतेश्च विवेचनं कृत्वा वुते -

**विभावानुभावव्यभचारिभावसंयोगाद्रसनिष्पत्ति :** [७]

एतस्य रससूत्रस्यैवाशयमादाय उत्तरवर्तिनः मम्मटविशनाथादयः आचार्याः अपि रसनिष्पत्तिसिद्धान्तं प्रकटीकुर्वन्ति । विभावानुभावनाम च विशद् व्याख्यां कुर्वन्ति। यथा काव्यप्रकाशे-

**कारणान्यथ कार्याणि सहकारीणि यानि च।**

**रत्यादेः स्थायिनो लोके तानि चैन्नाट्यकाव्ययोः॥**

**विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः।**

**व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः॥**[८]

यथा जगति कारणानि कार्याणि सहकारीणि भवन्ति तथैव काव्येषु नाटकेषु च निरूपनानन्तरं क्रमशो विभावानुभावव्यभिचारिण उच्यन्ते। नाट्यशास्त्रस्य षष्ठोऽध्याये मुनिना रससरणिः प्रपंचिता। तां रससरिणम् अत्र समासेन निर्दिशामि। तत्र मुनिभिः भरतमुनिः पृष्टः भगवन् नाट्यविचक्षणैव रसाः उच्चन्ते, तेषां विषये तत्त्वः सर्वं ज्ञातुं समीहामहे। तेषा वाचांसि श्रुत्वा मुनिः अब्रवीत् यदेकस्वैव भावस्य रसस्य वा आनन्त्य भवति सर्वेषां तु का कथा, तथापि नाट्यानुकुलान् रसभावान् प्रवक्षामि। ततः मुनिना शृङ्गार, हास्य, करुण, रौद्रः, वीर, भयानकः वीभत्स, अद्भूतश्चैत्यष्टौ रसाः नाट्ये स्वीकृत्वाः। यथा-

**शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।**

**वीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः॥**[९]

एषाम् अष्टौ रसानां रत्यदयः अष्टौ स्थायिभावाः निर्वेदादयः त्रयास्त्रिंशत संचारिभावाश्च मुनिना प्रोक्ताः। स्थायिभावाः यथा-

**रतिर्हासश्च शोकश्च क्रोध्यत्साहौ भयं तथा।**
**जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रर्कर्तिताः।।१०**

संचारिभावाः यथा-

**निर्वेदग्लानिशङ्काख्यास्तथासूयामदश्रमाः।**
**आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिधृतिः।**
**व्रीड़ा चपलता हर्ष आवेगो जड़ता तथा।**
**गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च।।**
**सुप्तं प्रवोधऽमर्षश्चाप्यवहित्थमथोग्रता।**
**मतिर्व्याधिरथोन्मादस्तथा मरणमेव च।।**
**त्रासश्चैव वितर्कश्च विज्ञेया व्याभिचारिणः।**
**त्रयस्त्रिंशदमी भावाः समाख्यातास्त नामतः।।** [११]

रसभावयोः कः सम्वन्धः इति विचारे कृते सति ज्ञायते यद् रसभावयोः नित्यसम्वन्धः किंवा तयोः अन्योन्यसम्वन्धः इति। कथमिति चेति उच्चते, हि काव्ये नाट्ये च रसेन विना भावाः न राजन्ते, न च भावैः विना रसप्रीतितिसम्भवः, एतस्माद् कारणाद्, अस्माभिः यः रसभावसम्वन्धविधिः निर्धारितः स समीचीन इति। मुनिवचनं अत्र प्रमाणं यथा-

**न भावहीनोऽस्ति रसो न भावो रसवर्जितः।**
**परस्परकृता सिद्धिस्तयोरभिनये भवेत।।** [१२]
**यथा वीजाद् भवेद् वृक्षो वृक्षात् पुष्पं फलं यथा।**
**तथा मूलं रसाः सर्वे तेभ्यो भावा व्ययस्थिताः।।**[१३]

तत्र शृङ्गार, रोद्रः वीर, भयानका इति चत्वार एव मुलरसाः मुनिना स्वीकृताः। क्रमोऽस्मिन् शृङ्गारात् हास्यः, रौद्रात् करुणः, वीरात् अद्भूतः, भयानकाच्च वीभ्तसरसः उत्पन्नोऽभूत् इति मुनिना व्याख्यातम्। मुनिना उपर्युक्तानाम् अष्टौ रसानां वर्णाः देवताश्च प्रोक्ताः। यथा -

**श्यामो भवेत्तु शृङ्गारः सितो हास्यः प्रकीर्तितः।**
**कपोतः करुणश्चैव रक्तो रौद्रः प्रकीर्तितः।।**
**गौरो वीरस्तु विज्ञेयः कृष्णाश्चापि भयानकः।**
**नीलवर्णस्तु वीभत्सः पीतश्चैवाद्भूतः स्मृतः।।**
**शृङ्गारो विष्णुदैवतो हास्यः प्रमथदैवतः।**
**रौद्रो रुद्राधिदेवश्च करुणो यमदैवतः।।**

**वीभत्सस्य महाकालः कालदेवो भयानकः।**

**वीरो महेन्द्रदेवः स्यादद्भुतो व्रह्मदैवतः॥**[१४].

मुनिकथनमिदम् अतीव मनोवौज्ञानिकं व्यवहारिकज्ञानप्रदं च वर्तते, अनेन मुनिकथनेन स्पष्टमवगम्यते यत् प्रकृतिवैशिष्टयात् कस्मिन् वर्णने कस्य रसस्य प्रधान्यं भवेत्। अतः काव्य-नाट्य-रचन-कर्मणि निरतानां कवीनां नाट्यानां च कृते मुनिकथनमिदं पथप्रदर्शकं महतशिक्षापदं च वर्तते। नाट्यशास्त्रस्य अभिनवभारतीति व्याख्यायां अभिनवगुप्तपदाचार्यैः "विभावानुभावव्याभिचारि संयोगाद्रसनिष्पत्तिः" इति शब्दानां व्याख्यायां तु विदुषां मध्ये मतैक्यं दृश्यते तथापि संयोगात् तथा निष्पत्तिः इति पदद्वयस्य व्याख्याप्रसङ्गे पर्याप्तमात्रायां मतभिन्नता दृष्टिपथमायाति। तदनुसारेणैव मम्मटाचार्येण समासेन रससूत्रविवेचनक्रमो दर्शतः।

तत्र प्रथमतः भट्टलोल्लट प्रभृतीनां मतमुदघाटितम्। मतेऽस्मिन् रससूत्रे कथितसंयोगशव्दस्यार्थे विभावादीनां स्थायिभावेन सत्त्पाद्योत्पादकभावसम्वन्धो गृह्यते, निष्पत्तिशव्दस्य च उत्पत्तिरर्थः भवति। ते वदन्ति यत् विभावैः रत्यादिभावो जनितः, अनुभावैः प्रतीतियोग्यः कृतः, व्याभिचारिभिरुपचितो मुख्यया वृत्या रमादावनुकार्ये तद्द्रुपतानुसंधानात् नर्तकोऽपि प्रतीयमानो रस इति।

शङ्कुकमते विभावादिभिः स्थायिभावस्य अनुमितिः भवति। विभावादीनां स्थायिभावेन सह गम्यगमकभावसम्वन्धो भवति। काव्यप्रकाशे शङ्ककमतसारांशो यथा- सम्यकमिथ्यासंशयसादृश्य प्रतीतिभ्यो चित्रतुरगा न्यायेन विलक्षणया प्रतिपत्या अनुकार्यशव्दवाच्यानां रामादीनां नायकानां नटे प्रतीतिर्भवति। ततः वस्तुसौन्दर्यवलात् शिक्षाभ्यासप्रभावाच्च नटननैव प्रकाशितैः विभावादिशब्दव्यपदेश्यैः कृत्रिमैरपि अकृत्रिमतया भासमानैः गम्यगमकभावरूपात् सम्वन्धात् अनुमीयमानः सामाजिकानां वासनया चर्व्यमाणो स्थायी भावः रसपदभाग् भवति। अयमेव शङ्कुकस्य अनुमितिवादः। इदमपि मतं न निर्दोषं प्रतीयते।

भट्टनायकमते काव्ये नाट्ये च साधारणीकरणात्मना भावकत्वव्यापारेण भाव्यमानः सत्वोद्रेकप्रकाशानन्दमयस्थायी भोजकत्वव्यापारेण भुज्यते (आस्वाद्यते) इत्यर्थः। अत्रायमाशय वर्तते हि काव्याध्ययनेन नाठ्यवलोकनेन च सामाजिकानां साधारणीकरणरूपो भावकत्वव्यापारो प्रवर्तते। येन सप्रकाशरूप आनन्दमयः स्थायी रसपदवीं लभमानः चित्तस्य विषयो भवति चित्ते व्याप्नोति इत्यर्थः । अत्र साधारणीकरणस्य कोऽर्थ इत्यपेक्षयां किञ्चिद् उच्यते। रससामग्रीभूताः सर्वे भावाः रामादीनां वर्तन्ते वा, नटस्य वर्तन्ते वा, सामाजिकानां च वर्तन्ते न वा इति सम्बन्धविधिनिषेधस्थगणपूर्वकं प्रपाणकरसन्यायेन स्थायी रसपदेनोच्यते। अत्र वक्तुं शक्यते यत् भट्टनायकस्य मतं नितरां समीचीनं, किन्तु मतेऽस्मिन् भावकत्वभोजकत्वव्यपारद्वय कल्पित्वात्, न युक्ति प्रमाणाभ्यां अस्य मतस्य सिद्धिः। एतस्मात् कारणाद् अभिनवगुप्तपादाचार्यैः न सर्वतोभाबेन स्वीकृतं मतमिदमिति। सन्दर्येऽस्मिन स्वमतं प्रतिपादयन्

अभिनवगुप्तपादाचार्यैः प्रोक्तं यत् लोके कारणकार्यसहकारिभिः काव्ये नाट्ये च तैरेव अलौकिकविभावादिशब्दव्यपदेश्यैः प्रपाणकरसन्यायेन रत्यादिस्थायी सकलसहृदयानां मनसि शृङ्गारादिरसरूपेण अभिव्यज्यते। अयमेव अभिनवगुप्तपादाचार्याणाम् अभिव्यक्तिवादः। भट्टनायकोक्तं विभादीनां साधारणीकरण तत्र एभिर्महाभागैः पूर्णरूपेण गृहीतमिति काव्यप्रकाशोक्तरससूत्रविषयकं मतचतुष्टयं किंचिद् निदर्शितम्।

विश्वनाथेनापि साहित्यदर्पणे एवमेव प्रतिपादिता। यथा-

**विभावेनानुभावेन व्यक्तः संचारिणा तथा ।**
**रसतामेति रत्यादिः स्थायीभावः सचेतसाम्।।**[१५]

अयमेव क्रमः अन्यैरपि गृहीतः। नाट्यकाव्ययोः "रस एव आत्मा इति सर्वे विद्वांसः आमनन्ति। **"रस एव आत्मा साररूपतया जीवनाधायको यस्य"** अनेन स्पष्टं यत रसस्यैव नाट्यकाव्यजगति प्राधान्यं वर्तते। श्रीमद्भिनवगुप्तपाद आनन्दवर्धन- मम्मटभट्ट - विश्वनाथा- पण्डितजगन्नाथ प्रमुखाः ध्वनिवादिन आचार्याः रसभावान् असंलक्ष्यक्रमध्वनिशब्देन व्यवहरन्ति। उक्तं हि धन्यालोक आनन्दवर्धनाचार्यैः-

**असंलक्ष्यक्रमोव्यङ्ग्यो ध्वनिः वर्णपदादिषु।**
**वाक्ये संघटनायां च स प्रवधेऽपि दीप्यते।।** [१६]

अत्र अलक्ष्यक्रमव्यङ्गध्वनिः इत्यनेन रसाभावादिवोधव्यः। तत्र काव्यप्रकाशस्य चतुर्थोल्लासे मम्मटाचार्येनुक्तं **'रसभावतदाभासभावशान्त्यादिरक्रमः'** इति। तत्र ध्वनिशब्दं व्याकुर्वाणाः अनन्दवर्धनाचार्याः निगदन्ति यत् 'व्यङ्गप्राधान्ये हि ध्वनिः' इति। उपर्युक्ताः पण्डितराजप्रमुखाश्च आचार्याः व्यञ्जनसैव रसभावादीनां वोधविषयता स्वीकुर्वन्ति ।

यद्यपि भरतमुनेरनुशासनमङ्गीकृत्य नाट्य प्रागुक्ताः अष्टौ रसा एव आचार्यैः निरुपिताः तथापि काव्य शान्तरसस्य महती प्रतिष्ठा वर्तते। अभिनवनाट्यभारत्यां अभिनवगुप्तपादाचार्यैः युक्तिप्रमाणाभ्यां शान्तरसस्य प्रौढ़तमा विवेचना कृता। ते वदन्ति यत् महाभारतस्य अङ्गीरसः शान्त एव वर्तते। सन्दर्भेऽस्मिन् मम्मटचार्येनाप्युक्तं 'निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः।" रसगङ्गाधरे पण्डितराजो व्रवीति "मुनिवचनभङ्गप्रसङ्गात् नाट्ये मा भूत् शान्तो रसः, काव्ये पुनः कः निवारयितुमिष्टे। वहनि पुराणप्रसङ्गानि, काव्यप्रसङ्गानि, स्तोत्राणि च शान्तरसप्राधानानि लक्ष्यते। अतं निर्ववादमेतद् यत् शान्तो रसः काव्यजगति पूर्वरूपेण प्रतिष्ठितो वर्तते।

**उपसंहारः**

काव्यस्य आत्मनो विषये प्राचीनकालादारभ्य वर्तमानकालपर्यन्तं वहवो वादाः अस्माकं दृष्टिपथे पथिकायन्ते। परं प्रायः आलंकारिकैः रस एवं काव्यत्मा अङ्गीक्रीयते। ध्वनिकारेणापि रसध्वनिः

काव्यस्यात्मा मन्यते। लिखते च-रसभावतदा भासभाशान्त्यादिरक्रमः। ध्वनेरात्माविभावेन भासमानो व्यवस्थितः। प्रतिहारेन्दुना विरचितायां, काव्यलंकारसारसंग्रस्य लघुवृत्तिरिति नामधेयां टीकायां रस एव काव्यात्मा कथ्यते। लघुवृत्यामुल्लेखो प्राप्यते यत् रसाद्यधिष्ठितं काव्यं जीवद्रूपतया यतः। कथ्यते तद्रसादीनां काव्यात्मं व्यवस्थितम्। [१७]

एवमेव अभिनवगुप्त-भोजराज-मम्मट-रुय्यक-महिमभट्ट-राजशेखर-विश्वनाथ- कर्णपुर-भूदेव-केशवमिश्र-जगन्नाथादिभिः आलंकारिकैः रस एव काव्यात्मा अङ्गीक्रीयते। अलंकारशेखरे केशवमिश्रेण लिखितं यत्-साधुपाके विना खाद्यं भोजने नीलवर्णं यथा। तथैव नीरसं काव्यं स्यात्रो रसिकतुष्टये।" न केवलं काव्यशास्त्रीया आचार्याः एव रसस्य प्रधानत्वं मूर्धन्यः कवयोऽपि रसस्यैव काव्येषु महाकाव्येषु प्रधानत्वमानन्ति। रसकाव्यस्याति विशिष्टं तत्त्वं वर्तते। प्रवन्धकाव्यं रचयन् कविः रसपरतन्त्रं स्यात्। भणत्यानन्दवर्धनोऽपि यथा- कविना काव्यमुपनिवध्नता सर्वात्मना रसपरतन्त्रेन भवितव्यम्।[१९]

## पादटीकाः

१. ऋग्वेदः

२. तैत्तीरिय उपनिषद ब्रह्मानन्दवल्ली सप्तम अनुवाक

३. नाट्यशास्त्रम्, १७

४. नाट्यशास्त्रम्, पृ-१३७

५. नाट्यशास्त्रम्, पृ -१३७

६. साहित्यदर्पणः, तृतीय परिच्छेद २

७. नाट्यशास्त्रम्, पृ-१३७

८. काव्यप्रकाशम्, तृतीयोऽध्याय

९. नाट्यशास्त्रम्, षष्ठोऽध्याय, १५

१०. नाट्यशास्त्रम्, षष्ठोऽध्याय, १७

११. नाट्यशास्त्रम्, षष्ठोऽध्याय, १८-२१

१२. नाट्यशास्त्रम्, षष्ठोऽध्याय, ३६

१३. नाट्यशास्त्रम्, षष्ठोऽध्याय, ३८

१४. नाट्यशास्त्रम्, षष्ठोऽध्याय, ४२-४५

१५. साहित्यदर्पणः, तृतीय परिच्छेद, १)

१६. ध्वन्यालोकः, तृतीय उद्योतः

१७. काव्यप्रकाशसारसंग्रहः

१८. अलंकारशेखरः - २

१९. ध्वन्यालोकः ३-१४, वृत्तिभाग

## सन्दर्भग्रन्थाः


१.ध्वन्यालोकःश्री सुवोधचन्द्र सेनगुप्त ओ कालीपाद भट्टाचर्य, संस्कृत वुक दिपो

२. साहित्यदर्पणः, श्री सत्यरञ्जन वन्दोपाध्याय । सदेश प्रकाशन।

३. ध्वन्यालोकः, सत्यनारायण चक्रवर्ती। संस्कृत पुस्तक भाण्डार।

४. भरतनाट्यशास्त्र,ड. सुरेशचन्द्र वन्दोपाध्याय ओ ड. छन्दाचक्रवर्ती। नवपत्र प्रकाशन।

५. उपनिषद, हरफ प्रकाशनी।

६. काव्यप्रकाशः, विमलकान्त मुख्योपाध्याय, संस्कृत पुस्तक भाण्डार।

७. साहित्यदर्पणः, चौखम्भा ओरियन्टालिया, चौखम्भा पाब्लिशर्स।

# स्थानेन्तरतमः

**Dr. Santosh Majhi**

Asst. Prof. Dept. of Vyakarana

National Sanskrit University, Tirupati

**सारांशः –**

महर्षि पतञ्जलिना व्याकरणमहाभाष्ये सप्तमाह्निके सत्सु षडविधसूत्रेषु संज्ञापरिभाषादि सूत्रेषु एषा परिभाषा सूत्रविषये सम्यक् विचारः कृतः। सूत्रेऽस्मिन् सप्तम्यन्तपाठ आश्रितः, प्रथमान्तो वा ? एवं सूत्रप्रत्याख्यानप्रकारं दर्शयित्वा सूत्रसत्तायां प्राप्तोदोषान् यथा भाष्यं चर्चितः ।

अष्टाध्याय्यां संहितापाठस्याश्रयणे 'स्थानेऽन्तरतमः उरण रपर' इति सत्वेन किं तत्र प्रकृतितः अन्तरतमविधानं- स्थानिनि अन्तरतमे षष्ठीति, अथवा आदेशत स्थाने प्राप्यमाणानामन्तरतमः आदेशो भवतीति अर्थः वक्तव्यः ? इति सन्देहो जायते । अर्थात् 'अन्तरतमे उरण रपरः' इति प्रथमान्तपाठाश्रयणे द्वितीयोऽर्थः लभ्यते। संहिता उभयथा तुल्यैव। अतः कः पाठस्तत्राश्रयणीय इति सन्देहस्य आशयः ।

**यदि सप्तम्यन्तपाठः आश्रीयते -**

१) "इको यणचि" इत्यत्र यणां योऽन्तरतमा इकः ह्रस्वाः तत्रैव आदेशः स्यात्। यथा दध्यत्र, मध्वत्र। कुमार्यर्थम्, ब्रह्मबन्ध्वर्थम् इति दीर्घस्थले तु न स्यात् ।

२) "सार्वधातुकार्धधातुकयोः", "अचो ञ्णिति" इति विधीयामाने गुणवृद्धी, तयोः ये अन्तरतमा इकः द्विमात्राकालिकः स्थानिनः तथैव स्याताम्। यथा नेता, लविता, नायकः, लावकः इत्यादौ चेता, स्तोता, चायकः, स्तावकः इति एकमात्रास्थले तु न स्याताम्।

३) ऋकारस्य ह्रस्वस्यैव सार्वधातुकगुणः स्यात्। एवं दीर्घस्य ऋकारस्यैव वृद्धिः स्यात्। स्थानिनः आन्तरतम्यात्। तथा च कर्ता, हर्ता, आस्तारकः, निपारक इत्यादी गुणवृद्ध्योः सिद्धावपि आस्तरिता, निपरिता, कारकः हारक इत्यत्रानापत्तिः।

एवं रीत्या लक्ष्यासिद्ध्या सप्तम्यन्तच्छेदो दुष्टः। प्रथमान्तपाठे तु स्थानिनि सदृशतमः आदेशो भवतीत्यर्थ स्वीकारेण सर्वलभ्यसिद्धिरिति प्रथमान्तपाठ एव युक्तः।

यद्यपि प्रथमान्तपाठाश्रयणे 'वान्तो यि प्रत्यये' इति सूत्रे एकारैकारयोः प्राप्तवान्तादेशवाधनार्थं 'ओकारौकारयोरिति वक्तव्यम्' इति वचनं आश्रयणीयम्। सप्तम्यन्तपाठे तु दोषो वार्यत इति भाष्ये आक्षेपः प्रदर्शितः। तथाऽपि वान्तग्रहणमकृत्वा "यि प्रत्यये" एचोऽयादयो भवन्तीति इत्येव स्वीक्रियते। चेयं, जेयमित्यत्रापत्तिस्तु न। "क्षय्यजय्यौ शक्यार्थे" इति निपातनेन क्षिज्योरेव शक्यार्थ एव च एचः अयादेशविधानात्। एकारविषये एव अस्य नियमस्य प्रवृत्या लव्यम्, अवश्यलव्यम् इत्यादौ नास्ति दोषः। छन्दसः दृष्टानुविधित्वात् रायमिच्छतीत्यर्थे रैयतीत्यत्र आयादेशो न।

'उदुपधाया गोहः' इत्यत्र 'उपधा' ग्रहणस्य, 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' इत्यत्र 'त' ग्रहणस्य च सत्वेन नास्ति कश्चिद्धोषः।

एवं रीत्या 'स्थानेऽन्तरतम' इति सूत्रे सप्तम्यन्तपाठस्वीकारे दोषसत्वेन न युक्तः सः। अत्वः प्रथमान्तपाठ एव युक्तः।

**स्थानेन्तरतमः इति सूत्रप्रत्याख्यानप्रकारं**

लौकिकन्यायमाश्रित्य 'स्थानेन्तरतमः' इति सूत्रं भाष्ये प्रत्याख्यातम्।

यथा - समाजेषु, समाशेषु वा आस्यतामित्युक्ते येषां किञ्चिदर्थकृतं साम्यं तैरेव सह आसते। न तु कृशाः कृशैः, पाण्डवः पाण्डुभिः।

एवं, गावः दिवंसं चरितवत्यः यो यस्याः वत्साः तेनैव सह तिष्ठन्ति एवं, वाहनानि गोयुग्मयुक्तकान्येव, न तु अन्येन सह तिष्ठन्ति एवं, वाहनानि गोयुग्मयुकान्येव, न तु अन्येन सह अन्यस्य तत्र उपयोगः। तदवदिहापि स्थानादिना सादृश्येन व्यवहारः। न च चेतनावस्त्वेवायं व्यवहारो दृष्ट इति वाच्यम्। अचेतनेष्वपि सत्वात्। तथा हि-

१) पाषाणां क्षिप्तं बाहुवेगं गत्वा नैव तिर्यग्गच्छति, नापि रुर्ध्वमाहोहति पृथिवीविकारः पृथिवीमेव गच्छति साम्यात्।

२) एवं, अन्तरिक्षे भवस्य सूक्ष्मस्य जलस्य जलमेव गच्छति।

३) सूर्यविकारः किरणः सूर्यमेव गच्छति, नैव तिर्यक, नाप्यर्वाक्। एवं रीत्या चेतनाचेतनव्यवहारमादाय सूत्रमिदं प्रत्याख्यातम्।

लौकिकदृष्टान्तानाश्रयणे तु सूत्रमारम्भणीयमेव। तत्र यद्यपि केचन दोषाः सन्त्येव। तथाहि -

१) 'व्यञ्जनस्वरव्यतिक्रमे च तत्कालप्रसङ्गः' इष्टम्, उक्तम् इत्यादी अर्धमात्रिकयोः

चकारवकारयोः स्थाने अर्धमात्रिको इकारोकारौ स्यातामिति ।

२) दध्यत्र, मध्वत्र, कुमार्यर्थमित्यादौ एकमात्रिकस्य, इकारस्य स्थाने एकमात्रिकः, द्विमात्रिकश्च यण् स्यादिति।

वस्तुतस्तु -

१) अर्धमात्रिकस्य इकोऽभावात्, एकमात्रिकस्य, द्विमात्रिकस्य यणोऽभावाच्च पूर्वोक्तदोषाः भाष्ये निवारितः।

एवं खट्वा+उदकम्, खट्वा + ओदनः इत्यादौ त्रिमात्रचतुर्मात्राणामादेशेतापत्तिरपि न। "वृद्धिरादैच्", 'अदेङ् गुणः' इति च सूत्रे तपरकरणात्। एवमेव, कुर्वाते इत्यादौ "टित आत्मनेपदानां टेरे" इति एकारस्यापि न अर्धतृतीयमात्रकस्य आपत्तिः । तादृशस्य अभावात् ।

कर्ता, कारक इत्यादी गुणवृद्ध्योः रपरत्वेन प्रवृत्त्या अर्, आर् इत्यनयोः अनेकान्तत्वेन सर्वादेशत्वापत्तिरिति शङ्का भाष्ये प्रदर्शिता ।

तत्र समाधानम् -

१) 'अङ्गस्य' इति षष्ठी पूर्वमेव अन्त्यमिकम् उपसंह्रियते । तथा च ऋकारस्य स्थानित्वे ज्ञाते रपरत्वं आनुपूर्व्या सिद्धत्वात् पूर्वप्रवृत्तं 'अलोऽन्त्यस्य' इत्येनं न बाधते ।

२) अनान्तर्यमेव एतयोरान्तर्यम् ।

३) नष्टाश्वदग्धरथन्यायेनापि अत्र दोषो वार्यते ।

रक्तवैलका इत्यादौ स्थानिनोऽवर्णस्य प्रधानत्वात् एव आदेशतया स्यादिति चेन्न । "सिद्धं तूभयान्तर्यात्"। उभयोः स्थानिनो अन्तरतमः ऐकार एव भवति, नत्वकारः इति न दोषः। एवं रीत्या सूत्रारम्भपक्षे प्राप्तानां दोषाणां निवारणोपायाः भाष्ये प्रदर्शिताः ।

## सन्दर्भग्रन्थाः

1.लघुसिद्धान्तकोमुदी– आचार्य रघुनाथ शास्त्री–चौखम्बासुरभारतीप्रकाशन,वाराणसी।

2. लघुसिद्धान्तकोमुदी – आचार्य विश्वनाथ मिश्रः - चौखम्बा संस्कृत प्रतिष्ठा, दिल्ली।

3.पाणिनीयव्याकरणमहाभाष्यम् -श्री भार्गवशास्त्रिण-चौखम्बा संस्कृत प्रतिष्ठा, दिल्ली।

4.वैयाकरणसिद्धान्तकौमुदी- श्रीगोपालदत्त पाण्डेयः – चौखम्बा सुरभारती प्रकाशन।

5. वैयाकरणसिद्धान्तकौमुदी- लक्ष्मी शर्मा – चौखम्बा सुरभारती प्रकाशन, वाराणसी।

6. परिभाषेन्दुशेखरः – आचार्य विश्वनाथ मिश्र - चौखम्बासुरभारतीप्रकाशन, वाराणसी।

7. पाणिनीय अष्टाधायी पाठः - स्वामी प्रह्लाद गिरि वेदान्तकेशरी - चौखम्बासुरभारतीप्रकाशन, वाराणसी।

# नैषधीयचरितमहाकाव्ये दण्डनीतेः एकं विहङ्गावलोकनम्

**डॉ. प्रदीपकुमारबाग्**

सहाचार्यः, साहित्यविभागः,

राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**सारांशः**

महाकविश्रीहर्षविरचितनैषधीयचरितं महाकाव्यं संस्कृतसाहित्ये विशिष्टस्थानं आवहति। तत्र द्वाविंशतिः सर्गाः विद्यन्ते। काव्यमिदं सर्वशास्त्रसमन्वितमस्ति। वेदः, आयुर्वेदः, दर्शनम्, नीतिशास्त्रम्, ज्योतिषम् इत्यादीनां शास्त्राणां प्रमुखाः सिद्धान्ताः तत्र तत्र प्रसङ्गात्काव्येऽस्मिन् उपस्थापिताः वर्तन्ते। काव्येऽस्मिन् राजनीति-दण्डनीतिसम्बद्धाः विषयाः प्राप्यन्ते। राजनेता, प्रशासकः, प्रशासनव्यवस्था, प्रजाः, मन्त्रिपरिषत्, मन्त्रणा, बाह्यशत्रुः, अन्तःशत्रुः, शत्रूणां दमनोपायः, दण्डनीतिः अथवा दण्डसंहिता इत्यादयः प्रमुखाः विषयाः शोधलेखे अस्मिन् चर्च्चिताः सन्ति।

## भूमिका

प्रजापालनतत्परस्य राज्ञः पौराणां मध्ये घटितविवादानां परिष्कारकरणम् अपराधिनां दण्डनं च धर्मः एव भवति इति शास्त्रेषु उच्यते अयं लोकाचारोऽपि अस्ति। अपराधिनां दण्डनार्थं राजानः न्यायाधिकारिणः नियुज्य धर्मनिर्णयं कारयेयुः। कौटिल्यार्थशास्त्ररीत्या धर्मशास्त्ररीत्या च प्रत्येकस्मिन् राष्ट्रे धर्मनिर्णेतारः भवन्ति। राज्ञः कृते शृङ्खलितराज्यशासनार्थं चत्वारः उपायाः निर्दिष्टाः सन्ति। यथा - सामः, दानम्, दण्डः, भेदश्च। प्राचीनभारतीयसंस्कृतौ दण्डस्योपरि गहनः विचारः प्रस्तुतोऽस्ति। दण्डनीतेः प्रमुखाधिकारी राजा आसीत्। किन्तु राज्यव्यवस्थायाः सुपरिचालनार्थं केचन अधिकारिणोऽपि दण्डं दातुं प्रभवन्ति स्म। यदि केनचित् सामाजिकेन दोषः क्रियते स्म तदा तेन राज्ञा अथवा न्यायाधीशेन दण्ड्यते स्म अथवा तेन स्वेच्छया प्रायश्चित्तम् अक्रियत। दण्डेन साकं प्रायश्चित्तस्यापि व्यवस्था प्राचीनकाले आसीत्।

प्राचीनभारते राज्ञः कृते अयं निर्दिष्ट आसीत् यत् सः दण्डेन बाह्यानाम् आभ्यन्तरिणानां शत्रूणां दमनं कुर्यादिति। दण्डनीतेः यः पालनकर्ता सः देवतातुल्यः पूज्य आसीत्। न्यायाधिकारिणां राज्ञां च सूचनानुगुणं ये दण्डार्हाः तान् न केनचित् लोभेन दण्डं दातुं नीतिः प्रोक्ता आसीत्। ये अदण्ड्या भवन्ति, यदि त्रुटिवशात् दण्ड्यन्ते तर्हि महत्पापं भवति राज्ञः कृते शास्त्रेषु उच्यते। यथोच्यते मनुस्मृतौ - "अदण्ड्यान् दण्डयन् राजा नरकं चाधिगच्छति"[१] इति।

**नैषधचरितमहाकाव्यस्य संक्षिप्तपरिचयः**

महाकविना श्रीहर्षेण लिखितं नैषधीयचरितं एकं महाकाव्यं भवति। अत्र द्वाविंशतिः सर्गाः विद्यन्ते। शृङ्गारप्रधानेऽस्मिन् महाकाव्ये कथावस्तु महाभारतात् गृहीतमस्ति। पुण्यश्लोकः निषधाधिपतिः नलः काव्यस्यास्य नायकः तथा कुण्डिनपुरनरेशस्य भीमस्य कन्या सतीशिरोमणिः दिव्यसुन्दरी दमयन्ती नायिका भवति। काव्येऽस्मिन् नायकनायकयोः अनयोः रूपगुणवर्णनाभिस्साकं नगर-स्वयम्बर-विवाह-सम्भोग-प्रभात-सन्ध्याप्रभृतीनां वर्णना अपि प्राप्यते। काव्यमिदं सर्वशास्त्रसमन्वितमस्ति। वेदः, आयुर्वेदः, दर्शनम्, नीतिशास्त्रम्, ज्योतिषम् इत्यादीनां शास्त्राणां प्रमुखाः सिद्धान्ताः तत्र तत्र प्रसङ्गात्काव्येऽस्मिन् उपस्थापिताः वर्तन्ते।

नैषधं विद्वदौषधमिति आभाणकमपि प्रसिद्धं वर्तते। अस्मिन् काव्ये राजधर्मः दण्डनीतिश्च क्वचित्कण्ठतः क्वचिच्च पात्रचरित्रविकासे दरीदृश्यते। तस्मिन् राजधर्म-दण्डनीतिविषये किञ्चिदत्र परिशील्यते।

**दण्डविधाने राजनीतौ च नायकः** –

अस्य जगतः वृद्धेः हेतुः राजा अथवा नायकः एव प्रधानो भवति। अस्वामिकाः प्रजाः परस्पराभिभूताः व्यवस्थाकारिणं राजानं चक्रुः। यथोक्तं- 'मात्स्यन्यायाभिभूताः प्रजा मनुं वैवस्वतं राजानं चक्रिरे। धान्यषड्भागं पण्यदशभागं हिरण्यं चास्य भागधेयं प्रकल्पयामासुः"[२] इति। यदि सम्यङ्नेता सम्यक् पालयिता न स्यात् तर्हि प्रजाः अकर्णधाराः नौकेव महासमुद्रे बलवद्विप्लवेत अर्थात् तेषां विनाशः भवेत्। तदुच्यते कामन्दकीये -

**राजाऽस्य जगतो हेतुर्वृद्धेर्वृद्धाभिसम्मतः।**
**नयनानन्दजननः शशाङ्क इव तोयधेः॥**
**यदि न स्यान्नरपतिः सम्यङ्नेता ततः प्रजाः।**
**अकर्णधारा बलवद् विप्लवेतेह नौरिव॥३**

जनाः यस्मिन् राज्ये राष्ट्रे वा निवसन्ति, तत्र कश्चन प्रधानः शासकः अवश्यमेव भवति। राज्यस्य सप्ताङ्गेषु राजा प्रमुख एव भवति। महाकविः श्रीहर्षः प्रत्यक्षतया तथा परोक्षतया महाराजस्य नलस्य चरित्राङ्कनं करोति। नलः अस्य काव्यस्य प्रधाननायकः अस्ति। समग्रायामपि कथायां इतस्ततः राजोचितगुणाः राजधर्माश्च विक्षिप्ताः श्रीहर्षेण उपस्थापिताः।

महाकवेः श्रीहर्षस्य मतानुसारेण एकः आदर्शः राजा शूरः, वीरः, धीरः प्रजापालनतत्परः स्यात्। नैषधनरेशस्य नलस्य समीपे एते सर्वेऽपि गुणाः समाविष्टा आसन्। सः पृथिव्याः रक्षकः प्रतापवान् वीरः शूरः इति प्रथमश्लोके एव प्रतिपाद्यते। यथा -

**निपीय यस्य क्षितिरक्षिणः कथां**

**तथाद्रियन्ते न बुधास्सुधामपि ।**

**नलस्सितच्छत्रितकीर्त्तिमण्डलः**

**स राशिरासीन्महसां महोज्ज्वलः ।।४**

अपि च कामन्दकीयनीतिशास्त्रे उच्यते - त एव राजानः कीर्त्तिमन्तो भवन्ति ये प्रजानां सम्यक् धर्मेण शास्त्रानुरोधेन च परिपालनं कुर्वन्ति। कामन्दकीये राजवृत्तं चतुर्विधं प्रोक्तमस्ति। यथा -

**न्यायेनार्जनमर्थस्य रक्षणं वर्धनं तथा ।**

**सत्पात्रप्रतिपत्तिश्च राजवृत्तं चतुर्विधम् ।।५**

**राजोचितगुणाः अपि तत्र क्रमशः प्रतिपादिताः । यथा -**

**नयविक्रमसम्पन्नः सूत्थानश्चिन्तयेच्छ्रियम् ।**

**नयस्य विनयो मूलं विनयः शास्त्रनिश्चयः ।।**

**विनयो हीन्द्रियजयस्तद्युक्तः शास्त्रमृच्छति ।**

**तन्निष्ठस्य हि शास्त्रार्थाः प्रसीदन्ति ततः श्रियः ।।**

**शास्त्रं प्रज्ञा धृतिर्दाक्ष्यं प्रागल्भ्यं धारयिष्णुता ।**

**उत्साहो वाग्मिता दार्ढ्यमापत्क्लेशसहिष्णुता ।।**

**प्रभावः शुचिता मैत्री त्यागः सत्यं कृतज्ञता ।**

**कुलं शीलं दमश्चेति गुणाः सम्पत्तिहेतवः ।।**

**आत्मानं प्रथमं राजा विनयेनोपपादयेत् ।**

**ततोऽमात्यांस्ततो भृत्यांस्ततः पुत्रांस्ततः प्रजाः ।।**

**सदानुरक्तप्रकृतिः प्रजापालनतत्परः ।**

**विनीतात्मा हि नृपतिर्भूयसीं श्रियमश्नुते ।।**[६]

एतैः सर्वैः गुणैः भूयिष्ठः राजा नलः समग्रेऽस्मिन् संसारे महत्याः कीर्त्तेः अधिकारी बभूव। श्रीहर्षमतेन एतेषां दिक्पालानाम् प्रत्येकमंशं स्वीकृत्य नलराजस्य रचना विधात्रा कृता। अस्य नलस्य शास्त्रं तृतीयं नेत्रमासीत् । येन सह शिवेन सह समान इति कल्पितः कविना ।

**दिगीशवृन्दांशविभूतिरीशिता**

**दिशां स कामप्रसरावरोधिनीम्।**

**बभार शास्त्राणि दृशं द्वयाधिकां**

**निजत्रिनेत्रावतरत्वबोधिकाम्।।**[७]

एवं नलोऽयं दानवीरः (१/१५, १६), गुणानुरागी (१/१७), सत्यप्रियः मधुरभाषी (२/६३), कलाप्रियः (३/२७), वाक्पटुः (३/३०), धीरः गम्भीरश्च (३/११६) आसीदिति महाकाव्येऽस्मिन् श्रीहर्षेण बहुत्र वर्णितवान् ।

अयं इष्टापूर्त्तिनिपुणः, हृष्टपुष्टाङ्गः, स्वस्थः राष्ट्ररक्षणे, शत्रुदमने, राष्ट्राभ्युदये च निपुणः आसीदित्यपि श्रीहर्षेण उल्लिख्यते । यः स्वस्थः बलिष्ठो वा राजा भवति स एव शत्रुदमनं कर्त्तुं शक्नुयात् ।

षड्गुणाः तिस्रः शक्तयः चाराश्च

श्रीहर्षेण नैषधीयचरिते नलकथाप्रसङ्गे राज्ञः षड्गुणाः सन्धिविग्रहादयः, तिस्रः शक्तयः प्रभुशक्तिः, मन्त्रशक्तिः, उत्साहशक्तिः ; शत्रूणां गतिविधिज्ञानार्थं दूतचारादिनियुक्तिः इत्यादयः विषयाः उपस्थापिताः यथा -

रसैः कथा यस्य साधावधीरणी

नलः स भूजानिरभूणाद्भुतः ।

सुवर्णदण्डैकसितातपत्रित-

ज्वलत्प्रतापावलिकीर्त्तिमण्डलः।।८

अत्र 'भूजानि:' इति शब्दात् नलस्य 'प्रभुशक्ति:' द्योत्यते। भूर्नाम पृथिवी, सैव जाया (पत्नी) यस्य स: भूजानि: । समग्राया: पृथिव्या: अयमेव नल: प्रभु: स्वामी वा आसीदिति अस्मात् शब्दात् ज्ञायते। सर्वेऽपि तदधीना: नृपतय: आसन्। द्वितीयत: 'सुधावधीरणी" इति शब्दे सुधावधी तथा रणी इति शब्दद्वयं वर्तते। शोभनं धावततीति सुधावा पुण्यसञ्चारिणी धी: बुद्धि: यस्य स: सुधावधी:। नलराजस्य बुद्धि: पुण्यसञ्चारिणी आसीत् । शास्त्रीयपद्धत्या धर्ममार्गेण स: स्वकीयाया: प्रज्ञाया: उपयोगं कृत्वा शासनमकरोत्। अनेन तस्य 'मन्त्रशक्तित्वं" द्योत्यते। पुनश्च 'रणी' इति शब्दस्यार्थो भवति युद्धप्रिय:। नित्यं रण: अस्ति अस्येति रण । अनारतं शत्रुदमनार्थं दिग्विजये य: रत: भवति स: रणी इत्युच्यते। अनेन शब्देन नलस्य 'उत्साहशक्ति:' द्योत्यते। एवं नैषधकार: शक्तित्रययुक्तस्य नलस्य गुणान् उपस्थापयति ।

पुनश्च श्लोकेऽस्मिन् नलस्य विशेषणरूपेण 'गुणाद्भुत:' इति शब्द: अपि प्रयुक्त:। गुणै: सौन्दर्यादिभि: अयमद्भुत: आश्चर्यरूपोऽयमासीदिति एकस्मिन् पक्षे ज्ञायते । अपरस्मिन् पक्षे तस्य राजनीतिसन्दर्भे ये सन्धि-विग्रहादय: षड्गुणा: कामन्दकीयादिनीतिग्रन्थेषु प्रोक्ता:, तै: गुणै: अपि अयम् अद्भुत: आश्चर्यकर: आसीदिति व्यज्यते ।

नलराज: शत्रूणां परराष्ट्रराजानां गतिविधीन् ज्ञातुं दूतानां चराणां वा नियोजनमकार्षीदिति श्रीहर्षेण उक्तम् । तदर्थं कविना नलस्य कृते 'चारदृक्" इति विशेषणं प्रयुक्तम् । "राजान: चारचक्षुष:" इति शास्त्रवचनेन चार: गुप्तचर: दृक् नेत्रं यस्य स: चारदृक् ।

स: तथा प्रतापशाली आसीद्येन भीत्या सर्वेऽपि बाह्यराष्ट्रस्य शत्रव: तथा च राज्यान्तर्भ्रष्टाचारिण: अनीतिमूलकानि कार्याणि त्यक्तवन्त:। स: स्वप्रतापेन तेजसा अमित्रजित् मित्रजिच्च आसीत्। अमित्रं नाम शत्रु:। मित्रं नाम सूर्य:। सूर्यसदृश: स: प्रतापशाली नल: सर्वेषामपि शत्रूणां दमनाय दण्डनाय समर्थ: आसीदित्यर्थ:। अपि च कविना: पुन: तस्य कृते 'विचारदृक्" इति विशेषणं प्रयुक्तम्। विचारपूर्वकं न्यायप्रणालीं य: चालयति धर्माधर्मौ य: विचारयति, कृत्याकृत्यविवेको यस्य भवति स: विचारदृगित्युच्यते। एवं नलस्य कृते प्रदत्तानि सर्वाणि विशेषणानि तस्य शक्तिमत्त्वम्, गुणवत्त्वम्, न्यायशीलत्वं च प्रकाशयति। कवे: भाषया -

**प्रतीपभूपैरिव किं ततो भिया**

**विरुद्धधर्मैरपि भेत्तृतोज्झिता ।**

**अमित्रजिन्मित्रजिदोजसा स यत्-**

**विचारदृक्चारदृगप्यवर्तत ।।**[९]

**शत्रुदमनं शरणापन्नरक्षणञ्च -**

नैषधीयचरिते शत्रुराजानां कृते कठोरव्यवहारस्य उल्लेख: अस्ति। ये अनैतिकतया राजान: नलराजेन सह शत्रुतामकुर्वन् ते नरेशा: नलेन विनिपातिता: तथा च तेषां नगराणि दग्धानि अक्रियन्त। श्रीहर्ष: अस्मिन् सन्दर्भे नलस्य विशेषणरूपेण 'राजघ:' इति शब्दं प्रयुक्तवान्। अस्यार्थो भवति 'शत्रुभूपालघातक" इति। तस्य ये शत्रव आसन् तान् विनाश्य तेषां नगराण्यपि अयं भस्मीकृतवान् निजप्रतापेन। कवि: लिखति यत् शत्रूणां दग्धनगरवह्निना अयं नलराज: नीराज: अभूदिति। तद्धि -

**अनन्यदग्धारिपुरानलोज्ज्वलै-**

**र्निजप्रतापैर्बलयज्ज्वलद्भुव: ।**

**प्रदक्षिणीकृत्य जयाय सृष्टया**

**रराज नीराजनया स राजघ: ।।**[१०]

न केवलं तथा अपि तु शत्रुराजस्य सर्वा अपि सम्पत्तय: नलेन कवलीक्रियन्ते स्म । यथोक्तं कविना -

**अमुष्यदोर्भ्यामरिदुर्गलुण्ठने**

**ध्रुवं गृहीतार्गलदीर्घपीनता ।**

**उर:श्रिया तत्र च गोपुरस्फुरत्-**

**कपाटदुर्धर्षतिर:प्रसारिता ।।**[११]

अत्र "अरिदुर्गलुण्ठने" इति शब्दात् शत्रुसम्पद्धरणविषय: द्योत्यते। ये शत्रव: राजान: नलस्य कृपाणबलेन अधीनस्था: आसन् नल: तेभ्य: करमपि संगृहीतवान्। युद्धसमये शरणागतेभ्य: शत्रुभ्य: जीवनदानं नलेनाक्रियत। अपि च ये तस्य विपरीताचरणं चक्रु: तेषां दमनं तेन विहितम्। तदुक्तं कविना-

**न पाहि पाहीति यदब्रवीरमुं**

**ममौष्ठ तेनैवमभूदिति क्रुधा ।**

**रणक्षितावस्य विरोधिमूर्धभि-**

**र्विदश्य दन्तैर्निजमोष्ठमास्यते ।।**[१२]

मिथिलानरेशः विरोधिशत्रूणां शिरः कर्तयित्वा दण्डं दत्तवान् आसीत् तथा शरणागतानां रक्षणमकार्षीदिति अस्मिन् श्लोके भङ्ग्यन्तरेणोच्यते। ये तु शरणापन्नाः बभूवुः तेषां नलेन रक्षितानि, अपि च तेषामोष्ठानि च रक्षितानि। एवमतीवाद्भुतरीत्या श्रीहर्षः शत्रुदण्डनस्य शरणापन्नरक्षणस्य विषयः अस्मिन् श्लोके उपस्थापितः।

**प्रशासननियन्त्रणम् -**

नैषधीयचरितमहाकाव्यस्य परिशीलनेन तत्कालीनराजकीयप्रशासनं कथं नियन्त्रितं सुदृढं सुरक्षितं स्वच्छं सुस्थञ्चासीत् तत् ज्ञातुं शक्यते। राजा पक्षपातं विना न्यायं प्रजापलनञ्च अकरोत्। श्रीहर्षः श्लेषमुखेन अग्नेः तथा नलस्य साम्यं प्रदर्श्य अमुं विषयमुपस्थापयति। दमयन्त्याः स्वयंवरसभायाम् अग्निसमेताः नैके देवाः अपि च नलोऽपि तत्र उपस्थिताः आसन्। दमयन्तीं पुरस्कृत्य सरस्वती अग्निगुणसाम्येन नलगुणान् उपस्थापयति। यथा-

**एतन्मुखा विबुधसंसदसावशेषा**

**माध्यस्थ्यमस्य यमतोऽपि महेन्द्रतोऽपि ।**

**एवं महस्विनमुपेहि सदारुणोच्चै-**

**र्येनामुना पितृमुखि ! ध्रियते करश्रीः ।।**[१३]

अत्र दमयन्त्याः कृते सरस्वती 'पितृमुखि' इति सम्बोधनं करोति। अनेन सा अतीवसौभाग्यशालिनी भवति यस्याः कृते नलसदृशः न्यायवान् पुण्यश्लोकः राजा स्वयंवरे समागतः सभायां वर्तते। सामुद्रिकशास्त्रानुसारेण यस्याः कन्यायाः मुखं पितृतुल्यं भवति सा अतीव सुखिनी भाग्यवतीत्युच्यते, अपि च मातृतुल्यं मुखं यदि पुत्रस्य भवति तर्हि सः भाग्यवान् भवति। यथोच्यते- 'धन्या पितृमुखी कन्या धन्यो मातृमुखो सुतः' इति ।

नीतिव्यवस्थायां मन्त्रिपरिषत् –

राज्ञः नलस्य सहयोगार्थं तस्मिन् समये मन्त्रिपरिषदपि आसीत्। मन्त्रिणां तेषां परामर्शानुसारेण प्रशासनं प्राचलत्। यथोच्यते श्रीहर्षेण -

**अथ नगरधृतैरमात्यरत्नैः पथि**

**समियाय स जाययाभिरामः ।**

**मधुरिव कुसुमश्रिया सनाथः**

**क्रममिलितैरलिभिः कुतूहलोत्कैः ॥**[१४]

अन्तरपराधिनां कृते दण्डव्यवस्था –

महाराजस्य नलस्य दण्डव्यवस्था अत्यधिकतया कठोरा आसीत् । अत: भयवशात् कोऽपि शत्रु: मित्रं वा तस्य प्रशासने अपराधं कर्त्तुं दु:साहसं नाकरोत् । तद्वर्ण्यते श्रीहर्षेण -

**दण्डं बिभर्त्यंयमहो जगतस्तत: स्या-**

**त्कम्पाकुलस्य सकलस्य न पङ्कपात: ।**

**स्ववैंद्ययोरपि मदव्ययदायिनीभि-**

**रेतस्य रुग्भिरमर: किमु कश्चिदस्ति ॥**[१५]

अत्र यम-नलयो: साम्यं प्रदर्श्य कवि: श्रीहर्ष: नलस्य दण्डव्यवस्था उपस्थाप्यते। यमपक्षे - अयं यम: दण्डं स्वायुधं बिभर्त्ति। तस्मात् कारणात् सकलस्य जगत: पङ्कपात: न जायते। यमदण्डभयेन सर्वेऽपि धर्ममार्गेणैव चलन्ति। कुत्रापि अन्याय: पापाचरणम् अपराधो वा न भवति। एतद्भयात्पापं न कोऽपि करोतीत्यर्थ:। अयं यम: स्ववैंद्ययो: अश्विनीकुमारयो: अपि गर्वं क्षीणं करोति। तेन प्राणिन: कर्मविपाकानुसारेण निर्धारितेभ्य: रोगेभ्य: मृत्युकाले समुपस्थिते मुक्ता: भवितुं नार्हयन्ति। अश्विनीकुमारावपि मृत्युकालसमुपस्थिते सति जनान् रोगमुक्तान् कर्त्तुं न प्रभवत: ।

नलपक्षे - अयं नल: दण्डं शासनं यतो बिभर्त्ति तस्मात्कम्पाकुलस्य सकलस्यापि लोकस्य एन:पातो न भवति। अयं दण्डं चतुरङ्गसैन्यं बिभर्त्ति इति कारणात् शत्रव: तस्य प्रजानामुपरि आक्रमणं कर्त्तुं साहसं न कुर्वन्ति। तेन लोका: दु:खेषु न पतन्ति। अस्य दण्डधारणेन संसारे कोऽपि अधर्माचरणं न करोति। अपि च प्रजा: सुखेन कालं यापयन्ति।

**उपसंहारः** –

महाकविश्रीहर्षविरचितनैषधीयचरितं यद्यपि साहित्यशास्त्रप्रधानग्रन्थः तथापि महाकाव्येऽस्मिन् नैके विषयाः यथा - वेद:, आयुर्वेद:, दर्शनम्, नीतिशास्त्रम्, ज्योतिषम् इत्यादयः प्राप्यन्ते। एवमेव राजनीति-दण्डनीतिसम्बद्धा: विषया: अपि नैषधीयचरिते प्राप्यन्ते। विशिष्टतया अत्र राजनेता, प्रशासक:, प्रशासनव्यवस्था, प्रजा:, मन्त्रिपरिषत्, मन्त्रणा, बाह्यशत्रु:, अन्त:शत्रु:, शत्रूणां दमनोपाय:, अपराधनिराकरणशैली, दण्डनीति: अथवा दण्डसंहिता इत्यादीनां विषये विहङ्गावलोकनं कृतं वर्तते ।

## पादटीकाः

१. म.स्मृ. ८/१२८

१३. नै.च. - १३/१२

१४. नै.च. - १६/१२४

१५. नै.च. - १३/१६

२. कौटि.अ. - १/१३/९

३. का.नी.सा. - १/१/९-१०

४. नै.च. - १/१

५. का.नी.सा. - १/१/२०

६. तत्रैव - १/१/२१-२६

७. नै.च. - १/६

८. नै.च. - १/२

९. नै.च. - १/३

१०. नै.च. १/१०

११. तत्रैव - १/२२

१२. नै.च. - १२/६३

## सन्दर्भग्रन्थाः

१) कामन्दकीयनीतिसार: (शङ्करार्यकृतया जयमङ्गलाख्यया व्याख्यया समेत:) - सम्पादक: - टी.गणपतिशास्त्री, महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन राजकीयमुद्रणयन्त्रालये मुद्रयित्वा प्रकाशित:। संस्करणम्-१९१२।

२) कौटिल्यार्थशास्त्रम् - व्याख्याकार: - वाचस्पति गैरोला, चौखम्बाविद्याभवनम्, वाराणसी, संस्करणम् – १९६२।

३) नैषधीयचरितम् - श्रीहर्ष:, पाण्डुरङ्ग जवाजी प्रोपाइटर् अफ् निर्णयसागरप्रेस, संस्करणम् – १९१९।

४) नैषधीयचरितम् (नन्दहिन्दीटीकासमेतम्) - डा.श्यामलेशकुमारतिवारी। चौखम्बा सुरभारती प्रकाशनम्, वाराणसी। संस्करणम् – २०१७।

५) मनुस्मÉति: (कुल्लूकभट्टटीकासहितम्), सम्पादक: - पं.हरगोविन्दस्वामी, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, १९७०।

# श्रीमद्भागवतमहापुराणे योगदर्शनम्

**डॉ. अरविन्दकुमारपाण्डेयः**

प्रवक्ता (संस्कृत) राजा हरपालसिंह इण्टर कॉलेज,

सिंगरामऊ, जौनपुर, उ.प्र.

**परिचयः -**

आस्तिकदर्शनेष्वन्यतमस्य 'सेश्वरसाङ्ख्यम्-साङ्ख्यप्रवचनम्' इत्याद्यपरनामधेयस्य योगदर्शनस्य महत्त्वम् अपरोक्षमस्ति विदुषाम् । प्रायः सर्वेषु दर्शनेषु योगस्य स्वीकारो वर्तते। योगस्य विवेचनं चर्चा च विपुलतया संहिताग्रन्थेषु, ब्राह्मणग्रन्थेषु, उपनिषत्सु पुराणेषु च प्राप्यते ।

**'विद्यावतां भागवते परीक्षा'** इति वचनात् भागवतस्य माहात्म्यं सुस्पष्टमस्ति । भागवते नैकविषयणां वर्णनं वर्तते। नैकत्र योगदर्शनस्य विषयाः अपि वर्णिताः। अत्र लेखे श्रीमद्भागवतपुराणे वर्णिताः योगदर्शनांशाः प्रस्तोष्यन्ते । ततः योगदर्शने येन रूपेण तेंऽशाः यथा प्रतिपादिताः सन्ति तथैव पुराणेऽस्मिन् अपि प्रतिपादितन वेति परीक्षणं करिष्यते ।

**सङ्केताक्षरसूची**

पुराणानि, दर्शनम्, आस्तिकदर्शनं, नास्तिकदर्शनं, योगदर्शनं, योगाङ्गानि, यमाः, अहिंसा, सत्यम्, अस्तेयः, ब्रह्मचर्यम् ग्रहः।

**पातञ्जलयोगः-**

योगशास्त्रप्रवर्तकत्वेन हिरण्यगर्भस्य समुल्लेखः क्रियते । तथाहि- **"हिरण्यगर्भो योगस्य वक्ता नान्यः पुरातनः"**[1] । हिरण्यगर्भसूत्राण्याश्रित्य पतञ्जलिना योगदर्शनं निरमायि। इदानीं हिरण्यगर्भसूत्रं नोपलब्धमस्ति। अतएव सम्प्रति योगदर्शनस्य प्रवर्त्तकत्त्वेन महर्षिपतञ्जलिः प्रसिद्धोऽस्ति। महर्षिपतञ्जलिः पादचतुष्टयात्मकं योगसूत्रं प्रणिनाय। महर्षिपतञ्जलयः व्याकरणमहाभाष्यं चरकसंहिताञ्च रचयाञ्चक्रुः। सन्दर्भेऽस्मिन् श्लोकोऽयम् अत्यन्तं प्रसिद्ध्यति-

**योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन।**

**योऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि ।।**[2]

**योगशब्दार्थः-**

पाणिनीयधातुपाठे युजिर्-योगे, युज्-समाधौ च इति धातुद्वयं वर्तते। परम्परानुसारं योगशब्दस्य निष्पत्तिः युजिर्-समाधौ इति धातोः भवति। तस्माद् योगस्य व्युत्पत्तिलभ्योऽर्थः 'समाधि' इति भवति। अत्रापि समाधिपदेन निर्विकल्पकसमाधेरेव ग्रहणं बोध्यम् । महर्षिपतञ्जलिना योगस्य लक्षणं कुर्वता प्रोक्तम् – “योगश्चित्तवृत्तिनिरोधः”[3] इति। एतदनुसारम् अयं चित्तवृत्तिनिरोध एव समाधिः। योगदर्शनस्य इदमेव लक्ष्यं वर्तते यत् केन प्रकारेण मनुष्यः चित्तवृत्तिनिरोधात्मकं समाधिमवाप्नुयादिति। मन-बुद्धि- अहङ्काराः चित्तपदेन व्यपदिश्यन्ते। निर्विकल्पकसमाधौ चित्तस्य काऽपि वृत्तिर्न भवति। अस्य चित्तवृत्तिनिरोधस्य किं साधनमस्तीति चिन्तनमेव योगदर्शनस्य मुख्यं प्रतिपाद्यं विद्यते। दर्शनमिदं चिन्तनेन सह व्यवहारपक्षस्य प्रामुख्यं प्रदर्शयति। अतोऽत्र न केवलं विचार एव परिगृहीतो भवति अपितु व्यवहारे कथमस्योपयोगः स्यादिति बुद्धिः प्रामुख्येन समागच्छति।

**पातञ्जलयोगसूत्रम् –**

पातञ्जलयोगसूत्रं चतुर्षु भागेषु विभक्तं वर्तते। तद्यथा समाधिपादः, साधनपादः, विभूतिपादः, कैवल्यपादः। एषां परिचयस्त्वित्थमस्ति।

**समाधिपादः -**

अस्मिन् पादे 51 सूत्राणि सन्ति । अत्र पादे ‘अथ योगानुशासनम्’ इति सूत्रेण योगशास्त्रप्रतिज्ञां कृत्वा ‘योगश्चित्तवृत्तिनिरोधः’ इति सूत्रेण योगलक्षणमभिहितम् ।

**साधनपादः**

अयं योगदर्शनस्य द्वितीयीपादः। अस्मिन् पादे 55 सूत्राणि सन्ति। अत्र ‘तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः’ इति सूत्रेण क्रियायोगः प्रदर्शितः। ततः अष्टाङ्गयोगेषु बहिरङ्गयोगानां यम-नियम-आसन-प्राणायाम्-प्रत्याहाराणां निरूपणं वर्तते ।

**विभूतिपादः -**

अस्मिन् पादे 55 सूत्राणि सन्ति। तृतीये पादेऽस्मिन ‘देशबन्धचित्तस्य धारणा’ इति सूत्रेण आरभ्य धारणा-ध्यान-समाधित्रयमन्तरङ्गं योगं संयमपदवाच्यं न्यरूपयत्। ततः एषाम् अवान्तरफलानां प्रतिपादनं वर्तते ।

**कैवल्यपादः**

अस्मिन् पादे 34 सूत्राणि सन्ति। चतुर्थे पादेऽस्मिन् 'जन्मोषधिमन्त्रतपः समाधिजाः सिद्धयः' इत्यादिसूत्रेण सिद्धिपञ्चकप्रपञ्चनपुरस्सरं योगदर्शनस्य परमं प्रयोजनं कैवल्यं न्यरूपि।

**अष्टाङ्गयोगः**

योगो नाम निर्विकल्पकसमाधिः। मनुष्यः कया रीत्या निर्विकल्पकसमाधिं प्राप्नुयाद् इति जिज्ञासायां योगदर्शने अष्टौ सोपानानि परिकल्पितानि। एतानि सोपानान्येव अष्टाङ्गयोगपदेन व्यवहृतानि भवन्ति। निर्विकल्पकसमाधेः अष्ट अङ्गान्येतानि योगसूत्रे परिगणितानि सन्ति -

**"यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयोऽष्टावङ्गानि"** (2/29)

**श्रीमद्भागवते अष्टाङ्गयोगः-**

श्रीमद्भागवतेऽपि योगस्य अष्टावङ्गानि प्रतिपादितानि सन्ति। यद्यप्येतान्यङ्गानि एकत्र न सन्ति परन्तु विभिन्नस्थलेषु सन्त्येव। श्रीमद्भागवते भक्त्या सह अष्टाङ्गयोगस्य प्रचुरवर्णनमस्ति। महापुरुषाणां तपश्चरणप्रसङ्गे शरीरत्यागप्रसङ्गे च वर्णनमिदं कुत्रचित्साक्षाद्वर्तते कुत्रचिच्च अप्रत्यक्षतया सङ्केतमाध्यमेन दृश्यते। श्रीमद्भागवते यत्र कस्यचित् तपसो वर्णनं भवति तत्र प्रसङ्गे योगस्य सङ्केतः प्राप्यते। तथैव यत्र कोऽपि व्यक्तिः योगमार्गमवलम्ब्य भौतिकशरीरं जहाति तत्रापि योगस्य सङ्केतो विद्यत एव। श्रीमद्भागवते विशेषतः त्रिषु स्कन्धेषु योगविवरणं विपुलतया प्राप्तं भवति। तथाहि द्वितीये स्कन्धे प्रथमे तथा द्वितीयाध्याये तृतीये स्कन्धे एवम् एकादशे स्कन्धे योगस्य विशदं वर्णनं वर्तते।

**यमः-**

यम्यन्ते निवर्त्यन्ते विषयेभ्यो मनसेन्द्रियाणीति यमाः। विषयेभ्यो मनसः पृथक्करणमेव यमस्य प्रयोजनम्। अतो यमो निषेधपरकोऽस्तीति न तु विधिपरः। योगदर्शने यमस्य पञ्चप्रकारा परिगणितास्सन्ति–

**यमः – "अहिंसा-सत्य-अस्तेय-ब्रह्मचरय्-अपरिग्रहाः यमाः" (2/30)**

**अहिंसा -**

अहिंसा नाम हिंसायाः परिवर्जनम्। सत्यं यथार्थे वाङ्गनसे। स्तेयमशास्त्रपूर्वकं द्रव्याणां परतः स्वीकरणम्। ब्रह्मचर्यं गुप्तेन्द्रियस्योपस्थस्य संयमः। विषयाणामर्जनरक्षणक्षयसङ्गहिंसादोषदर्शनादस्वीकरणमपरिग्रहः। इत्थं यमस्य पञ्चविधस्य लक्षणानि सामान्यतया व्यासभाष्ये प्रतिपादितानि सन्ति।

**यमस्य द्वादश भेदाः** - अष्टाङ्गयोगस्य प्रथमभेदोऽस्ति यम इति। पातञ्जलयोगे अस्य पञ्च भेदाः प्रतिपादिताः सन्ति। श्रीमद्भागवते यमस्य द्वादश भेदाः प्रोक्ताः सन्ति। तथा च श्लोकः

**अहिंसा सत्यमस्तेमसङ्गो ह्रीरसञ्चयः।**

**आस्तिक्यं ब्रह्मचर्यञ्च मौनं स्थैर्यं क्षमाभयम् ।।**[4]

अर्थात् -

1. अहिंसा
2. सत्यम्
3. अस्तेयम्
4. असङ्गः
5. ह्रीः
6. असञ्चयः
7. आस्तिक्यम्
8. ब्रह्मचर्यम्
9. मौनम्
10. स्थैर्यम्
11. क्षमा
12. अभयम्

इमे द्वादश यमाः सन्ति। अत्र अहिंसा, सत्यम्, अस्तेयम्, ब्रह्मचर्यम्, अपरिग्रह इति पञ्च पातञ्जलदर्शनप्रोक्ताः सन्ति। सप्त तदतिरिक्ताः यमाः भागवते वर्णिताः दृश्यन्ते। श्रीमद्भागवते यमानां विस्तृतं स्वरूपं निगदितं वर्तते।

**नियमः – "शौच-सन्तोष-तपः-स्वाध्याय-ईश्वरप्रणिधानानि नियमाः" (2/32)** नियमस्य प्रकाराणां लक्षणानि इत्थं विवेचितानि सन्ति व्यासभाष्ये तत्र शौचं मृज्जलादिजनितं मेध्याभ्यवहरणादि च बाह्यम्,

आभ्यन्तरं चित्तमलानामाक्षालनम्। सन्तोषः सन्निहितसाधनादधिकस्यानुपादित्सा। तपो द्वन्द्वसहनम्। स्वाध्यायो मोक्षशास्त्राणामध्ययनं प्रणवजपो वा। ईश्वरप्रणिधानं तस्मिन् परमगुरौ सर्वकर्मार्पणम् ।

**नियमस्य द्वादश भेदाः -**

**शौचं जपस्तपो होमः श्रद्धातिथ्यं मदर्चनम् ।**

**तीर्थाटनं परार्थहा तुष्टिराचार्यसेवनम् ।।**[5]

1. बाह्यशौचम्
2. आभ्यान्तरशौचम्
3. जपः
4. तपः
5. होमः
6. श्रद्धा
7. आतिथ्यम्
8. भगवदर्चनम्
9. तीर्थाटनम्
10. परार्थचेष्टा
11. तुष्टिः
12. आचार्यसेवनम्

इमे द्वादश नियमाः सन्ति। नियमेषु शौच सन्तोष-तपः-स्वाध्यायेश्वरप्रणिधानानीति पञ्च नियमाः योगदर्शनोक्ताः सन्ति । सप्त नूतनाः नियमाः भागवते विद्यन्ते ।

**आसनम् –**

**आसनम्- "स्थिरसुखमासनम्" (2/46)**

आस्यते अनेन इति आसनम् । यद् स्थिरं निश्चलं सुखकारि च वर्तते तदासनम्। अस्य सिद्धिः

प्रयत्नशैथिल्येन अनन्तसमापत्त्या च भवति। उक्तञ्च योगसूत्रे महर्षिणा पतञ्जलिना- **प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम्।**

आसनं योगस्य तृतीयाङ्गं वर्तते। आसनस्य कृते शुद्धं पवित्रम् एकान्तमयं वातावरणमपेक्षितं भवति। श्रीमद्भागवते बहून्यासनानि कथितानि सन्ति।

**शुचौ देशे प्रतिष्ठाप्य विजितासन आसनम्।**

**तस्मिन् स्वस्ति समासीन ऋजुकायः समभ्यसेत्।।**[6]

आसनात्पूर्वं धीरपुरुषः गृहान्निर्गतः पुण्यतीर्थजले स्नानं विधाय शुद्धस्थाने एकान्ते च आसीनो भवेत् ।

तथा च श्लोकः -

**गृहात् प्रव्रजितो धीरः पुण्यतीर्थजलाप्लुतः।**
**शुचौ विविक्त आसीनो विधिवत् कल्पितासने ४।।**[7]

**प्राणायामः-**

**प्राणायामः - "तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः"(2/49)**

तस्मिन् आसने सिद्धे सति श्वासप्रश्वासयोः गतिर्विच्छेदश्च प्राणायाम उच्यते। अत्र बहिर्भूतस्य वायोराचमनं श्वासः, गृहीतस्य वायोः निःसारणं प्रश्वासो निगदितो विद्यते ।

प्राणायामश्चतुर्थं योगाङ्गम्। पूरककुम्भकरेचकैः प्राणमार्गः शोधनीय इति भागवते प्रतिपादितम् अस्ति।

**प्राणस्य शोधयेन्मार्गं पूरककुम्भकरेचकैः।**[8]

प्राणायामस्य द्वैविध्यं पुराणेषु प्रतिपादितं दृश्यते। प्रथमोऽस्ति अगर्भप्राणायामः, अपरोऽस्ति सगर्भप्राणायामः। तत्र जपं ध्यानं च विना य प्राणायामो भवति सः अगर्भो भवति। यत्र जपध्यानयोः समन्वयो भवति तत्र सगर्भः प्राणायाम इति ज्ञेयम् ।

**अगर्भश्च सगर्भश्च प्राणायामो द्विधा स्मृतः ।**

**जपं ध्यानं विनाऽगर्भः सगर्भस्तत्समन्वयात् ।।**[9]

इदानीं विचार्य्यते यत् कः प्राणायामः श्रेष्ठः ? अगर्भः सगर्भो वा? अत्रोच्यते अगर्भात्प्राणायामाद्गर्भसंयुक्तः प्राणायामः शताधिको भवति। अतश्च योगिनः सगर्भप्राणायाममेव कुर्वन्ति। एतत्सर्वं विष्णुपुराणे त्वित्थमस्ति-

**अगर्भाद् गर्भसंयुक्तः प्राणायामः शताधिकः ।**

**तस्मात्सगर्भं कुर्वन्ति योगिनः प्राणसंयमम् ।।[10]**

**प्रत्याहारः**

**प्रत्याहारः – "स्वविषयासंप्रयोगे चित्तस्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः" (2/54)**

इन्द्रियाणां स्वविषयैः सह संयोगाभावे यश्चित्तस्वरूपानुकारो भवति स एव प्रत्याहारपदेन अभिधीयते ।

**नियच्छेद्विषयेभ्योऽक्षान् मनसा बुद्धिसारथिः।[11]**

**इन्द्रियाणीन्द्रियार्थेभ्यो मनसाकृष्य तन्मनः । बुद्ध्या सारथिना धीरः प्रणयेन्मयि सर्वतः ।।[12]**

**धारणा-**

**धारणा - "देशबन्धचित्तस्य धारणा" (3/1)**

देशे बन्धः देशबन्धः। चित्तस्य देशविशेषे धारणं स्थापनमेव धारणा। के च ते देशविशेषा इति चेद् नाभिचक्रादय ति। नाभिचक्रादिषु स्थलेषु चित्तस्य धारणमेव धारणा इत्युच्यते ।

सामान्यतो मनसः एकस्मिन् वस्तुनि स्थिरीकरणमेव धारणाशब्देन व्यवह्रियते। श्रीमद्भागवते धारणायाः भेदद्वयमस्ति। 1. वैराजधारणा 2. अन्तर्यामिधारणा च । श्रीमद्भागवतस्य द्वितीये स्कन्धे प्रथमाध्याये भगवतो विराडूपस्य साङ्गोपाङ्गं विस्तृतञ्च वर्णनं वर्तते। इदं वर्णनं पाठं पाठं भगवतः स्वरूपं समक्षं भवति। स्थूलरूपत्वात् तत्र मनसः एकाग्रता सुलभा। इयं वैराजधारणा भवति। यदा मूर्तरूपे धारणा सिद्धा भवेत्तदा साधकः अमूर्तरूपस्य धारणाङ्कुर्यात् । इयं धारणा अन्तर्यामिधारणेत्युच्यते। अस्याः सुन्दरं स्वरूपं भागवते प्राप्यते। तद्यथा -

**हृत्पुण्डरीकमन्तः स्थमूर्ध्वनालमधोमुखम्**

**ध्यात्वाध्र्वमुखमुन्निद्रमष्टपत्रं सकर्णिकम् ।।**

**कर्णिकायां न्यसेत् सूर्यसोमाग्नीनुत्तरोत्तरम् ।**

**वह्निमध्ये स्मरेद्रूपं ममैतद्ध्यानमङ्गलम् ।।[13]**

**ध्यानम् -**

**ध्यानम् – "तत्र प्रत्ययैकतानता ध्यानम्" (3/2)**

अत्र तत्रेति पदं पूर्वस्य परामर्शकः। तत्रपदेन धारणाप्रदेशस्य ग्रहणं कार्यम्। धारणाप्रदेशे चित्तस्य ऐकाग्रीकरणमेव ध्यानम्। अत उक्तं भाष्यकारेण तस्मिन्देशे ध्येयालम्बनस्य प्रत्ययस्यैकतानता सदृशः प्रवाहः प्रत्ययान्तरेणापरामृष्टो ध्यानमिति ।

श्रीमद्भागवते ध्यानस्य विस्तृतं वर्णनं वर्तते । यावत्पर्यन्तं हृदि भगवतः समग्रस्य शरीरस्य सम्यक् धारणा स्थिरतां न यातु तावत्पर्यन्तं भगवतः प्रत्येकमङ्गस्य ध्यानं कुर्याच्छाधकः। अङ्गानां ध्यानक्रमविषये कथितं वर्तते – 'पादादियावत् हसितं गदाभृतः'। चरणादारभ्य हसन्तं मुखं यावत् ध्यानं करणीयमित्याशयः। एतत्सर्वमित्थं वर्णितम्

**सञ्चिन्तयेद् भगवतश्चरणारविन्दं**

**वज्राङ्कुशध्वजसरोरुहलाञ्छनाढ्यम् ।**

**उत्तुङ्गरक्तविलसन्नखचक्रवाल-**

**ज्योत्स्नाभिराहतमहद्धृदयान्धकारम्।।** [14]

**ध्यानं प्रहसितं बहुलाधरोष्ठ**
**भासारुणायिततनुद्विजकुन्दपङ्क्ति ।**

**ध्यायेत् स्वदेहकुहरेऽवसितस्य विष्णोर्**

**भक्त्यार्द्रयार्पितमना न पृथग्दृदिक्षेत् ।।**[15]

**समाधिः-**

**समाधिः – "तदेवार्थनिर्भासं स्वरूपशून्यमिव समाधिः"(3/3)** ध्यानस्य सर्वोच्चावस्था एव समाधिरुच्यते। ध्याने ध्याताध्यानध्येयानामाभासो भवति परञ्च समाधौ केवलमेव ध्येयस्यैव प्रतीतिः जायत इति द्वयोर्भेदः ।

**समाधेः द्वैविध्यम् -**

निर्विकल्पक-सविकल्पकभेदेन समाधेर्भवति द्वैविध्यम् । तत्र निर्विकल्पकसमाधिः साध्यम् अस्ति एवञ्च सविकल्पकसमाधिः साधनं वर्तते ।

**एवं हरौ भगवति प्रतिलब्धभावो**
**भक्त्या द्रवद्धृदय उत्पुलकः प्रमोदात् ।**

**औत्कण्ठ्यबाष्पकलया मुहुरर्धमानस्**
**तच्चापि चित्तबडिशं शनकैर्वियुङ्क्ते॥**[16]

**निष्कर्षः**

श्रीमद्भागवतमहापुराणे प्रायः सर्वाण्येव दर्शनानि चर्चितानि सन्ति। अतो विद्यावतां भागवते परीक्षा इति वचनं सङ्गच्छते। योगदर्शनस्यापि तत्र महत् विवेचनं दरीदृश्यते। तत्र विवेचने कुत्रचिद् साम्यं कुत्रचिच्च वैषम्यमवलोक्यते। यथा योगदर्शने पञ्चयमाः प्रतिपादिताः सन्ति परञ्च श्रीमद्भागवतमहापुराणे यमस्य नियमस्य च द्वादशभेदाः कृतास्सन्ति। वस्तुतः एतेषां द्वादशभेदानां तेषु पञ्चयमेषु नियमेषु एव अन्तर्भावो भवति। यमानां नियमानां च योगसिद्धौ प्रारम्भिकसोपानत्वात् एतेषां सम्यक् विवेचनमावश्यकमिति अभिलक्ष्य भागवते बृहत् विवेचनं विधाय द्वादश भेदाः विधायिषत महर्षिणा वेदव्यासेन।

· श्रीवास्तवः, डा. सुरेशचन्द्रः, पातञ्जलयोगदर्शनम्, चौखम्बा सुरभारती- प्रकाशनम्, वाराणसी, 1988

· भट्टाचार्यः डा. रमाशंकर, सिंहः डा. अमलधारी, पातञ्जलयोगसूत्रम्, भारतीय विद्या प्रकाशनं वाराणसी, 1997

**पादटीकाः**

1 योगियाज्ञवलक्य-12/5, शान्ति-349/65

2 प्रसिद्धश्लोकः

3 योगसूत्रम्-1-2

4 श्रीमद्भागवतमहापुराणम्, 11/19/33

5 श्रीमद्भागवतमहापुराणम्, 11/19/34

6 श्रीमद्भागवतमहापुराणम्, 3/28/8

7 श्रीमद्भागवतमहापुराणम्, 02/01/96

8 श्रीमद्भागवतम्, 3/28/9

9 शिवपुराणम्

10 विष्णुपुराणम्, 6/7/40

11 श्रीमद्भागवतम्, 2/1/18 पू.

12 श्रीमद्भागवतम्, 11.14.42

13 श्रीमद्भागवतम् – 13.14.36-37

14 श्रीमद्भागवतम् - 3/28/21

15 श्रीमद्भागवतम् - 3/28/33

16 तत्रैव 3.28.34

**सन्दर्भग्रन्थाः**

1. · पतञ्जलिः, योगदर्शनं, गीताप्रेस, गोरखपुरम्,
2. गोयन्दका, हरिकृष्णदासः, योग-दर्शनं, गोविन्दभवन-कार्यालयः, गीताप्रेस, गोरखपुरम्, 2007

3. आर्य- सतीशः, पातञ्जलयोगदर्शनं, वेद-विश्वायतनम्, 2010
4. स्वामी, श्री विज्ञानाश्रमः, योग-दर्शनम्, आर्ष गुरुकुल-महाविद्यालयः, 2020
5. चतुर्वेदी, गिरिधरशर्मा. पुराणपरिशीलनम्, 1970, बिहार- राष्ट्रभाषा परिषद् पटना।
6. महर्षिव्यासः, श्रीमद्भागवतमहापुराणम्, गीताप्रेस-गोरखपुरम् ।
7. भट्टाचार्यः रामशङ्करः (सम्पादकः), पातञ्जलयोगदर्शनम्, व्यासभाष्यतत्त्ववैशारदीसहितम्, भारतीयविद्याप्रकाशनं वाराणसी।
8. आप्टे - वामन- शिवरामः, संस्कृत-हिंदी-कोशः, मोतीलाल- बनारसीदास प्रकाशनं, देहली, 1969
9. आचार्यः यास्कः, निरुक्त-पंचाध्यायी, शास्त्री म.म. श्री पं. छज्जूराम विद्यासागरः (व्याख्याकार) मेहरचंद-लछमनदासः, दरियागंज, नवदेहली, 2015

**कोशग्रन्थाः**

1. सिंहः श्री अमरः, अमरकोशः, शास्त्रि-वासुदेवः (सं.), चौखम्बा संस्कृत-सीरीज आफिस, वाराणसी, 2003

**इंटरनेट स्त्रोत -**

1. विकिस्रोतः विषय/संस्कृत - विकिस्रोत (wikisource.org)
2. https://sanskritdictionary.com/?iencoding=iast&q=%E0%A4%97%
3. E0%A5%8D%E0%A4%B0%E0%A4%B9%E0%A4%A3+&lang=sa
4. ns&action=%E0%A4%96%E0%A5%8B%E0%A4%9C
5. http://iloveindia.com/literature/sanskrit/index.html
6. http://questia.com/search/sanskrit-literature

# अग्नेः रहस्यनिरुपणम्

**डॉ. जगमोहन आचार्यः**

संस्कृतविभागमुख्यः,

खड्गपुरमहाविद्यालयः, पश्चिमवङ्गः

संस्कृतेऽग्निः लातिन भाषायाम् इग्निस्, लिथुअनियन भाषायाम् उग्निस् स्लावीभाषायाम् ओग्नीति कथ्यते। [१] लिथुआनियन जातौ अग्निविशिष्टं सम्मानास्पदं पूजापात्रं च आसीत्। गृहेषु विनिर्मितासु वेदिकासु अग्निः प्रज्वलितासीत्। रोमदेशे वेदिकायाः देवी वेस्ता नाम्नाप्रसिद्धा। इयं खलु एकस्मिन् वृत्ताकारे मन्दिरे पूज्यते स्म। देवालयेषु अस्याः समर्चनायै अविवाहिता काचिद्धराधिका नियोज्यते स्म।[२] अग्निप्रज्वलनस्य पराम्परावत् यदां मन्दिरेषु स्थापितोऽग्निः उपशमं गच्छति स्म तदा काष्ठेन तथैव प्रज्वाल्यते। ग्रिकाग्निरूपेण हेस्तिया रोमवेस्ता इत्यस्य प्रतिरूपं भवति। सा गृहवेदिकाग्नेः अधिष्ठात्री एव। स्काइथियन् जातावपि इत्यभिधानेनाऽग्निः पुज्यते स्म। पारसिक कर्मकाण्डस्य अग्निपूजा महत्त्वपूर्णम् अनुष्ठानम्। पारसिक धर्मे अग्निः 'अतर' इति नाम्ना प्रसिद्धः। प्राचीने इरान्देशे मन्दिरेषु उद्यवेदिकायां आतर (Atara) आतास (Atash) वा इति नाम्ना अग्निः सदैव प्रज्वलितः पूज्यश्च ।

प्राच्यपाश्चात्यसभ्यतायां संस्कृतै च अग्नेरूपासना बहु पुरातनी। विभिन्नेषु वैदिकपौराणिकाख्यानेषु पाश्चात्येतिहासे च अग्न्युपासनायाः भित्तिः अवलोक्यते। प्राच्यसंस्कृतभाषायां √घृ (ghr) √तप् (tap) √शुच (SUC) √दह (dah) √श्रा (sra) √पच् (pac) इत्यादयः अग्निव्यापारात्मका धातवः सन्ति। व्यापारदृष्ट्या पाञ्चात्य भारोपीय गथजातीयभाषा, जर्मनीय, ग्रीक्, लातिन् आवेस्ता भाषासु प्रचलितानाम् अग्निवाचकशब्दानां समन्वयो दृश्यते।

ग्रीक्-रोमनलिथुआनियस्काइथियन धर्मेषु अग्निः देवीरूपेण कल्पितः किन्तु इरानवासिभिः भारतीयैश्चाग्नि देवीरूपेण स्वीकृतः। अस्माकं वैदिकपरम्परायाः अग्नेः स्थानमुच्चतमं वर्तते। ऋग्वेदस्य प्रथमसूक्तस्यादौ अग्निरेव स्तुतः यज्ञाग्नि रूपेण । अग्निर्यज्ञस्य तेजस्वी पुरोहित एव।

मन्त्रद्रष्टारः ऋषयः अग्रेः वैदिकमन्त्रेषु केवलं भौतिकपाचकाग्निं नैव स्तुतवन्तः परन्तु तस्य तात्तिकरूपमेव आध्यात्मिकरूपमेव प्रतिपादितम्। अयं याज्ञिकाग्नि अन्तरिक्षे विद्युदुपेण आकाशे सूर्यरूपेण च विद्यते ।

अग्निशब्दः अञ्च गतिपूजनयोः इति धातोः निष्पद्यते। गते स्त्रयोऽर्था ज्ञानं गमनं प्राप्तिश्चेति। पूजनं नाम सत्कारः। 'योऽञ्चति अच्यतेऽगत्यङ्गतीति सोऽयमग्निः' इति दयानन्दः।[३] नैरूक्तास्तु दैवतकाण्डे 'अग्निः पृथिवीरस्थानः। तं प्रथमं व्यास्व्यास्यामः [४] इत्युक्त्वा अग्नेः प्राथम्यं वैशिष्ट्यं च प्रकटयन्ति।

निघण्टुव्याख्याकारः यास्कः ब्राह्मणग्रन्थाधारेण अग्निपदस्य त्रिविधं प्रवृत्तिनिमितं प्रदर्शयति।[५] स्थौलाष्टीवि अक्षरसाम्येन निर्वीक्तिं करोति।[६] शाकपूणिः धातुरूपेण च निवीक्तिं करोति।[७] आचार्यशौनकानुसारं अग्निः सर्वलोकेषु व्याप्तः तथा अस्य जन्म आवासस्थलं च नास्ति भिन्नम्।[८] सायणः यास्कमनुसृत्य प्रायः तस्य भाष्यम् रचितवान्। कर्मकाण्डानुसारं सायणः अग्निपदस्य निवीक्तिं करोति। 'अङ्गति गच्छति सर्वं व्याप्नोतीति अग्निः।[९] स्वामीदयानन्दः वैदिकरहसस्य धार्मिकसत्यताम् उद्घाट्य वैज्ञानिकाधारेण तस्य नैतिकतां तथा आचारसम्मतं रहस्यमुद्धाटयति।[१०] एक एव देवः भिन्नं भिन्नं नाम्ना अङ्कितः स्तुतः इति एकश्ववादि मतम् दयानन्दः स्थापयति। दयानन्दः अग्निपदस्य निवीक्तिं करोति यथा, अग्रणीः सर्वोत्तमः सर्वेषु यज्ञेषु पूर्वमीश्वरस्यैव प्रतिपादनात्तस्यात्रग्रहणम्। दग्धादिति विशेषणाद् भौतिकस्यापिच।[११] 'अङ्गति सर्वान् पदार्थान् दग्ध्वा देशान्तरे प्रापयति तस्मै।[१२] 'अङ्कति गच्छति प्राप्नोति जानाति वा स अग्निः वह्निः प्रसिद्धो वा'।[१३]

श्रीअरविन्दस्य दर्शनेन वेदः अस्माकम् आध्यात्मिक ज्ञानस्य आधारः। वेदः एव तस्य तत्त्वं स्थापयति।[१४]

श्रीअरविन्ददृष्ट्या अग्निपदस्यार्थः अङ्गति गच्छति ऊर्ध्वं गमयति च तत्र यजमानमित्यग्निर्भागवतसङ्कल्पशक्तिरूपो देवः। यद्वा अङ्गति गतिक्रियां वा करोति व्यष्टौ समष्टौ च ताद्विकासार्थमित्यग्निर्देवभूता ज्योतिर्मयसङ्गल्पशक्तिः। अगिगतौ इत्यस्माद् औणादिकनिप्रत्ययः। अयं धातुश्च न खलु साधारण गर्तेवाचकः परं शक्तिमत्त्वदीप्तिमत्त्व बोधकस्य गतिविशेषस्येति प्राचीनाऽऽर्यभाषाशाखीयानां गत्यर्थकधातूनां परिक्षणेन ज्ञायेत। एवं च अग्निशब्दः ज्योतिर्मयसङ्कल्पशक्तिः निखिलभुवनेषु समष्टौ व्यष्टौ च कार्यनियतां भगवतः सङ्कल्पशक्तिमभिधत्ते इति श्रीअरविन्दः। 'अग्' धातुः शक्त्यर्थकः। यः शक्तिमान् सएवाग्निः।[१५] अत्र नैयायिकाः मीमांसकानां शक्तिपदार्थस्वीकारे स्वमतं पोषयन्ति। 'अग्नि' रित्युक्तौ दाहिका शक्तिः स्वतः एव कल्प्यते। तामेव शक्तिं विहाय अग्नितत्त्वस्य ग्रहणं न भवति अग् धातोरर्थः आलोकज्वालावा, या शक्तिः प्रज्वलज्ज्ञानस्यालोके नोद्भासिता या च ज्ञानस्य कर्मवलम् तस्याः शक्तेर्धारकः अग्निरूपः। अपि च अग् धातोरर्थः प्राथम्यं प्रधानतमा च याशत्किः तस्याः शक्तेर्धारक एवाग्निः। अग् धातोरर्थः नयनम् प्रचालनम् इति। जगदादिभूतसनातनपुरातन प्रधानशक्तेः यो धर्त्ता जगदिदं निर्दिष्टपगन्तव्यधानयन्नास्ते यः कुमारो देवसेनायाः नायकः सेनानी[१६] यो मार्गदर्शकः यः प्रकृतेर्नानाशिक्तज्ञानेनवलेन च तदीयतत्तद्व्यापारेषु प्रवर्त्य सत्यथे प्रचालयति स एव शक्तिधरोऽग्निः।

अगतेरङ्गतेर्वा निष्पन्नोऽग्निशब्दः दीप्तिविशेषम् आलोकं तेजः पूर्वत्वं प्रधानत्वं च अभिधत्ते। वेदानामाध्यात्मिकार्थेऽयं भगवत्तपः शत्केः (Divine will or cosmic will) दिव्यसंकल्पाग्नेः

ज्योतिर्मयसङ्कल्पशक्ते र्वा (Illumined will or seer will) वाचकः। अग्निर्नाम भगवतः ओजस्तेजो भ्राजनस्वरूपा सर्वज्ञानमण्डिता परमज्ञानात्मिका तपः शक्तिः या ज्ञानज्योतिषा प्रज्वलिता ज्ञानस्य क्रियाशत्किरूण जगतः सर्वासामपि अभिव्यत्क शत्कीनां मूलभूता प्रधानतमा च। अग्निम् ईले इति प्रसङ्गे कीदृशमग्निम् इति समाधानप्रसङ्गेऽपि श्रीअरविन्दः अग्निशव्दस्यार्थं प्रकाशयति ज्योतिर्मयभागवतसङ्कल्पशक्तेरधिष्ठातारमग्निदेवम् ईले उपासे इति। एवं च अग्निशब्दः ज्योतिर्मय सङ्कल्पशक्तिनिखिलभुवनेषु समष्टौ व्यष्टौ च कर्मनिरतां भगवतसङ्कल्पशक्तिमभिधत्ते इति।

अग्निः चिच्छक्तेः कारणं तपः। सः सकलवस्तुषु वर्तते। भूततत्वे सः अग्निः प्राणतत्त्वे कामनया भोगप्रेरणया च यत् किमपि सः प्राप्नोति तत् सर्व भक्षयति। मनस्तत्त्वे सः चिन्तनमयी प्रेरण इच्छाशक्तिश्च मनोऽतीततत्वे सः ज्ञानमय क्रियाशक्तेः अधीश्वरः ।

श्रीअरविन्दस्याध्यात्मिकमनस्तात्त्विक रहस्योद्रघाटनम् नवीमं तथा समयोपयोगि तत्त्वमेव। वेदमन्त्राणाम् स्वरूपः एव ग्राह्यः न तु यत् किमपि सः प्राप्नोति तत् सर्व भक्षयति। मनस्तत्त्वे सः चिन्तनमयी प्रेरण इच्छाशत्किश्च मनोऽतीतत्वे सः ज्ञानमय क्रियशत्केः अधीश्वरः ।

श्रीअरविन्दस्याध्यात्मिकमनस्तात्त्विक सहस्योदृघाटनम् नवीनं तथा समयोपयोगि तत्त्वमेव। वेदमन्त्राणाम् स्वरूपः एव ग्राह्मः न तु यज्ञकुण्डस्य स्थूलः प्रत्यक्षोऽग्निः। आधिदैबिको वा राष्टसमाजादियज्ञे अग्रणीभूतः कोऽपि महानायकः, विद्वान् राजादिर्वा आधिभौतिक अग्निः ऊर्ध्वगमनशीलम् ऊर्ध्वारोहणयात्रारूपिणं देवपथगामिनं यज्ञम् अर्थात् आत्मसाधन यज्ञम् सर्वतः परिवृत्या अस्ति। आदौ अग्नेरावाहनम् विशुद्धशक्तिशालि तेजोमयदेवस्योपासनम्। योऽग्रणीः सर्वप्रधानः शक्तिशाली च।

यज्ञस्य आदिदेवः अग्नि। यज्ञोनाम विश्वेश्वरः। स हि विराट् चैतन्यमय प्राज्ञः सप्राज्ञश्च स्वकीय जगतः स्वामी नियन्ता तदेव यज्ञनाम परमेश्वरः। अग्निः परमेश्वरः। यज्ञाग्निः अग्नेः स्थूलदेहः मन्यते अतः घृतपृष्ठ-घृतमुख-घृतकेश- मधुजिह्व-मधुकेश इत्यादिशब्दैः अग्निः वेदेस्तूयते। अग्निं विना यज्ञियतेजः आत्मवेदौ प्रज्वलितमेव न प्रभवति। अग्नेः सा ज्वाला च सङ्कल्पस्य समजिह्वाशक्तिः ईश्वरस्येकाज्ञानोद्दीप्ताशक्तिः। अयं सचेतन शक्तिमयश्च सङ्कल्पोऽस्माकं मर्त्यसत्तायाममर्योऽतिथिः, पवित्रपुरोहितः दिव्यकर्मी च। द्याव्यापृथिव्योर्मध्ये माध्यस्थकारी अस्मत्त्प्रदत्तं हविरयमुच्चतरशक्तिप्रति वहति। तद्विनिमयेन च तासां बलं प्रकाशमानन्दं चानयत्यस्माकं मानवसत्तायाम्।

स्थूलयज्ञापेक्षया चिद्यज्ञस्य प्रकाशेषु यथा जपयज्ञे, तपोयज्ञे, ज्ञानयज्ञे च आध्यात्मिकचेतनायाः स्पन्दनार्थम् सकलशक्त्याधार भूतस्य तत्त्वस्य अग्नेः व्यापकसत्तां श्रीअरविन्दः स्वीकरोति। केवलं स्थूलगतिशीलस्य तत्त्वस्य ग्रहणेन न तत्त्वार्थः प्रकटितः ।

प्राचिन भाष्यकाराः यज्ञस्यस्थूलरुपं विलोक्य अग्नेः तादृशस्य वैदिकस्य यज्ञस्य अवधारणा विलोक्य 'प्लवा ह्योते अदृढा यज्ञरुपा [१७] इत्युक्त्वा उपनिषद स्थूलयज्ञस्य तत्साधनभूतस्य अग्रेश्च महत्वापेक्षया आत्मस्वरुपस्य अग्नेः सन्धानार्थ मार्ग निर्दिशति। अगिगतौ इति धातोः अग्निशब्दस्य यथा निष्पतिः तथैव अत सातत्यगमने इति अस्मात् धातोः आत्मशव्दस्यापि निष्पतिः। वैदिकऽग्रेः वेदान्ते आत्मरुपेण समन्वयः दृश्यन्ते तत्र अर्थस्य सामाजिक तत्त्वदृष्टया ग्राह्यत्वं दृश्यते। उपनिषदसारभूतायां भगवदगीतायां च यज्ञस्य सकलकर्ममयत्वं प्रकटितम्। तत्र जपयज्ञे-तपोयज्ञे-ज्ञानयज्ञे यज्ञस्य यज्ञपदार्थस्य समावेश सर्वत्रचरकर्मसु गतिगर्भस्य स्फुलिङ्गस्य स्फुरणं आवश्यकम्। नैयायिकाः अपि मीमांसकानां शक्तिपदार्थ अधिकृत्य शक्तिशक्तिमतोः अभेदप्रकल्प्य अग्निसतायां तच्छक्तेश्च ग्रहणं कुर्वन्ति। वैयाकरणाः अपि शब्दप्रयत्ने, आत्मा वुद्ध्या समेत्यार्थान् मनोयुङ्क्ते विवक्षया। मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्। [१८] इत्यादिमतवादम् स्वीकृत्य शब्दप्रकाशे अग्नितत्त्वस्य च कारणत्वं स्वीकृवन्ति ।

एवं च विभिन्नेषु दर्शनेषु अग्नितत्वस्य स्थूलसूक्ष्मादिरुपम् बिबेचन पूर्वकं अग्नेः सर्वकारण कारण रुपं सूक्ष्मं सूक्ष्मं स्वरुपं च श्रीअरविन्दः दिव्यदर्शनं करोति तथा च सर्वेषां प्रणिधानाय उपनिषद्गीतादि सम्मतं दत्त्वा व्यापकतया प्रतिपादयति।

## सन्दर्भग्रन्थाः


१ गयाचरण त्रिपाटी, वैदिक देवता उद्भव और विकाश, भारतीय विद्याप्रकाशन, १९८१ पृ. ३६

२ उषा शुक्ला, वैदिकवाङ्मये अग्नितत्त्व समीक्षणम्, अमरग्रन्थपब्लिकेशन, दिल्ली, २००३

३ स्वामीदयानन्द, सत्यार्थप्रकाश, प्रथमसमुल्लास

४ निरुक्त ७-४

५ अग्रणीर्भवति अग्रं यज्ञेषु प्रणीयते, अङ्ग नयति सन्नममानः ।

६ अक्नोपनो भवतीति स्थौलाष्टिविः ।

७ त्रिभ्य आख्यातेभ्यो जायत इति शाकपूणिः। इतान्-अक्ताद्दग्धाद्वा-नीतात् ।।

८ बृहदेवता ८-१६, ९.१०

९ अथर्ववेदः सायणभाष्य, ३.९.३ विश्वेश्वरानन्द-वैदिक-शोध-संस्थानम्, ११६० पृ. २७७

१० Sri Aurobindo, The secret of the veda, Sri Aurobindo

Ashram, Pondicherry, 1999, पृ. ३२

११ स्वामीदयानन्दः, ऋग्वेदभाष्यम्, १.१.१

१० स्वामीदयानन्दः यजुर्वेदभाष्यम्, २/२१

११ उणादिकोशः, ४/५०

१४ Sri Aurobindo, Archives and Research, December 1985, पृ१५२

१५ जगन्नाथो वेदालङ्कारः, अग्निमन्त्रमाल, श्री अरविन्दसोसायटी, पाण्डिचेरी, १९७६ पृ. ३६४

१६ अग्निवैदेवानां सेनानीः, अग्निर्मुखं प्रथमो देवतानाम् (ऐ. ब्रा-१/४)

अग्निवैदेवानामवमः (ऐ. ब्रा-१/१), अग्निरग्रे प्रथमो देवतानाम् (तै. ब्रा- २/४/३/३)

१७ मुण्डकोपनिषत्, १.२.७

१८ पाणिनीय शिक्षा

# आधुनिकशैक्षणिकसिद्धान्तानां पृष्ठभूमौ प्राचीनसंस्कृतशिक्षणविधिविमर्शः

## A CRITICISM OF OLD SANSKRIT TEACHING METHODS IN THE BACKGROUND OF MODERN TEACHING PRINCIPLES

**Dr. A. Shekar Reddy**
Assistant professor
Dept. of Education,
National Sanskrit University,
Tirupati.

**पत्रस्योद्देश्यानि : -**

- **अधिगमकर्तारः शैक्षिकप्रक्रियायां विषये परिचिताः भविष्यन्ति|**
- **अर्वाचीनशिक्षामनोविज्ञानस्य विषये ज्ञानं भवति।|**
- **आधुनिकशैक्षणिकसिद्धान्तानां पृष्ठभूमौ प्राचीनविधीनां विषये ज्ञानं प्राप्तुं समर्थाः भविष्यन्ति|**
- **पाठकगुणानां विषये ज्ञानं प्राप्नुवन्ति**
- **व्यक्तित्व मूल्यानां शिक्षणं भविष्यति**

शैक्षिकप्रक्रियायां शिक्षकः, शिक्षार्थी, पाठ्यक्रमश्चेति त्रीणि तत्वानि भजन्ति प्राधान्यम्। तत्वत्रयेऽस्मिन् पाठ्यक्रमः शिक्षकशिक्षार्थिनौ सम्बध्नाति। यथोक्तं शिक्षावल्याम् **आचार्यः पूर्वरूपम्। अन्तेवास्युत्तररूपम्। विद्यासन्धिः।** शिक्षकश्च पाठ्यक्रमन्तर्गतानां विभिन्नविषयाणां ज्ञानदानार्थं कांश्चन विशिष्टान् मार्गाननुसरति, कांश्चन विशिष्टाः क्रियास्सम्पादयति। विशिष्टक्रियामार्गादयः इमे विधिप्रविध्यनुदेशनादिपदैः व्यवह्रियन्ते।

Method इति पदं विध्यर्थे प्रयुज्यमानं लाटिन्-भाषातः गृहीतं यस्यार्थः प्रकारः (Mode) मार्गो (way) वा। प्रसिद्धशिक्षाविद् गेज् वर्यः (Gage- 1969) विधिमेवं परिभाषते- “Teaching methods are patterns of teacher behavior that are applicable to various subject matters, characteristics of more than one teacher and relevance of learning.”

कक्ष्याशिक्षणप्रसङ्गे विधिर्नाम - Method is a series of related and progressive acts performed by the teacher and the pupils according to some rules to accomplish the general and spenfic aims of the lesson.

(Thomas M-Risk- 1947)

पाठस्य सामान्यविशिष्टोद्देश्यान्यधिगन्तुं निर्दिष्टनियमानुसारं छात्राध्यापकैरनुष्ठेयानां परस्परसम्बद्धानां विकासात्मिकानां क्रियाणां श्रृङ्खलैव विधिः।

(थामस्. एम्. रिस्क-१९४७)

अधिगमक्षेत्रे विहितैः विस्तृतानुन्धानैः नैकेविधयः आविष्कृताः। इमे समूहचतुष्टये विभज्यास्सन्ति।

**(a) Monologue** - एकमुखं शिक्षणम् (one way teaching)

**(b) Dialogue** - द्विमुखी अन्तश्चर्या (two-way interaction)

**(c) Action** - क्रियाद्वारा शिक्षणम् (learning by doing)

**(d) Self-study** - स्वाध्ययनम्

विभिन्नानुसन्धानप्राप्तफलान्याधृत्य आविष्कृता इमे अर्वाचीनविधयः प्राचीनैः शतात् वर्षेभ्यः तत्तच्छास्त्रशिक्षणे अनुप्रयुक्ता इति विस्मयकरमेतत्।

अर्वाचीनशिक्षामनोविज्ञानस्य विभिन्नशाखासंबद्धाः व्यवहारवादिनः (Behaviorists), सम्बन्धवादिनः(connectionists) संज्ञानवादिनः (cognitists), Neurophysiologists अधिगमक्षेत्रे विस्तृतमनुसन्धानं विधाय तत्फलस्वरूपेण काँश्चन शिक्षणनियमान् शिक्षणविधिलक्षणानि च प्रत्यपीपदन्। विस्तृतप्रायोगिकानुसन्धानफलस्वरूपेण आविष्कृता विधिविषयकनियमा इमे महर्षिभिः प्राचीनशास्त्रज्ञैश्च तत्तच्छास्त्राणां रचनायां शिक्षणे च अनुप्रयुक्ता इति विस्मयकरमेतत्। आधुनिकशैक्षणिकसिद्धान्तानां पृष्ठभूमौ प्राचीनविधीनां विमर्शनार्थं एवायं परिमितः प्रयासः।

**अर्वाचीनशिक्षणसिद्धान्ताः**

1. Establishing the initial profile of the learner and his expectations etc. शिक्षणप्रारम्भे शिक्षार्थिनः अभिरुचियोग्यताऽकाङ्क्षादीनां परिगणनम्। शिक्षणपध्दतयः छात्रस्य अभिरुचिम्-आकाङ्क्षां ज्ञानस्तरञ्च अनुसृत्य निर्मीयेरन्। विद्यार्थिनः इदं मानसिकावस्थाविषयकं पूर्वज्ञानं तस्य उच्चस्तरीयबौद्धिकशक्तीनां विकासे आधारभूतं भवति।

2. Motivating the learner by introducing the subject vis-a-vis its future relevance and importance

अध्येयविषयस्य प्रासङ्गिकता- महत्वादिप्रतिपादनेन अध्ययनाभिमुखं छात्रस्य प्रेरणम् शिक्षणप्रारम्भे अध्येयविषयस्य अध्ययनप्रयोजनमहत्वादिप्रतिपादनम् अधिगमे प्रभावशालि प्रेरकं सम्पद्यते। शिक्षणोपक्रमे कृतः उपोद्घातः पाठ्यविषयस्य प्रासङ्गिकतां, तदद्वारा प्राप्स्यमानं फलमपि सुष्ठु प्रतिपादयेत्। इत्थं विहित उपोद्घातः उत्तमप्रेरको भूत्वा अध्ययने स्थिरामभिरुचिं जनयति।केल्लर् इति

शिक्षामनोविज्ञानी अभिरुचिः, (Interest) प्रासङ्गिकता, (Relevance) आकाङ्क्षा, सन्तृप्ति (Satisfaction) रिति शिक्षणं सजीवं रोचकञ्च सम्पादयन्ति प्रेरकात्मकनिबन्धनानि (Motivational conditions) प्रत्यपादयत्।

मनोवैज्ञानिकसिद्धान्तममुं सुष्टु जानन्त एव अस्मच्छास्त्रज्ञाः अनुबन्धचतुष्टयं प्रत्यपीपदन्।यथोक्तम् - ग्रन्थप्रणयनप्रयोजनम् अध्येतॄणामध्ययनप्रवृत्त्यधीनम्। तत्र प्रयोजकमनुबन्धचतुष्टयम्। तत्वञ्च ग्रन्थाध्ययनप्रवृत्तिप्रयोजकत्वम्।

**विषयः** - प्रवृत्तिप्रतिबन्धकस्य निवर्तनेन प्रवृत्तौ परम्परया उपयुज्यते।

**प्रयोजनम्** - साक्षादुच्यते

**अधिकारी** - प्रवृत्तिकारणीभूतकृतिसाध्यत्वज्ञाने (जिज्ञासुरधिकारी)

**सम्बन्धः** - कृतिसाध्यत्वज्ञानादौ

प्राचीनाः शिक्षणप्रारम्भे एव अध्येतृयोग्यतां परिशील्य तदधिकारित्वमभिज्ञाय शिक्षणप्रवृत्तिप्रतिबन्धकानि तदज्ञानजनितानिच्छादीनि विषयस्य महत्वप्रासङ्गिकतादिप्रतिपादनेन तदध्ययनलाभवर्णनादिना दूरीकृत्य शिक्षणे तदभिरुचिं संवर्ध्य तं प्रेरयन्ति स्म।

3 प्रात्यक्षिकतया मूलवस्तु-प्रतिरूप-चित्रादिप्रदर्शनेन अध्यापनस्य सारल्यरोचकत्वादिसम्पादनम्

A thing a picture or a model may instantly present what a book could set forth only in a hundred pages.

**(Ivan lurgener)**

केवलश्रवणेन पठनेन वाधीतविषयापेक्षया अक्षिसात्करणपुरस्सरं श्रृतो विषयः सारल्येन अवबुध्यते, चिरश्च स्मर्यते इतीदं तथ्यं पर्याप्तप्रयोगपुरस्सरं प्रतिष्ठापितं तथ्यम्। अतो हेतोः अध्यापने दृश्यश्रव्योपकरण प्रयोगाभि नयादीनि अनुप्रयोज्यानीति शिक्षाविदां मतम्।

सिद्धान्तममुमनुसरन्तः शिक्षविदः प्रत्यक्षविधि (Direct Method) माविश्चक्रुः। विधिरयं भाषाविज्ञानगणितादिविभिन्नविषयाणामध्यापने ससाफल्यमनुप्रयुज्यते।

परं नायं विधिरर्वाचीनः यथाऽधुनिका आमनन्ति। सहस्रवर्षेभ्यः विधिरयमध्यापने प्रयुज्यत इत्यत्र समुपलभ्यन्ते अनेकानि प्रमाणानि।।

न्यग्रोधबीजजिदर्शनेन अणोः महदारम्भकत्वनिरूपणमुखेन एतद्विधि प्रयोगप्रामाण्यं दर्शयति छान्दोग्योपनिषद्।

न्यग्रोधफलमद आहरेति। इदं भगव इति। भिन्दीति। भिन्नं भगव इति। किमत्र पश्यसीति। अण्व्य इवेमा धाना भगव इति। आसामङ्गैकां भिन्दीति। भिन्ना भगव इति। किमत्र पश्यसीति। न किञ्चन भगव इति। तं हो वाच यं वै सौम्यैतमणिमानं न निभालयसे, एतस्य वै किल सौम्यैषोऽणिम्न एवं महान्

न्यग्रोधस्तिष्ठति। श्रद्धत्स्व सौम्येति। स च एषोऽणिमा, एतदात्म्यमिदं सर्वम्। तत् सत्यम्। स आत्मा। तत् त्वमसि श्वेतकेतो इति।

(छान्दोग्योपनिषद्)

4. The method must utilize the laws of learning

सन्नद्धता (preparation) अभ्यासः (Practice) प्रभावः (effect) इतीमे शिक्षणनियमाः शिक्षणविधिना आपादितास्स्युः।

5. The method must utilize the theory of self-activity

(Teaching method should be interactively in order to develop higher mental abilities) अध्यापनविधिः स्वक्रियार्थं यथोचितमवसरं कल्पयेत्। छात्रक्रिया: अनुभवनं, प्रतिक्रिया, करणम्, प्राप्तिः, इत्यादिरूपा भवन्ति। छात्रः स्वीयप्रतिक्रियया शिक्षत इति प्रतिपादयत्ययं सिद्धान्तः। शिक्षणविधिः यावता प्रमाणेन पारस्परिकान्तश्चर्यार्थमवसरं कल्पयति छात्रेभ्यः तावत्प्रमाणेन तदीयबौद्धिकमानसिकशक्तयः समेधन्ते।

एतत्सिद्धान्तविद्भिः प्राचीनशिक्षकैः खण्डावन्वयविधिर्नामा पद्यकाव्यशिक्षणविधिः कोऽप्याविष्कृतः यस्मिन् पूर्वोक्तसिद्धान्तः सामग्र्येणानुप्रयुज्यते।

ओङ्कारदासेन अन्वयप्रबोधे खण्डान्वयः इत्थं प्रत्यपादि।

**कर्तृकर्मक्रियास्तावत् श्लोके योज्यास्ततः परम्**
**किमो रूपं पुरस्कृत्य तृतीयादि नियोजयेत्।**
**ल्यबन्तं च तुमन्तञ्च क्त्वान्तं कर्मविभूषितम्**
**खण्डान्वये पुनः प्रश्नं पूर्वमन्ते प्रयोजयेत्॥**

विधावस्मिन् ऐदम्प्राथम्येन प्रधानक्रिया अन्विष्यते। तया सह कर्ता तद्विशेषणानि, ततः कर्म, तेन सह तद्विशेषणानि संयोज्य अन्वयो विधीयते। अध्यापकः यदा प्रश्नं पृच्छति तदा छात्रेषु तत्समाधानज्ञानेच्छा जागर्ति। सैवेच्छा तान् समाधानान्वेषणे प्रेरयति। तथा सम्प्रेरितास्ते उत्तरमन्विषन्ति। तदनु शिक्षकः पुनः प्रश्नकरणेन छात्रेषु उत्तरान्वेषणेच्छां जागरय्य तदर्थ तान् प्रेरयति। इत्थमयं विधिः आकाङ्क्षा-योग्यता सन्निधिरिति प्रथितं मीमांसासिद्धान्तमनुसरन् छात्रेभ्यः स्वतः क्रियासम्पादनार्थ पर्याप्तमवसरं कल्पयति।

**6. Organizing the complex information in easy remember structure.**

**सौलभ्येन स्मरणार्थं जटिलविषयस्य व्यवस्थापनम्**

साङ्गेतिकैः (Cue words) असन्दिग्धैः (clear) अल्पाक्षरयुक्तैः (precise) अर्थगर्भितैः, वाक्यैः विषयो तथा संरच्यः येन स सोलभ्येन स्मरणीयो भवेत्।

1.The purpose of drill should be made clear to the pupil. मौखिकाभ्यासस्य मौलिकं प्रयोजनं, पठने वेगस्य निर्दुष्टतायाः गुणवत्तायाश्च विकासः।

2.The results of each period of drill should be measured scientifically and objectively.

3. Drill work, with knowledge of results, is an important factor in teaching.

**J.B. stroud इति** शिक्षाविद् स्वप्रयोगैः अभ्यजानात् यत् स्वीयमौखिकाभ्यासफलानां ज्ञानं छात्रस्य अभ्यासं रोचकं प्रभावपूर्णश्च सम्पादयतीति। प्राचीनाः काव्यशास्त्राध्यापकाः नियमानियमान् न केवलं सम्यक् जानन्ति स्म प्रत्युत्त तान् सम्यगनुप्रयुञ्जते स्मेति स्पष्टं वक्तुं शक्यम्। यदा tape recorder इत्याद्याधुनिकयन्त्राणि नोत्पन्नानि तादृशे समये एव ते छात्राणां दोषान् सम्यगाभिज्ञाय तान् विश्लिष्य वैज्ञानिकतया वर्गीकृत्य शुद्धपठनकौशलार्थं नेकानुपायान् समुपादिशन्निति आश्चर्यकरम्। महर्षिः याज्ञवल्क्यः स्वशिक्षायां चतुर्दशपठनदोषानित्थं प्राचीकटत्।

**शङ्कितं भीतमुद्धष्टमव्यक्तमनुनासिकम्।**
**काकस्वरं मूर्ध्नि गतं तथा स्थानविवर्जितम्॥**
**विस्वरं विरसं चैव विश्लिष्टं विषमाहतम्।**
**व्याकुलं तालुहीनं च पाठदोषाश्चतुर्दश॥**

स एव अन्यस्मिन् स्थले अधमकोटिप्रविष्टाणां पाठकानां लक्षणानि इत्थं विशदयति।

**गीती शीघ्री शिरः कम्पी यथालिखितपाठकः।**
**अनर्थज्ञाऽल्पकण्ठश्च षडेते पाठकाधमाः॥**
**अतितूर्णमतिविलम्बितमुल्बणनादश्च नादहीनश्च।**
**अपदच्छिन्नमनावृतमतिमृदुपरुषश्च निन्दन्ति॥**

**पाठकगुणाः**

**माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।**
**धैर्यं लयसमर्थश्च षडेते पाठका गुणाः॥**
**गम्भीरत्वमनैश्वर्यं निर्व्यूढिस्तारमन्द्रयोः।**
**संयुक्तवर्णलावण्यमिति पाठगुणाः स्मृताः॥**

पाठकः पदानि न योजयेत् समासं न विभाजयेत्, अयुक्तरीत्या पदानि न गिलेत, पदसन्धीन् अविनाश्य विभक्तीः स्फुटं प्रकाशयन् शब्दार्थान् सुष्टूच्चारयन् वाचयेत्।

प्रवाहपूर्णपठनप्रसङ्गे भावे दृष्टिरनुस्यूततया स्यात्। अन्यथा पठने सत्यपि वेगपूर्णे तत् अर्थशून्यं स्यात्। भावस्फोरकतया विरामस्थानस्वरभेदोच्चारण वैविध्यैः भावप्रकाशनपुरस्सरं श्रोत्रवगमनरीत्या वाचयेत्।

ईदृशपठनरीत्यर्थं पाठ्यवस्तु अवबुद्धं स्यात्।भावस्फोरकतया धाराप्रवाहतया पठनार्थं वागिन्द्रियस्यापेक्षया नेत्रदृष्टि: अग्रेसरन्ती शब्दविषयपदच्छेदादीन् प्रति पाठकं ग्राहयेत्।उच्चार्यमाणशब्दात् अग्रेस्थितमक्षिसात्कुर्यात् पाठकः।वागिन्द्रियात् पृष्ठतो गता दृष्टि: पठने प्रमादं जनयति।इदमेव Eye-voice span इत्युच्यते। प्राचीनाः सिद्धान्तममुं जानन्तीत्यत्र श्लोकोऽयं प्रमाणभूतः।

**यथा सुमत्तनागेन्द्रः पदात् पदं निधापयेत्।**
**एवं पदपदाद्यन्तं दर्शनीयं पृथक् पृथक्॥**

**क्षुण्णपठनम्**

काव्यनिबन्धादीनामामूलाग्रतया, शब्दौचित्य-भावौचित्यपरिशीलनपुरस्सरं विशेषतया वाचनं क्षुण्णपठनमित्यभिधीयते।

पठनप्रकारविशेषममुमभिवर्णयन् प्रसिद्धशिक्षाविद् जेसपर्सन (Jesperson) इत्थं ब्रवीति।

The main point is for the pupils to be occupied with the texts repeatedly is such a way that they do not lose sight of the meaning so that they may thus become so familiar with it that at least they know it almost or entirely by heart without having been directly required to commit it to memory.

**-Jesperson.**

बालैः काव्यं कण्ठस्थीकर्तव्यमिति नोच्यते चेदपि तद्गतशब्दार्थाः सुपरिचिताः स्वाधीनाश्च भूत्वा छात्रजिह्वायां यथा नृत्येयुः तथा विधेयम्।(जेस पर्सन्)

सिद्धान्तमेनमभिजानन्तः अस्मदीयाः प्राचीनकाव्यशिक्षणपरम्परयां क्षुण्णपठनाय महत्वं प्रददुः।

एभिः प्रमाणैरिदं स्पष्टं यत् काव्यशास्त्राद्यध्यापने प्राचीनैरुपयुक्ता विधयः तत्तद्विषयप्रकृत्यनुकूलाः बालमनोविज्ञानानुसारिणः सुविमृश्य निरूपिता इति। .

**सन्दर्भग्रन्थाः**

1. THOMAS M. RISK, Principles and practices of Teaching in Secondary School (New York: American Book company, 1947) pp.:11-12.
2. J.B. STROUD, The role of practice in learning, National society for the study of **Education, 41(part II)** 1942, 353-376/
3. H.J. OTTO, Principles of elementary education, Rine hart and company, New York, Inc.,1949.
4. छान्दोग्योपनिषत्, महाभाष्यम्, पस्पशाह्निकम्-चौखम्बा संस्कृतप्रतिष्ठानम्. देहली 1987।

# एकवाक्यतास्वरूपं भेदाश्च

**डॉ.प्रज्ञा**

सहायकाचार्या, व्याकरणविभागः

श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, श्रीविहारः पुरी

**सारांशः**

पाणिनीयव्याकरणशास्त्रे प्रायः चतुःसहस्रं सूत्राणि वर्तन्ते येषां सम्यक् परिज्ञानेन साध्वसाधुनिर्णायिका धीः समुत्पद्यते। एतेषां सूत्राणाम् अर्थपरिज्ञानाय एकवाक्यताविज्ञानम् अत्यन्तम् अनिवार्यं भवति। तस्मात् पत्रेऽस्मिन् एकवाक्यतायाः आवश्यकता, तस्याः मूलम्, एकवाक्यतायाः लक्षणं तद्भेदाश्च सप्रमाणं सोदाहरणञ्च विचारिताः। तथाहि सूत्रेण सह सूत्रान्तरस्य, सूत्रान्तरपदस्य वा सम्बन्धस्थापनाय एकवाक्यता क्रियते। तस्मात् "वाक्यघटकानां पदानां परस्परान्वितार्थबोध-जनकत्वम् एकवाक्यत्वम्" इति वक्तुं शक्नुमः। अस्याः एकवाक्यतायाः मूलम् अर्थवत्सूत्रे भाष्ये अवलोक्यते। इयं च एकवाक्यता सामान्येन द्विविधा भवति- (1) पदैकवाक्यता, (2) वाक्यैकवाक्यता च। तृतीयः अपि प्रकारः क्वचित् अवलोक्यते। स च प्रकारः भवति (3) अर्थैकवाक्यता इति। एतत्सर्वं सविस्तरं अत्र पत्रे विद्वन्मनोरञ्जनाय उपस्थाप्यते।

**कुञ्जिशब्दाः (Keywords)**

एकवाक्यता, प्रातिपदिकम्, यथोद्देशः, कार्यकालः, पदैकवाक्यता, वाक्यैकवाक्यता, अर्थैकवाक्यता, पदोपस्थापकत्वम्, उपजीव्यः, उपजीवकः

पाणिनीयव्याकरणमिदं त्रिमुनिव्याकरणम् इति कथ्यते। "उत्तरोत्तरं मुनीनां प्रामाण्यम्" इति वचनानुरोधेन महाभाष्यानन्तरं यः कोऽपि व्याकरणग्रन्थः लिखितः सः महाभाष्यमेव आधृत्य लिखितः। तस्याधारशिलां विना यः कोऽपि ग्रन्थः लिखितः सः अप्रामाणिकः इति विद्वत्समाजस्य अङ्गीकारः। भाष्यञ्चपरममूलं प्रामाणिकञ्च वैयाकरणानां कृते। अतः भाष्यानन्तरं ये केऽपि आचार्याः अभूवन् ते भाष्यमेव आधृत्य ग्रन्थप्रणयनं कृतवन्तः। तत्रैव भाष्ये 'अथ व्याकरणम् इत्यस्य शब्दस्य कः पदार्थः'[1] इति जिज्ञासायां सिद्धान्तं समुत्तरति भाष्यकारः - 'लक्ष्यलक्षणे व्याकरणम्'[2] इति।

एतद्वचनानप्रामाण्यात् शब्दः सूत्रञ्चैतत्समुदितं व्याकरणं भवति। तत्र सूत्रार्थपरिज्ञानाय प्रायः सूत्रान्तरसहकारः अपेक्षितः भवति। यत्र कुत्रापि सूत्रस्य लक्ष्यसंस्कारकबोधाय सूत्रान्तरस्य तत्पदानां वा आवश्यकता भवति तत्र सूत्रेण सह सूत्रान्तरस्य, सूत्रान्तरपदस्य वा सम्बन्धस्थापनाय एकवाक्यता क्रियते।

अस्याः **एकवाक्यतायाः परिकल्पना कुतः** आगता? इत्यस्य अन्वेषणं क्रियते तदा भाष्यमेव अस्यापि मूलम् इति लभ्यते।

"अर्थवदधातुरप्रत्ययः प्रातिपदिकम्"[3] भाष्ये द्विविधं वाक्यं प्रदत्तम्- निरर्थकं, सार्थकञ्च। तत्र देवदतः गामभ्याज शुक्लां, देवदत्तः गामभ्याज कृष्णाम् इत्यादीनि वाक्यानि सार्थकवाक्यानि भवन्ति। तत्र 'वाक्यप्रतिषेधोऽर्थवत्त्वात्'[4] एतस्य वार्तिकस्य व्याख्यावसरे उच्यते – 'वाक्यस्य प्रातिपदिकसञ्ज्ञायाः प्रतिषेधो वक्तव्यः। देवदतः गामभ्याज शुक्लां, देवदत्तः गामभ्याज कृष्णाम्। किं कारणम्? अर्थवत्त्वात्। अर्थवद्ध्येतद्वाक्यम्'[5] इति। अर्थवद्धि एतस्य व्याख्यानं प्रदीपकारः करोति- 'पदार्थानां समन्वयावगमादिति'।[6] निरर्थकञ्च वाक्यं भवति- दशदाडिमानि षड्पूपाः इत्यादीनि। तत्र सर्वमपि पदं सार्थकं भवति तथापि वाक्यघटकानां पदानां परस्परान्वयेन वाक्यार्थबोधजनकता नास्ति। अतः इदं वाक्यं निरर्थकं भवतीति। अत्र वाक्यस्य निरर्थकत्वकारणं भवति, वाक्यघटकानां पदार्थानां समन्वयाभावः। अतः इत एव एकवाक्यतायाः विचारः आरभ्यते।

आचार्यः नागेशभट्टः **'यथोद्देशं संज्ञापरिभाषम्, कार्यकालं संज्ञापरिभाषम्'**[7] इत्यनयोः व्याख्यानावसरे स्वसिद्धान्तस्थापनाय ज्ञापयति यत् परिभाषाणां यथोद्देशपक्षेकार्यकालपक्षे वा विधिप्रदेशगमनं न भवति, अपितु स्वविधेयबुद्धिजननेन पक्षद्वयेऽपि परिभाषया कार्यं विधीयते। तत्रैतावान् विशेषः - **यथोद्देशपक्षे** परिभाषादेशे सर्वविधिसूत्रबुद्धौ स्वविधेयभेदं परिकल्प्य विधिसूत्रैः सह एकवाक्यतां करोति परिभाषासूत्रम्, **कार्यकालपक्षे** च तत्तद्विधिप्रदेशे परिभाषाविधेयस्य स्मरणेन पदैकवाक्यता भवतीति। एवमेव अधिकारसूत्रस्थलेऽपि विधिसूत्रैः सह एकवाक्यतयैव बोधो भवति। तत्र एकवाक्यतापदेन किं बुद्ध्यते कतिविधा चैकवाक्यतेति जिज्ञासोदेति।

षड्विधेषु सूत्रेषु विधिसूत्राणां वाक्यार्थबोधाय एकवाक्यतायाः आवश्यकता भवति। तत्र किं नाम एकवाक्यत्वम् इति जिज्ञासायाम् उच्यते – **"वाक्यघटकानां पदानां परस्परान्वितार्थबोधजनकत्वम्एकवाक्यत्वम्"** इति वक्तुं शक्यते।

इयं च एकवाक्यता सामान्येन द्विविधा भवति- **(1) पदैकवाक्यता, (2) वाक्यैकवाक्यता** च। तृतीयः अपि प्रकारः क्वचित् अवलोक्यते। स च प्रकारः भवति **(3) अर्थैकवाक्यता** इति।

दीक्षितमतेन क्वचित् पदैकवाक्यता भवति क्वचित् वाक्यैकवाक्यता भवति। नागेशमतानुसारम्- सर्वत्र वाक्यैकवाक्यता एव भवति।

अत्र प्रथमम् एकवाक्यतायाः स्वरूपं किम् इति निश्चेतव्यम्। वाक्यघटकानां पदानां यत्र अन्वयेन एकवाक्यार्थजनकत्वं तत्र एकवाक्यत्वम्।

## एकवाक्यताप्रकाराः

सा च एकवाक्यता त्रिधा- **(1)पदैकवाक्यता (2) वाक्यैकवाक्यता (3) अर्थैकवाक्यता च।** तत्र **'पदसमूहो वाक्यम्'**[8] इति वाक्यस्य सामान्यलक्षणम्। एकवाक्यता च वाक्यघटकानां पदानां तज्जन्यार्थानां परस्परान्वयेन एकार्थजनकता रूपा भवति। सूत्राणि षड्विधानि वर्त्तन्ते। तत्र कस्यापि पदस्य साधुत्वान्वाख्यानं विधिसूत्रद्वारा एव भवति। विधिसूत्रमेव शब्दसाधुत्वान्वाख्यायकं शब्दसाधुत्वनिर्णायकं वा भवति, शेषं पञ्चविधमपि सूत्रं विधिसूत्रस्य उपकारकं भवति। विधिसूत्रस्यैव सहायकानि अन्यानि सूत्राणि। तस्यैव लक्ष्यसंस्काराय एतादृशः वाक्यार्थबोधः अपेक्ष्यते, यः अप्रमाणिकः न भवेत् आस्कन्दितः (भ्रमयुक्तः) च न भवेत्। लक्ष्यसाधुत्वस्य निर्णायकः तादृशः एव वाक्यार्थबोधः भवति। स एव च कस्यापि शब्दस्य साधुत्वान्वाख्यानस्य कारणं भवति। सूत्रप्रामाण्याय अनास्कन्दितबोधाय च सूत्रान्तरस्य आवश्यकता भवति। यथा-**इको यणचि**[9] इति सूत्रमस्ति तत्र त्रीणि पदानि सन्ति- **इकः यण् अचि** इति । त्रयाणाम् अन्वयेन वाक्यार्थबोधः यदि भविष्यति तथापि भ्रमरहितः बोधो भवितुं नार्हति। यतः प्रथमान्तः विधेयः भवति, षष्ठ्यन्तः उद्देश्यः भवति, अचि इत्यत्र सती सप्तमी वर्तते। अतः अस्यार्थः भवति **- इकम् उद्दिश्य यण् भवति अचि सति।**

अनेन वाक्यार्थबोधेन एष निर्णयः न भवितुमर्हति यत् **'सुधी+उपास्यः'** इत्यत्र धकारोत्तरवर्तिनः इकारस्यैव यण् भविष्यति इति। अतः पदत्रयेण यः वाक्यार्थबोधः जातः सः अनास्कन्दितः नास्ति। अतः अयं लक्ष्यधार्मिकसाधुत्वप्रकारकबोधस्य जनकः भवितुं नार्हति। तेन लक्ष्यधर्मिकसाधुत्वप्रकारकाप्रामाण्यज्ञानानास्कन्दित- बोधाय सूत्रान्तरस्य आवश्यकता भवति। एका स्थितिः एषा।

द्वितीया स्थितिः **वृद्धिरेचि**[10] इत्यस्य। अत्रापि पदद्वयं भवति **वृद्धिः एचि इति च।** वृद्धिरेचि इत्यस्याऽपि लक्ष्यधार्मिकसाधुत्वप्रकारकाप्रामाण्यज्ञानानास्कन्दितः बोधः सूत्रान्तरं विना न सम्भवति। वृद्धिपदवाच्यः कः? इति सन्देहः यदा भवति तदा **वृद्धिरादैच्**[11] इति संज्ञासूत्रद्वारा **वृद्धिपदम् आदैच्-निरूपित-शक्तिमत्** इति वाक्यार्थबोधः भवति। तस्य वाक्यार्थस्य वृद्धिरेचि इत्यत्र स्मरणं भवति न तु पदं किमपि सूत्रस्थलं गच्छति।

किन्तु इको यणचि इत्यत्र **तस्मिन्निति निर्दिष्टे पूर्वस्य**[12] इत्यतः **निर्दिष्टे, पूर्वस्य** इति पदद्वयं आगच्छति। पुनश्च पदद्वयस्यापि इको यणचि इत्यनेन सह समुचितसम्बन्धेन अन्वयेन वाक्यार्थबोधः भवति।

किन्तु वृद्धिरेचि इत्यत्र पदार्थानाम् अन्वयः न भवति अपितु एकः वाक्यार्थः द्वितीयस्य वाक्यार्थे सहायकः भवति। एवं प्रकारेण यत्र पदानां परस्परान्वयः वाक्यार्थबोधे सहायकः, तत्र भवति **पदैकवाक्यता**। यत्र च एकः वाक्यार्थः द्वितीयस्य वाक्यार्थबोधे सहायकः भवति तत्र **वाक्यैकवाक्यता**।

अत्र 'इको यणचि' इत्यस्य 'तस्मिन्निति.' इत्यनेन सह या एकवाक्यता सा पदैकवाक्यता। 'वृद्धिरेचि' इत्यस्य 'वृद्धिरादैच्' इत्यनेन सह या एकवाक्यता सा भवति वाक्यैकवाक्यता। एवं प्रकारेण यत्रएकस्य सूत्रस्य वाक्यार्थबोधः अपरसूत्रस्य वाक्यार्थबोधे सहायकः तत्र भवति **वाक्यैकवाक्यता**। अपि यत्र सूत्रस्य पदम् अपरसूत्रस्य वाक्यार्थबोधे सहायकं भवति तत्र **पदैकवाक्यता** भवतीति।

एकः अर्थः बहुधा द्वितीयमर्थमाकाङ्क्षति, इति मत्वैव अर्थैकवाक्यतायाः परिकल्पना कृता वर्तते। किन्तु पदं विना अर्थस्य सत्ता न सम्भवति। एकः न्यायः वर्त्तते- **स्वार्थेन परिपूर्णं पदम् अर्थान्तरम् आकाङ्क्षति** इति। अर्थान्तस्य आकाङ्क्षां मत्वैव **अर्थैकवाक्यतायाः** परिकल्पना कृता। यथा- गंगापदस्य अभिधाशक्त्या यः भागीरथरथखातावच्छिन्नजलप्रवाहरूपम् अर्थं न जानाति सः घोषादिपदस्य समभिव्यहारे अर्थान्तरस्य आकाङ्क्षां कर्तुं न शक्नोति। अर्थात् यदि स्वार्थेन परिपूर्णं पदं नास्ति तर्हि अर्थान्तरस्य आकाङ्क्षा भवितुं नार्हति। अतः स्वार्थेन 'परिपूर्णं पदम्.' इत्यादिन्यायः प्रदत्तः। एकेन अर्थेन यदा अर्थान्तरस्य आकाङ्क्षा क्रियते तदा भवति अर्थैकवाक्यता। सामान्यज्ञानं विशेषज्ञानं प्रति कारणं भवति। अतः साम्प्रतम् एकवाक्यताप्रभेदानां स्वरूपं विचारयामः।

### (1) पदैकवाक्यता –

**'स्वघटकपद-प्रयोज्यविषयता-निरूपित-विषयताप्रयोजक-पदघटितत्व-रूपा-पदैक-वाक्यता'**[13]इति। यथा- 'तस्मिन्निति.'[14] परिभाषाशास्त्रस्य पदोपस्थापकत्वपक्षे 'इकोयणचि'[15] इत्यादि-सप्तम्यन्तपदघटितैः 'अचि' इत्यादिपदैः सह पदैकवाक्यता भवति। तथा हि- स्वं 'इको यणचि' इति शास्त्रम्। स्वघटकं पदम् 'अचि' इति पदम्। स्वघटकपदप्रयोज्यविषयतानिरूपितविषयताप्रयोजकं पदम् 'निर्दिष्टे' इति पदम्। तद्घटितत्वम् 'तस्मिन्निति निर्दिष्टे.' इति परिभाषासूत्रे वर्तते। पुनः स्वपदेन 'तस्मिन्निति.' परिभाषासूत्रमपि गृहीतुं शक्यते। तथाहि स्वं 'तस्मिन्निति.' परिभाषासूत्रं, स्वघटकं पदं 'निर्दिष्टे' इति पदम्। स्वघटकपदप्रयोज्यविषयतानिरूपितविषयताप्रयोजकं पदम् 'अचि' इति पदम्। तद्घटितत्वम् 'इकोयणचि' इति सूत्रे। अतः 'इकोयणचि ''तस्मिन्निति.' अनयोः सूत्रयोर्मध्ये पदैकवाक्यता भवतीति लक्षणसमन्वयः। अतः 'तस्मिन्निति.' परिभाषायाः पदोपस्थापकत्वपक्षे अत्र पदैकवाक्यता भवति।

### (2) वाक्यैकवाक्यता –

**‘उपजीव्योपजीवकभावापन्न-बोधप्रयोजकत्वं वाक्यैकवाक्यत्वम्’**[16]।

यथा-‘क्ङिति च’[17] इत्यादिनिषेधशास्त्राणां ‘सार्वधातुकार्धधातुकयोः’[18] इत्यादि-निषेध्यशास्त्रैः साकं वाक्यैकवाक्यता भवति। वाक्यैकवाक्यता च गित्-कित्-ङिद्भिन्न-सार्वधातुकार्धधातुकाव्यवहितपूर्वत्वविशिष्टस्य अङ्गावयवस्य अन्त्यस्य इक्पदबोध्यस्य अलः स्थाने गुणो भवति इत्यर्थः सङ्गच्छते। तत्र वाक्यार्थज्ञानं प्रति पदार्थज्ञानस्य कारणत्वात् गित्-किद्-ङिद्भिन्न-सार्वधातुकार्धधातुकाव्यवहितपूर्वत्व- विशिष्टाङ्गावयवान्त्यत्वविशिष्टालभिन्नेक्पदबोध्यस्य स्थाने गुणः स्यात् इति वाक्यार्थज्ञानं प्रति ‘क्ङिति च’ इति सूत्रार्थस्य कारणत्वेन सार्वधातुकार्धधातुकयोः इति सूत्रार्थज्ञानं प्रति तस्य उपजीव्यत्वात् अनयोः वाक्यैकवाक्यता भवति। उपजीव्यः–‘क्ङिति च’; उपजीवकः-‘सार्वधातुकार्धधातुकयोः’।

### (3) अर्थैकवाक्यता -

एकं मतं भवति यत् ‘तस्मिन्निति.’ इति सूत्रेण पदं नैवोपस्थाप्यते अपितु अर्थ एव उपस्थाप्यते। अस्मिन् कल्पे ‘इको यणचि’ ‘तस्मिन्निति.’ इत्यनयोः अर्थैकवाक्यता भवति। **स्वोपस्थाप्यार्थ-निष्ठविषयता-निरूपितविषयता-प्रयोजकपदघटितत्वम्[19] अर्थैकवाक्यत्वम्**। तथा हि इको यणचि इति विधिशास्त्रीयाचि इत्यादि-सप्तम्यन्तपदानांलक्षणया अजव्यवहित-पूर्वत्वाद्यर्थ-तात्पर्यग्राहकत्वात् ‘इको यणचि’, ‘तस्मिन्निति निर्दिष्टे पूर्वस्य’ अनयोः सूत्रयोः अर्थैकवाक्यता भवति। तथा हि- स्वं ‘इको यणचि’ इति शास्त्रम्। स्वोपस्थाप्यः अर्थः अच्पदार्थः। स्वोपस्थाप्यार्थनिष्ठविषयतानिरूपित-विषयताप्रयोजकं पदं ‘निर्दिष्टे’ इति पदम्। तद्घटितत्वम् ‘तस्मिन्निति.’ परिभाषासूत्रे वर्तते।

पुनः स्वपदेन ‘तस्मिन्निति.’ सूत्रम्। स्वोपस्थाप्यः अर्थः अव्यवहितपदार्थः। स्वोपस्थाप्यार्थनिष्ठविषयतानिरूपितविषयताप्रयोजकं पदं ‘अचि’ इति पदम्। तद्घटितत्वम् ‘इको यणचि’ इति सूत्रे वर्तते। अतः ‘इको यणचि’, ‘तस्मिन्निति निर्दिष्टे.’ इत्यनयोः सूत्रयोः अर्थैकवाक्यता भवति।

इत्येवम् एकवाक्यतायाः स्वरूपं तद्भेदाश्च समुपवर्णिताः।

## सङ्केताक्षराणि

म.भा. - महाभाष्यम्
पस्पशा. – पस्पशाह्निकम्
पृ. - पृष्ठम्
वा. – वार्तिकम्
आ. – आह्निकम्
पा.सू. - पाणिनीयसूत्रम्
भा.वा – भाष्यवार्तिकम्
सू.सं.- सूत्रसंख्या
प्र.टी. – प्रदीपटीका
परि.शे. – परिभाषेन्दुशेखरः
परि.सं. – परिभाषासंख्या

## पादटीकाः

1 म.भा., पस्पशा., पृ.-119(प्रो.जयशङ्करलालत्रिपाठी)
2 म.भा., (वा.) आ.-1
3 पा.सू.1.2.45
4 भा.वा.(सू.सं.- 1.2.45),पृ.-59(म.भा.-खण्डः -2)
5 म.भा.(सू.सं.- 1.2.45),पृ.-59(म.भा.-खण्डः -2)
6 म.भा., प्र.टी. . (सू.सं.- 1.2.45),पृ.-59(म.भा.-खण्डः -2)
7 परि.शे., परि.सं.-2,3
8 परमलघुमञ्जूषा, शक्तिनिरूपणम्, पृ.-7
9 पा.सू.6.1.77
10 पा.सू.6.1.88
11 पा.सू.1.1.1
12 पा.सू.1.1.66
13 परि. शे., भूति, पृ.-10
14 पा.सू.1.1.66
15 पा.सू.6.1.77
16 परि. शे., भूति, पृ.-10
17 पा.सू.1.1.5
18 पा.सू.7.3.84
19 परिभाषे., भूति.- पृ.10

## सन्दर्भग्रन्थाः

1. अष्टाध्यायीसूत्रपाठः, दीक्षितपुष्पा ;संस्कृतभारती, नवदेहली,2010
2. परिभाषेन्दुशेखरः (भूतितिलकेन विभूषितः), श्रीनागोजिभट्टः/ मतात्याशास्त्रिः.कै.म.,चौखम्बा-सुरभारती-प्रकाशनवाराणसी , ;2012
3. परिभाषेन्दुशेखरः (सुबोधिनी), श्रीनागोजिभट्टः/ आचार्यविश्वनाथमिश्रः; चौखम्बा-सुरभारती-प्रकाशन, वाराणसी, 2011
4. महाभाष्यम् (प्रथमनवाह्निक), महर्षिः पतञ्जलिः/ चारुदेवशास्त्री; मोतीलालबनारसीदासः , वाराणसि, 1968
5. सिद्धान्तकौमुदी (तत्त्वबोधिनी), श्रीभट्टोजिदीक्षितः ;श्रीलालबहादुरशास्त्रि-राष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली, 2009
6. व्याकरणमहाभाष्यम् (खण्डः -2), सम्पादकः-गुरुप्रसादशास्त्री; प्रतिभाप्रकाशनम्, दिल्ली, 2001
7. वैयाकरणसिद्धान्तकौमुदी (मूलमात्रम्) ; चौखम्बा पब्लिशर्स, वाराणसी, 2013

# सुपद्मव्याकरणे स्वरसन्धिः – एका आलोचना

**Atanu Adhya**
Assistant Professor
Dept. of Sanskrit
Raiganj University

यत्र संहिता वर्तते तत्र सन्धिर्जायते। संहितायाः अभावेऽपि सन्धिर्भवति। यथा एकस्मिन् पदे, धातूपसर्गयोः, समासे, सूत्रेष्वपि च सन्धिर्नित्यः स्यात्। यथा नै+अकः=नायकः, प्र+अर्थयन्ते= प्रार्थयन्ते, रवि+इन्द्रः=रवीन्द्रः, बृद्धि+आदैच्= बृद्धिरादैच् चेति। अन्यत्र सन्धिः कर्तुः विवक्षायां भवेदिति। मैथिलिब्राह्मणः पद्मनाभदत्तः सुपद्मव्याकरणं विरचितवान्। बहिर्शत्रुभ्यः संस्कृतव्याकरणस्य रक्षणाय तथा बङ्गीयछात्राणां कृते पाणिनीयव्याकरणस्य सरलाध्ययनाय बङ्गलिप्यां प्रक्रियापरम्परायां व्याकरणमिदं प्रणीतवान्। सुपद्मव्याकरणे न केवलं सूत्रकारस्य मतं गृहीतमपि तु भाष्य वार्त्तिकसूत्राणां ग्रहणं समधिकं परिदृश्यते।-यथा पाणिनीयव्याकरणे सन्धिः स्यात्, तथैव सुपद्मे अपि कथितमस्ति।मध्ये मध्ये मुग्धबोधव्याकरणस्य सूत्रैः विषयकार्यं स्पष्टीकरणाय उल्लेखं क्रियते।

**संकेतसूची**- दीर्घः, वृद्धिः, संहिता, लोपः

सम्-उपसर्गपूर्वकं धारणपोषणार्थकडुधाञ्-धातोः **'उपसर्गे घोः किः'**[1] इत्यनेन सूत्रेण किप्रत्यये कृते सन्धिशब्दोत्पत्तिर्जायते। यस्यार्थः भवति वर्णानामतिशयितः सन्निधिः संयोगः वा। संहिताप्रसङ्गे पाणिनिना प्रोक्तम् –**'परः सन्निकर्षः संहिता'**[2] अर्थात् वर्णानामतिशयितः सन्निधिः संहिता स्यात्। द्वयोः सुसन्निकर्षः सन्धिः[3]। अयं च सन्धिः मुख्यतया त्रिधा विभज्यते, तद्यथा 1. स्वरसन्धिः(अच्सन्धिः), 2. व्यञ्जनसन्धिः(हल्सन्धिः), 3. विसर्गसन्धिः। यत्र द्वयोः स्वरवर्णयोः सन्निधिः सः स्वरसन्धिः। स्वरसन्धिः पुनः अष्टविधः। यथा सवर्णदीर्घसन्धिः, गुणसन्धिः, बृद्धिसन्धिः, यण्सन्धिः, यान्तवान्तादेशसन्धिः, पूर्वरूपसन्धि, पररूपसन्धिः, प्रकृतिभावश्चेति। सुपद्मे विशेषतया लौकिकशब्दानां विस्तृतवर्णनं स्यात्, यत्तु अधः सूत्रप्रयोगपूर्वकमुपस्थाप्यते-

1. **अकः पूर्वोपराचोः प्राग्यणः**[4]। अस्य सूत्रस्यार्थः भवति- यणादेशात् प्राक् पूर्वपरयोरचोरेकादेशो वक्तव्यः इति। अर्थात् - अनेन सूत्रेण इकः स्थाने यण् आदेशः कर्तव्यः। पुनः इत्यस्मिन् प्रसङ्गे पाणिनीयव्याकरणे "इको यणचि"[5] इति सूत्रं समुपलभ्यते। प्रसङ्गेऽस्मिन् मुग्धबोधव्याकरणे "यलायवायावोऽचीचः"[6] इति सूत्रं समुपलभ्यते।

2. **अकः सवर्णे दीर्घः**[7]। अस्य सूत्रस्यार्थः - सवर्णे परतो इकः स्थाने पूर्वपराचोरेकादेशो दीर्घो भवति। पुनः इत्यस्मिन् प्रसङ्गे पाणिनीयव्याकरणे अनुरूपसूत्रं समुपलभ्यते।यथा- दण्डाग्राम् इति।अर्थात्- सवर्णः नाम समानः वर्णः स्वरः वा परे स्थिते 'अकः' स्थाने पूर्वाचः एवञ्चः पराचः एकादेशः दीर्घः स्यादिति। यथा- दण्ड+अग्रम्=दण्डाग्रम्। प्रसङ्गेऽस्मिन् मुग्धबोधव्याकरणे "सहर्णेर्घः"[8] इति सूत्रं समुपलभ्यते।

3.**आदिको गुणः**[9]। अस्य सूत्रस्यार्थः यथा - अवर्णान्तादुत्तरस्य इकः स्थाने पूर्वपराचोरेकादेशो गुणो भवति।यथा- सुखेन। अर्थात् अवर्णः नाम अकारस्य आकारस्य वा परे इक् स्थितेः उभयो स्थाने गुणः स्यादिति। यथा सुखः+इन =सुखेन इति। तथैव पाणिनीयव्याकरणे "आद्गुणः"[10] इति विधिसूत्रं समुपलभ्यते। यथा-देवोपमः, अर्द्धर्च्चः, तवल्कारः चेति। प्रसङ्गेऽस्मिन् मुग्धबोधव्याकरणे "आदिगेचोर्णुत्री"[11] इति सूत्रं समुपलभ्यते।

4. **वृद्धिरेजुठः**[12]। सूत्रस्यार्थः आदित्येव, अवर्णान्तादुत्तस्य एचः ऊठश्च पूर्वपराचोरेकादेशो वृद्धिर्भवति। अर्थात् पूर्वसूत्रात् आत् इति पदम् अनुवर्तते। पुनः अकारस्य आकारस्य वा परे यदि एच् तथा उठ् स्यात् तर्हि तयोः स्थाने बृद्धिः भवेत्। यथा- तव+एषा=तवैषा। पुनः तथैव जायैहत, तवौदनः। प्रसङ्गेऽस्मिन् पाणिनीयसूत्रमस्ति "वृद्धिरेचीति"[13]। प्रसङ्गेऽस्मिन् मुग्धबोधव्याकरणे "आदिगेचोर्णुत्री" इति सूत्रं समुपलभ्यते।

5. **स्वादीरेरिणोः**[14]।अस्य सूत्रार्थः स्वशब्दागीरेरिणोरिकः स्थाने गुणापवादो बृद्धिः स्यात्। पूर्वसूत्रात् बृद्धि इति पदम् अनुवर्तते। तथा स्वात् नाम स्वशब्दस्य परम् ईरिरेणोः नाम ईर् इति शब्दस्य तथा च ईरिन् शब्दस्य = बृद्धिः स्यात्। यथा स्व+इरी =स्वैरम्, तथा स्व+ इरिणी=स्वैरिणी चेति। अत्र पाणिनीयसूत्रमस्ति "एत्येधत्यूठ्सु"[15] इति। प्रसङ्गेऽस्मिन् मुग्धबोधव्याकरणे "स्वाक्षयोरीरोहिण्यौ"[16] इति सूत्रं समुपलभ्यते।

6. **ऋणः प्र-वत्सर-वत्सतर-दश-वसन-कम्बलादृणस्य**[17]। अस्य सूत्रार्थः ऋणादेरुत्तरस्य ऋणस्य ऋतो बृद्धिः स्यात्। अर्थात् वृद्धिः,आत्,पूर्वपराचोरेकः चेति पदत्रयं सूत्रमिदं प्रति अनुवर्तते। पुनः ऋणः-प्र-वत्सर-वत्सतर-दश-वसन-कम्बलशब्दानाम् अवर्णस्य परम् ऋणशब्दस्य ऋकारे परे स्थिते उभयोः वृद्धिः एकादेशः भवेत्। यथा- ऋण+ऋणम्=ऋणार्णम् इति। अत्र पाणिनीयसूत्रमस्ति "एत्येधत्यूठ्सु" इति तथा वार्त्तिकं "प्रवत्सतरकम्बलवसनदशार्णानामृणे" इति स्यात्। प्रसङ्गेऽस्मिन् मुग्धबोधव्याकरणे "ऋण-प्र-वसन-वत्सर-वत्सतर-दश-कम्बलस्यर्णः"[18] इति सूत्रं समुपलभ्यते।

7. **ऋतस्य तृतीयासमासे**[19]। अस्य आशयः तावत् तृतीयासमासे अवर्णान्तादुत्तरस्य ऋतस्य ऋतो बृद्धिः स्यात्। तृतीयासमासे अवर्गस्य अनन्तरम् ऋतशब्दः स्थितेः उभयोः बृद्धिः एकादेशः स्यात्। अत्र पाणिनीयसूत्रमस्ति "एत्येधत्यूठ्सु" इति तथा वार्त्तिकं "ऋते च तृतीयासमासे" इति स्यात्। यथा शीतेन+ऋतः=शीतार्त्तः इति। प्रसङ्गेऽस्मिन् मुग्धबोधव्याकरणे "त्रीसे त्वृतो व्रिम्"[20] इति सूत्रं समुपलभ्यते।

8. **प्रादूढोढ्येषैष्याणाम्**[21]। अस्य सूत्रार्थः प्रादेषामूढाडीनां बृद्धिः स्यात्। पुनः अत्र वृद्धिः, आत्, तथा पूर्वपराचोरेकः चेति पदत्रयम् अनुवर्तते।अतः सूत्रास्यार्थः यथा प्र इति उपसर्गात् अनन्तरम् उह-उदि-एष-एष्य-एष्यादि स्थिते प्रशब्दस्य अकारस्य तथा च उदादिशब्दानाम् उकार-एकारयोः एकादेशे बृद्धिः औकारः तथा च ऐकारः भवेदिति। यथा - प्र+उढः=प्रौढः इति।अत्र पाणिनीयसूत्रमस्ति "एत्येधत्यूठ्सु" इति तथा वार्त्तिकं "प्रादूहोढ्येषैष्याणाम्" इति स्यात्। प्रसङ्गेऽस्मिन् मुग्धबोधव्याकरणे "प्रस्योढोढ्यूहाः"[22] इति सूत्रं समुपलभ्यते।

9. **अक्षादूहिण्याः**[23]। अक्ष इति शब्दस्य अवर्णस्य परम् उहिणी इति शब्दे स्थिते उभयोः बृद्धि एकादेश स्यात्।यथा- अक्ष+उहिणी=अक्षौहिणी इति।अत्र पाणिनीयसूत्रमस्ति "एत्येधत्यूठ्सु" इति तथा वार्त्तिकं यथा "अक्षादूहिन्यामुपसंख्यानम्" इति स्यात्।

10. **ऋगादिधातोरुपसर्गात्**[24]। उपसर्गस्य अवर्णस्य परम् ऋकार-लृकारयोःवा आदौ स्थिते तर्हि, तयोः बृद्धिः एकादेशः स्यात्। यथा प्र+ऋच्छति=प्रार्च्छति इति। अत्र पाणिनीयसूत्रमस्ति "उपसर्गादृति धातोः"[25] इति।

11. **वा सुप एङादेश्च**[26]। अवर्णान्तात् उपसर्गात् अनन्तरम्एङ्-आदौ स्थिते एवञ्च ऋक्-आदौ स्थिते एवम्भूतानां सुबन्तधातूनां बृद्धिः एकादेशः भवेत्। यथा प्र+ऋषधीयति=प्रौषधीयति इति। अत्रापि पाणिनीयसूत्रमस्ति "उपसर्गादृति धातोः" इति। प्रसङ्गेऽस्मिन् मुग्धबोधव्याकरणे "गेर्धोरनेधिन एङ् ऋकोः"[27] इति सूत्रं समुपलभ्यते।

12. **इको यणचि**[28]। अच् परे स्थिते इकः स्थाने यथाक्रमे यण् इति आदेशः स्यात्।यथा- दधि+अत्र=दध्यत्र इति। अत्र पाणिनेः अनुरूपसूत्रमस्ति। प्रसङ्गेऽस्मिन् मुग्धबोधव्याकरणे "यलायवायावोऽचीचः"[29] इति सूत्रं समुपलभ्यते।

13. **एचोऽयवायावो वान्तो यि च प्रत्यये**[30]। एचः स्थाने क्रमेन अय्, अव्, आय्, आव्, ततः च वकारान्तः यकारे प्रत्यये परेऽपि आदेशःस्यात्।यथा- अग्ने+ए=अग्नये, गो+यति=गव्यति चेति। प्रसङ्गेऽस्मिन् पाणिनेः सूत्रद्वयमस्ति तद्यथा "एचोऽयवायावो","वान्तो यि च प्रत्यये" चेति[31]। प्रसङ्गेऽस्मिन् मुग्धबोधव्याकरणे "यलायवायावोऽचीचः" इति सूत्रं समुपलभ्यते।

14. **गोरदन्तावो वान्ते**[32]। अच् परे स्थिते पदान्तस्थितस्य गोशब्दस्य ओकारस्य स्थाने विकल्पे अकारान्तः अव् भवेदिति। यथा गो+ईश्वरः=गवेश्वरः गवीश्वरः वेति। प्रसङ्गेऽस्मिन् "अवङ् स्फोटायनस्य"[33] इति पाणिनीयसूत्रमस्ति। प्रसङ्गेऽस्मिन् मुग्धबोधव्याकरणे "वाव गोर्दान्ते"[34] इति सूत्रं समुपलभ्यते।

15. **गवाक्षगवेन्द्रौ नित्यम्**[35]। अर्थात् गवाक्षः, गवेन्द्रश्चेति पदद्वये नित्यः अवः स्यात्। यथा गो+अक्षः= गवाक्षः, गो +इन्द्र=गवेन्द्रः। पुनः विकल्पपक्षे गोऽक्षः तथा गविन्द्रः इत्यपि सिद्ध्यति। प्रसङ्गेऽस्मिन् "इन्द्रे च"[36] इति पाणिनीयसूत्रमस्ति। प्रसङ्गेऽस्मिन् मुग्धबोधव्याकरणे "गवेन्द्रगवाक्षौ नित्यम्"[37] इति सूत्रं समुपलभ्यते।

16. **गव्यूतिः क्रोशयुगे**[38]। अस्य सूत्रार्थः निपात्येते, अर्थात्क्रोशयुगार्थे अवबोधे तथा च स्थाने अव्-कृते निपातने गव्यूति इति पदं भवति। गव्यूतिः इत्यत्र प्रत्ययः यकारः परे स्थिते सति, क्रोशयुगे अर्थे ओ-स्थाने अव् आदेशः भवति। यथा गो+यूतिः=गव्यूतिः इति। प्रसङ्गेऽस्मिन् "वान्तो यि प्रत्यये" इति पाणिनीयसूत्रमस्ति।

17.**क्षय्यजय्यौ शक्यार्थे**[39]। शक्यार्थे गम्ये एतौ निपात्येते, शक्यार्थे अबवोधे क्षय्यजय्यौ चेति उभयपदे एकारस्थाने अय्-करणेन निपातनेन सिध्यते।यथा क्षे+यः=क्षय्यः इति।पुनः यत्र शक्यार्थः नैव अवगम्यते तत्र क्षेयः,जेयः चेति सिध्यते। प्रसङ्गेऽस्मिन् "क्षय्यजय्यौ शक्यार्थे" इत्येव पाणिनेः अनुरूपसूत्रमस्ति।

18.**क्रय्यस्तदर्थे**[40]। सूत्रेऽस्मिन् क्रय्यः, तदर्थे चेति पदद्वयमस्ति।अत्रक्रय्यःइति प्रथमान्तपदम्, तदर्थेइति सप्तम्यन्तपदम्।अस्य सूत्रार्थः क्रय्यार्थप्रसारिते द्रव्ये क्रय्यो निपात्यते,अर्थात् क्रयार्थेप्रसारिते द्रव्यावगम्ये क्रय्यः इति स्थाने अय् स्यात्, अयं निपातने सिध्यः।क्रे+यः=क्रय्यः, पुनः अन्यत्र क्रेयः इत्यपि सिध्यम्। प्रसङ्गेऽस्मिन् "क्रय्यस्तदर्थे" इत्येव पाणिनेः अनुरूपसूत्रमस्ति।

19. **पदान्ते**[41]। सूत्रेऽस्मिन् पदान्ते इति पदमेकमस्ति। अत्र पदान्ते इति सप्तम्यन्तपदम्। अतएव अधिकारसूत्रमिदमिति।
20. **एङोऽतो लोपः**[42]। पदान्ते स्थितस्य एकारस्य ओकारस्य च परम् अकारः स्थिते तस्य लोपः स्यात्। यथा- ते+अत्र=तेऽत्र इति। तथैव कोऽत्र इति।प्रसङ्गेऽस्मिन् पाणिनेः "एङः पदान्तादति"[43] इति पूर्वरूपमेकादेशसूत्रमस्ति। प्रसङ्गेऽस्मिन् मुग्धबोधव्याकरणे "एङोऽतः"[44] इति सूत्रं समुपलभ्यते।
21.**ङसिङसोश्च**[45]। पदमध्यस्थितस्य एङः परं ङसि ङसस्य च अकारस्य लोपः भवेत्। यथा- अग्ने+अस् इत्यत्र उक्तसूत्रेण अकारस्य लोपः तथा च सस्थाने विसर्गे अग्ने इति पदं सिध्यति। प्रसङ्गेऽस्मिन् "ङसिङसोश्च" इत्येव पाणिनेः अनुरूपसूत्रमस्ति।
22. **अदेत्यपदान्तस्याजसि**[46]। अकारः एकारः चेति परे स्थिते पदान्तभिन्नः नाम पदमध्यस्थितस्य अकारस्य लोपः भवति परन्तु, यदि जस् परे अस्ति चेत् नैव भवेदिति।यथा- यज+अन्ते=यजन्ते।
23. **धात्वेङि प्रदेरवर्णस्यनिणेधोः**[47]। इनेधिधातुभिन्नस्य धातोः ए ओ चेति परे स्थिते प्र-प्रभृति-उपसर्गाणाम् अकारस्य लोपः भवति।पुनः अत्रापि पूर्वसूत्रात् केवलम् अकारस्य आकारस्य चेति उभयोः लोपः भवेत्, तस्माद्धि अत्र 'अवर्णस्य' इत्यस्य पुनरुल्लेखः क्रियते। पुनः अत्र बृद्धेः अपवादः भवति।यथा- प्र+एजते=प्रेजते इति। प्रसङ्गेऽस्मिन् मुग्धबोधव्याकरणे "गेर्धोरनेधिन एङ् ऋकोः" इति सूत्रं समुपलभ्यते।
24. **शकादेरन्ध्वादौ**[48]। अन्धुप्रभृतयः शब्दाः परे स्थिते शक्-प्रभृतिशब्दानाम् अकारस्य आकारस्य वा लोपः भवेत्।यथा शक् +अन्धुः=शकन्धुः, पुनः तथैव कुलटादयः इति। प्रसङ्गेऽस्मिन् अचोऽन्त्यादि टि इति पाणिनीयसूत्रमस्ति, तथा अत्र शकन्ध्वादिषु पररूपं वाच्यम् इति वार्त्तिकमपि वर्तते। प्रसङ्गेऽस्मिन् मुग्धबोधव्याकरणे "मनीषा"[49] इति सूत्रं समुपलभ्यते।
25. **ओमाङोश्च**[50]। ओम् आङ् चेति शब्दाः परे स्थिते अवर्णस्य लोपः भवति। यथा आ+ऊढा इत्यत्र गुणैकादेशे ओढाइति स्यात्। पुनः इत्यस्मिन् प्रसङ्गे पाणिनीयव्याकरणे "ओमाङोश्च" इति सूत्रं समुपलभ्यते।अतः अद्य+ओढा इत्यत्र आकारस्य दर्शनभावेऽपि ओढा इत्यस्य आङ् परे स्थिते अद्य इत्यस्य अकारस्य लोपः भवेदिति।
26. **एवे चाऽनियोगे**[51]। अस्य सूत्रार्थः एवे परेऽवर्णस्य लोपः स्यात्। अत्रापि अवर्णस्य लोपः भवति, परन्तु नियोगे नाम अवधारणे अर्थे नैव भवति। यथा- अद्य+ एव = अद्येव इति।इत्यस्मिन् प्रसङ्गे पाणिनीयव्याकरणे "एङि पररूपम्" इति सूत्रं तथा "एवे चानियोगे" इति वार्त्तिकं समुपलभ्यते।
27. **ओत्वोष्ठयोर्वा समासे**[52]। अस्य सूत्रार्थः अनयोः परयोः समासेऽवर्णस्य लोपो वा स्यात्। पुनः अत्रापि 'अवर्णस्य लोपः' इत्यस्य अनुवृत्तिर्भवति। यथा- स्थुल+ओतुः = स्थुलोतुः, पुनः तथैव स्थौतुः इति।प्रसङ्गेऽस्मिन्पाणिनीयव्याकरणे एङि पररूपम् इति सूत्रं तथा ओत्वोष्ठयोः समासे वा इति वार्त्तिकं समुपलभ्यते। प्रसङ्गेऽस्मिन् मुग्धबोधव्याकरणे "वौष्ठोत्वोः से"[53] इति सूत्रं समुपलभ्यते।

28. **न सन्धिर्विसर्ग-य-व-लोपे**[54]। अस्य सूत्रार्थः अचीत्येव, पदान्ते विसर्गादिलोपे कृतेऽचि पुनः सन्धिर्नभवति। अर्थात् यत्र विसर्गस्य, यकारस्य, वकारस्य च लोपः भवति तत्र सन्धिः नैव भवेदिति। यथा कः एषः, क एषः इति।

29. **सैष इति पादपूरणे**[55]। श्लोकस्य पादपूरणाय सः-एषः इत्यत्र विसर्गे लोपेऽपि सन्धिर्भवति। यथा सैष दाशरथी रामः इति।

30. **ईदूदेतो द्विवचनस्य। मणीवादेर्वा**[56]। अस्य सूत्रार्थः ई, ऊ, एकारान्तस्य द्विवचनस्याचि परे सन्धिर्न भवति। अर्थात् अच् परे स्थिते ईकारान्तद्विवचनस्य, ऊकारान्तद्विवचनस्य, एकारान्तद्विवचनस्य च पदस्य सन्धिः नैव भवति। यथा अग्नी+इमौ = अग्नीइमौ, पुनः तथैव वायू+अत्र इत्यादिष्वपि। प्रसङ्गेऽस्मिन् पाणिनीयव्याकरणे ईदूदेद्द्विवचनं प्रगृह्यम्[57] इति सूत्रंसमुपलभ्यते। प्रसङ्गेऽस्मिन् मुग्धबोधव्याकरणे "व्वद्वेऽमीषे"[58]इति सूत्रं समुपलभ्यते।

31. **अदसो मात्**[59]। अदसः मकारात् परस्य ईकारस्य ऊकारस्य च सन्धिः नैव भवति। मकारस्य परम् एकारस्य सम्भवनं नैव स्थिते सति अत्र एकारस्य अनुल्लेखः इति। अमी अत्र अदसः मकारोत्तरवर्ती ईकारः, ततः अम्यत्र इति, पुनः अत्र इकोयणचि इत्यस्य कार्यं नैव भवति। एवञ्च तथैव अमू आनय इत्यत्र। प्रसङ्गेऽस्मिन् "अदसो मात्" इत्येव पाणिनेः अनुरूपसूत्रमस्ति।

32. **एकस्याचोऽनाङोऽव्ययस्य**[60]। आङ्-भिन्नस्य एकस्वरमात्राव्ययस्य सन्धिः नैव भवति। यथा अ अवेहि इत्यत्र अ इत्यव्ययः, तथैव इ, उ तदर्थं सवर्णे दीर्घत्वस्य निषेधः इति। वाक्यस्मरणयोः आ इति अव्ययम् अस्ति इत्यस्य ङ इत् नैव भवेत्। अत्र सन्धिः नैव स्यात्। यथा आएवं मन्यसे इति। तदानीं जिज्ञायते अनाङ् इति किम् उच्यते ईषदर्थे क्रियायोगे मर्य्यादायाम् अभिविधावाङ्। यथा- आ-उष्णम् – ओष्णम्। तथैव आ-इहि-एहि, एवम् अन्येष्वपि। प्रसङ्गेऽस्मिन् "ओत् निपात एकाजनाङ्[61]" इत्येव पाणिनेः अनुरूपसूत्रमस्ति। प्रसङ्गेऽस्मिन् मुग्धबोधव्याकरणे "लोपोऽस्योमाङोः"[62]इति सूत्रं समुपलभ्यते।

33. **ओतः**[63]। ओकारान्ताव्ययस्य सन्धिः नैव भवेदिति निर्दिशति अनेन सूत्रेण। यथा – नो, अहो, उताहो एते ओकारान्ताव्ययाः एतेषां सन्धिः नैव भवतीति। पुनः सन्धिः करणेन नविह एवं स्यात्। तथैव अन्यत्रापि। प्रसङ्गेऽस्मिन् "ओत्"[64] इत्येव पाणिनेः अनुरूपसूत्रमस्ति।

34. **वा सम्बुद्धावितौ**[65]। इति शब्दः परे स्थिते सम्बोधनस्य एकवचननिष्पन्नस्य ओकारस्य विकल्पेन नैव सन्धिः भवति। यथा वायो+इति = वायविति। अत्र जिज्ञासते इताविति किमर्थम् उच्यते वायवायाहि इत्यत्र वायो+आयाहि अत्र 'इति' शब्दः परे नैव स्थिते नित्यसन्धिः अव् इति भवति। प्रसङ्गेऽस्मिन् पाणिनीयव्याकरणे "सम्बुद्धौ शाकल्यस्येतावनार्षे"[66] इति सूत्रं मुग्धबोधव्याकरणे "स्योद्वेतौ"[67]इति सूत्रं च समुपलभ्येते।

35. **ऊञ ऊ च**[68] । अर्थात् इतौ परे उञः न सन्धिः पुनः विकल्पेन तस्य च ओ वा स्यादिति। यथा ऊहति, विति, ऊइति चेति।

36. **दूरात् आह्वाहने** [69]। दूरात् आह्वाने (सम्बोधने) अर्थे विकल्पे सन्धिः नैव भवति। यथा – भो विप्र आगच्छ, भो विप्रागच्छ वेति। प्रसङ्गेऽस्मिन् "दूराद्धूते च"[70] इति पाणिनीयसूत्रमस्ति।

37. **ईदूदाद्यसन्धि प्रगृह्यम्** [71]। अर्थात् द्विवचनान्तानाम् ई-ऊ-प्रभृतीनां येषां सन्धिनिषेधः स्यात्तेषां प्रगृह्यसंज्ञा भवतीति। प्रसङ्गेऽस्मिन् पाणिनीयव्याकरणे "ईदूदेद्द्विवचनं प्रगृह्यम्"[72] इति सूत्रंसमुपलभ्यते।
38. **गोरति** [73]। अकारः परे स्थिते गोशब्दस्य विकल्पेन सन्धिः नैव भवति। यथा गो-अग्रम्, गवाग्रम्, गोऽग्रम्चेति। प्रसङ्गेऽस्मिन् "अवङ् स्फोटायनस्य"[74] इति पाणिनीयसूत्रमस्ति। प्रसङ्गेऽस्मिन् मुग्धबोधव्याकरणे "गोर्वा"[75]इति सूत्रं समुपलभ्यते।
39. **इकोऽसवर्णे ह्रस्वश्च** [76]। अर्थात् – पदान्ते असवर्णे अचि परे विकल्पे इकः सन्धिः नैव भवति, पुनः अत्र दीर्घस्वरस्य ह्रस्वस्वरः भवति। यथा- दधि-अत्र इति। पुनः ऋकारे परे स्थिते ऋवर्णावर्णयोः च सन्धिः नैव भवति। यथा पितृ-ऋणम् इति।प्रसङ्गेऽस्मिन् "इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च"[77] इति पाणिनीयसूत्रमस्ति।
40. **यणा व्यवधानं व्याडिगालवयो**[78] । सूत्रेऽस्मिन् यणा,व्यवधानम्, व्याडिगालवयोः चेति पदत्रयमस्ति। अत्र यणा इति तृतीयान्तपदम्, व्यवधानम्इति प्रथमान्तपदम्, व्याडिगालवयोःइति षष्ठ्यन्तपदम्। अस्य सूत्रार्थः अनयोर्मतेन इको यणा व्यवधीयते। अर्थात् – व्याडिगालवयोः मतेन इकः यणा व्यवधीयते। यथा दधि+अत्र = दधियत्र, तथैव अन्यत्रापि।

उपयुक्तादालोचनातः ज्ञायते यत् पाणिनीयव्याकरणस्यानुकरणेनैव पद्मनाभदत्तः सुपद्मव्याकरणस्य सन्धिप्रकरणं विरचितवान्। प्रायशः स्वरसन्धिविषये प्रतिपदे प्रतिसूत्रे पाणिनिव्याकरणस्य प्रभावो दृश्यते। स्पष्टीकरणार्थं स्थाने स्थाने मुग्धबोधव्याकरणस्य सूत्राणि अपि प्रदर्शितानि। बहुषु स्थलेषु पाणिनिव्याकरणस्य सूत्राणां योऽर्थः तमेवार्थमाधारीकृत्य पद्मनाभेन स्वस्य ग्रन्थे सूत्राणि प्रणीतानि। कुत्रचित् साक्षात् सूत्राण्युद्धृतानि, कुत्रचिद्वा अनुवादकत्वेन सूत्राणि प्रणीतानि।सिद्धान्तगतो नास्ति कोऽपि भेदः। परन्तु सरलीकरणार्थं स्पष्टार्थम् एव तस्य धृष्टता इति सारः।

## पादटीकाः

1. अष्टाध्यायी - 3.3.92
2. अष्टाध्यायी - 1.4.44
3. कलापव्याकरणम्
4. सुपद्मव्याकरणम्-1.2.1
5. अष्टाध्यायी - 6.1.77
6. मुग्धबोधव्याकरणम्-1.2.35
7. सुपद्मव्याकरणम् -1.2.2, अष्टाध्यायी- 6.1.101
8 . मुग्धबोधव्याकरणम्-1.2.22
9.सुपद्मव्याकरणम्-1.2.3
10. अष्टाध्यायी – 6.1.87
11. मुग्धबोधव्याकरणम् -1.2.23
12. सुपद्मव्याकरणम्-1.2.4
13. अष्टाध्यायी – 6.1.88
14. सुपद्मव्याकरणम्-1.2.5
15. अष्टाध्यायी - 6.1.89
16. मुग्धबोधव्याकरणम् -1.2.31
17. सुपद्मव्याकरणम्-1.2.06
18. मुग्धबोधव्याकरणम्-1.2.30
19. सुपद्मव्याकरणम्-1.2.07
20. मुग्धबोधव्याकरणम् -1.2.29
21. सुपद्मव्याकरणम्-1.2.08
22. मुग्धबोधव्याकरणम् -1.2.32
23. सुपद्मव्याकरणम् -1.2.09
24. सुपद्मव्याकरणम्-1.2.10
25. अष्टाध्यायी - 6.1.91
26. सुपद्मव्याकरणम्- 1.2.11
27. मुग्धबोधव्याकरणम्1.2.24-
28. सुपद्मव्याकरणम् 1.2.12
29. मुग्धबोधव्याकरणम् 1.2.35-
30. सुपद्मव्याकरणम्-1.2.13

31. अष्टाध्यायी – 6.1.78, 6.1.79
32. सुपद्मव्याकरणम् -1.2.14
33. अष्टाध्यायी – 6.1.123
34. मुग्धबोधव्याकरणम्—1.2.36
35. सुपद्मव्याकरणम् 1.2.15
36. अष्टाध्यायी – 6.1.124
37. मुग्धबोधव्याकरणम्- 1.2.37
38. सुपद्मव्याकरणम् -1.2.16
39. सुपद्मव्याकरणम् -1.2.17 अष्टाध्यायी- 6.1.81
40. सुपद्मव्याकरणम्-1.2.18 अष्टाध्यायी -6.1.82
41. सुपद्मव्याकरणम् -1.2.19
42. सुपद्मव्याकरणम्-1.2.20
43. अष्टाध्यायी – 6.1.109
44. मुग्धबोधव्याकरणम्-1.2.39
45. सुपद्मव्याकरणम्-1.2.21
46. सुपद्मव्याकरणम्-1.2.22
47. सुपद्मव्याकरणम्-1.2.23
48. सुपद्मव्याकरणम्-1.2.24
49. मुग्धबोधव्याकरणम्-1.2.34
50. सुपद्मव्याकरणम्-1.2.25
51. सुपद्मव्याकरणम्-1.2.26
52. सुपद्मव्याकरणम् -1.2.27
53. मुग्धबोधव्याकरणम्-1.2.28
54. सुपद्मव्याकरणम्-1.2.28
55. सुपद्मव्याकरणम्-1.2.29
56. सुपद्मव्याकरणम्-1.2.30
57. अष्टाध्यायी – 1.1.11
58. मुग्धबोधव्याकरणम्-1.2.42
59. सुपद्मव्याकरणम्-1.2.31
60. सुपद्मव्याकरणम्-1.2.32
61. अष्टाध्यायी -
62. मुग्धबोधव्याकरणम्-1.2.26
63. सुपद्मव्याकरणम्-1.2.33, अष्टाध्यायी
64. अष्टाध्यायी – 1.1.15
65. सुपद्मव्याकरणम्-1.2.34
66. अष्टाध्यायी – 1.1.16
67. मुग्धबोधव्याकरणम्-1.2.43
68. सुपद्मव्याकरणम्- 1.2.35
69. सुपद्मव्याकरणम्-1.2.36
70. अष्टाध्यायी – 8.2.84
71. सुपद्मव्याकरणम् -1.2.37
72. अष्टाध्यायी – 1.1.11
73. सुपद्मव्याकरणम्- 1.2.38
75. अष्टाध्यायी- 6.1.123
75. मुग्धबोधव्याकरणम्—1.2.40
76. सुपद्मव्याकरणम्-1.2.39
77. अष्टाध्यायी – 6.1.123
78.सुपद्मव्याकरणम्-1.2.40

## परिशीलितग्रन्थाः

1. पद्मनाभदत्तस्य *सुपद्मव्याकरणम्,* श्रीउपेन्द्रनाथभट्टाचार्य-मन्मथनाथभट्टार्यः च (सम्पा)., कलिकाता, 1306 वङ्गाव्दः।

2. पद्मनाभदत्तस्य *सुपद्मव्याकरणम्*, त्रैलोक्यनाथभट्टाचार्यः (सम्पा)., कलिकाता, 1320 वङ्गाव्दः।

3. पद्मनाभदत्तस्य *सुपद्मव्याकरणम्*, श्रीवीरेशनाथविद्यासागरः (सम्पा)., कलिकाता, 1345 वङ्गाव्दः।

4. पद्मनाभदत्तस्य *सुपद्मव्याकरणम्*, डः आर.एस.सैनी (सम्पा)., भारतीयविद्याप्रकाशनम्, दिल्ली, 1989 ख्रीष्टाव्दः।

5. पाणिनेः *अष्टाध्यायीसूत्रपाठः,* पण्डितब्रह्मदत्तजिज्ञासुः, (सम्पा)., रामलालकपूरट्रास्ट, हरियाना, 1977 ख्रीष्टाव्दः ।

6. बोपदेवस्य *मुग्धबोधव्याकरणम्,* निरञ्जनस्वरूपब्रह्मचारिदेवशर्मा (सम्पा)., संस्कृतपुस्तकभाण्डार, कलिकाता, 1377वङ्गाव्दः।

**सन्दर्भग्रन्थाः**

1. देवशर्मा ,श्रीकालीजीवनः , *शब्दशास्त्रेरइतिहासः* ,रामकृष्णमिशनइनस्टिटिउट अव कालचार , प्रथमसंस्करणम्, कलिकाता, 1995 ख्रीष्टाव्दः।

2. हालदारः ,गुरुपदः ,*व्याकरणदर्शनेरइतिहासः*, प्रथमखण्डः, कलिकाता ,1350 वङ्गाव्दः।

3. दाहालः ,लोकमणिः ,*व्याकरणशास्त्रेतिहासः,* द्वितीयसंस्करणम्, भारतीयविद्याप्रकाशनम्,वाराणसी, 1989 ख्रीष्टाव्दः।

4. मिश्रः ,आद्याप्रसादः ,*प्रक्रियाकौमुदीविमर्शः* , वाराणसीसंस्कृतविश्वविद्यालयः, वाराणसी, 1966 ख्रीष्टाव्दः।

5. मीमांसकः, युधिष्ठिरः, *संस्कृतव्याकरणशास्त्र का इतिहास,* रामनाथत्रिपाठी (सम्पा.), चौखाम्बा पावलिशार्स, वाराणसी, 2006 ख्रीष्टाव्द।

6. वर्मा, सत्यकामः, संस्कृतव्याकरण का उद्भव और क्रमविकाश, मोतीलाल वनारसी दास, प्रथमसंस्करण्, दिल्ली, 1971ख्रीष्टाब्दः।

# Indian Knowledge System for the Holistic Value Education

**Dr. Pallabi Saikia**

Assistant Professor

Department of Education

Jhanji Hemnath Sarma College

## Abstract

Indian knowledge system has been evolved over time. For the sustainability of the ancient knowledge and to enhance the human welfare these rich values, knowledge and philosophy should be transmitted to our next generation. The ancient Indian's practices and knowledge were passed on in the forms of manuscripts, traditions, practices etc. Indian perspective to education is to provide an overall development of an individual. In India, if we explore the meaning of education, we will find that education is connected with overall development. Indian life style is based on four goals- Dharma, Artha, Karma and Moksha. The main objectives of the paper is to study the goals of value based holistic education from the perspective of Indian Knowledge System and to study the role of teacher from the perspective of Indian Knowledge system.

**Key Words:** knowledge, Value, Education.

## Introduction

The ancient India "Bharat" has a very rich heritage. The Indian Knowledge System comprises the ancient and contemporary rich knowledge and practices. The ancient Indian's practices and knowledge were passed on in the forms of

manuscripts, traditions, practices etc. The Indian Knowledge System teaches us how to inquire? In what way and to what extent? The entire Indian Knowledge Tradition has always focused on "how" rather than "what." Indian Knowledge system covers ancient knowledge to address current and future challenges.

Indian perspective to education is to provide an overall development of an individual. Indian perspective always means that education should be for overall development. In India, if we explore the meaning of education, we will find that education is connected with overall development. Indian perspective always searches for overall development of an individual through education. So, from the perspective of Indian Knowledge System, Education has mainly two types- para and apara. It comes from Vedas and Vedanta. Para vidya refers to the supreme knowledge that provides the actual goal of human life. Apara vidya stands for all technical or material knowledge that is needed for our substance. It is required for material development. These two types of education found only in Indian knowledge system.

Indian life style is based on four goals- Dharma, Artha, Karma and Moksha. For the final goal para vidya is necessary. Dharma means we have to do our responsibility properly. Artha means earning money. In holistic value education, the earning of money means 'Grahastya" was given the responsibility to earn money because he has that type of strength and responsibility to earn and expend the money properly. In ancient India, it was tought how to live a balance life. "Karma" decides our lives to come. It decides our sufferings in the cycle of life and death. "Moksha" is also called as Vimoksha, Vimukti, and Mukti. Muksha is considered as the highest goal of life. It means seeking liberation from the samsara. So, at that time the society was balanced and that is why NEP2020 gives importance in holistic value education.

**Objectives**

- To study the goals of value based holistic education from the perspective of Indian Knowledge System.
- To study the role of teacher from the perspective of Indian Knowledge system.

Education is a two way advancement. The first one is the journey from unknown to known and another one is a journey from known to unknown. These two opposite journey mingle together.

The basic concept of education is to provide freedom of thought. "Sa Vidya Ya Vimuktaye" is the most important definition of value based holistic education. It is found in the ancient Indian chronicles.." Education gives us freedom of thought. It comes through our study, through our teachers, through our practices etc. But however or whatever it comes to us should be free and it is the most important outcome of education that comes from free thought process. In "Sa vidya ya Vimuktaye" The term "Vimukti" means the "Power of thought." i.e. Education which provides us to think freely and it is the most important thing of education. "Vimukti'' comes with value. We can't have freedom of thought without attaching values. We should not depend on others to think new concepts, ideas, parameters of life etc. So, we must do those things which are percolated to our next generation with values. We consciousness should be on our do's and don'ts. Through do's we must percolate those ideas which have eternal effect through generation after generation. Again, in the same way, we have to avoid those actions which neither help our next generation nor help ourselves. So, these are the goals of value based holistic education from the perspective of Indian Knowledge System.

Our education is not only for us, it is also for the emancipation of the people of our surroundings. So, holistic value education refers to that type of education which bring cumulative growth or community development. From the perspective of

Indian Knowledge system education has an explosive effect in the field of education because education of a single individual can bring the emancipation of many people. The Ishopanishad teaches us to stay with the enjoyment that comes through renunciation.

Indian perspective of education is to explore the highest truth. So, the prayer "asatoma sadgamaya, tomaso ma jyotirgamaya, mrityur ma mitagamaya" connected to our day to day life. The term "sat" means existent, "asat" means non existent. "Asatoma sadgamaya'' means we want to search for this existant and we come to far away from non- existant. So, this is the prayer which searching the ultimate truth. "Existent" means what is really true and "non existent" means that is not true.that is non- existent cannot be our goal. Only existent can be our goal. Through holistic value based education we come to know what is existent and we don't want to know or connect our life what is nonexistent.

**Role of teacher from the perspective of Indian Knowledge system.**

*"Shiksha"* means to teach, to control and to instruct. Teacher can bring some values in the mind of learners. We should let the children learn for the betterment of the society. A teacher can be a guide for students for whole life. A teacher is a builder of generation. Teachers can make different types of marks in the mind of learners. So, the responsibility of a teacher is to bring a model mark in the mind of a learner. Teacher is the creator of a generation so, the whole responsibility of their future is on his shoulder. Teachers role is copied by thousands of learner. So, the teacher will have to familiar with the value base education and the holistic way of imparting knowledge.

In ancient India "Gurukul" education system was existed. The students used to live in Gurukul and "Guru" imparted all knowledge. There was formal education system in ancient India and a student had to go through some rules for his admission

under a particular teacher. A teacher must have the aspiration to take his followers to reach the goal of education. The teacher or "Guru" was one who could teach the idea of emancipation. Spiritual knowledge is imparted by the "Guru". "Guru" were those who eradicate the darkness from our mind and bring enlighten of knowledge. In ancient education system "Guru" was not just an instructor but also a guide and mentor of the students. The "Guru" imparted knowledge through discussions, lectures and recitation. The key pillars of India's ancient knowledge system is the vedic literature. The vedic literature acts as guiding light for the ancient Indian sages. The Vedas – Rigveda, Samaveda, Yajurveda and Artharvada hold immense importance in Indian culture and spirituality.

In ancient India, Education and knowledge comes in three processes i.e. Sravana, Manana and Niddhyasana. Sravana means listened and understood. It means students acquired knowledge or truth through their ears from the "Guru's mouth. The knowledge did not come in written form. The knowledge that comes from "Guru's" mouth is called "Sruti.''

The second knowledge process is "Manana." Here, the "Guru" will ask questions and students will answer them. Here main concentration was given on thinking.

Nidhyasana, the third process concentrated on fully understanding of the truth taught by the "Guru." It is the process where students not only practice the truth but also realize the truth.

**Conclusion**

Indian Knowledge system is unique. It has been evolving over time. For the sustainability of the ancient knowledge and to enhance the human welfare these rich knowledge, philosophy and values should be transmitted to our next generation. Now

India is providing serious attention in preserving and promoting its philosophy, values and cultural heritage. India's New Education Policy 2020 aims to bring India into a "Global Knowledge. Superpower." So, the country has taken the initiative of gaining the information, skills, ideas and attitudes which will commit the responsibility to issues like human rights and global wellbeing.

## Bibliography

1. Bonia K.D. and Singh V. (2022) Teacher Education in Assam, as it stands. International Journal of Novel Research and Development. *International Journal of Novel Research and Development.* Vol-7, Issue-3.

2. Laxmi V. and Kalluraya S. (2023) History of the Indian Knowledge System. ERPA *International Journal of Multidisciplinary Research.* Vol-9, Issue- 12.

3. Basak G. (2024) Prospects and challenges of Teacher Education on NER 2020. *EPRA International Journal of Research and Development.* Vol- 1.2413.

4. Thakar K. and Desai R. (2023) Teacher Education Curriculum for B.Ed. with a focus on Indian Knowledge System, keeping in mind the National Education Policy 2020. *International Journal of Research in all subjects in Multi Language.* Vol- ii, Issue-12.

5. Bhattacharjee S. (Teaching- Learning Centre, Tezpur University) (2024, April 9) *Holistic.*

*Value Education: Perspectives from IKS (Theme-II)* YouTube. https://youtu.be/f0jcXm4UJo?si=dVTgimLwJRqxy0fv

# Buddhist Ethics and It's Impact on Successive Generation

**Nabanita Giri**

Ph.D Research Scholar

Rabindra Bharati University

All the threshold of the twenty first century it is unworthy to believe human beings as the greatest creation of the almighty. In day-to-day life, for their own interest human beings, through their thoughts activates have sometimes proven that they are even more miserable than animals. Usually, we do not need to think much about ethical education. But when a person faces problems in his life, he realises the need of ethical education. For example, COVID-19 pandemic situation has made us to understand the importance of moral education in human life. This unprecedented situation has taught us a lot. The morality of this situation is that only a human can stand beside another by the virtue of humanism.

To survive in our society people, need moral education. In our society there is no question about the ethical sense as regards the behaviour of animals. Suppose your cow ruined my garden or your cat feasted my fish, no matter how much they create problems in our lives, as because they have no ethical sense behind their acts and activities these are completely beyond ethical and moral acts like human beings.

However, in order to live a moral life in this society in peaceful manner, man have to maintain few rules of moral teaching which start from childhood. To build the society in a beautiful way and to important moral learning, the importance of three individuals, i.e., father, mother and teacher is vital.

Ethics basically is a science of discrimination between right and wrong and the basic concept fundamental principles is decent human contact.

Ethics is a branch of philosophy that describes the conduct of human behaviour, with respect of rightness and wrongness simple or difficult.

According to the H.H. Williams: - “In its widest sense, the term Ethics would imply an examination into the general character and habits of mankind and would even involve a description or history of the habits of men in particular societies living at different periods of time ”.

From very childhood, a child is taught what is right and what is wrong. what is merit and what is demerit. Basically, ethics trait which helps to learn what is our duties and responsibilities as social human being. we can see that the present education system is focusing not only the curriculum-based studies but also, they are equally paying attention of their mental and emotional growth. On the other hand, we can say if we want to make this society civilized then we need just three people in our life they are – Father, mother and our teacher (Guru).

“The disciple must have faith in the guru (teacher). In the west the teacher simply gives intellectual knowledge, that is all. The relationship with the teacher is the greatest in life. My dearest and nearest relative in life is my guru. Next mother, then my father. My first reverence is to the guru”

Swami Vivekananda

The ethics of human life is absolutely necessary this procedure without ethics our actions would be random and aimless. By this we can reach the right goals in our life.

Guru Nanak, the founder of Sikh, was asked – which was the greater of the two religions prevalent in India Hinduism or Muslim? He replied that without ethics and morality both will be losers.

Philosophy of Buddha is a life changing philosophy because his doctrine was no inspiration from any god or external source of power, The Buddha's teaching is

meant not only for monks in monasteries, but also for ordinary men and women living at home with families. He believed about human intelligence, which we can get through practicing of meditation, Eight-Fold Path and Four Noble Truth.

If we follow the Eightfold path, we could know the path of escaping of from our decay, death and misery. Most of the Buddha's teaching based on this doctrine.

1) Right Views (Sammā Diṭṭhi) – Rid yourself of all superstition's activities.

2) Right intension (Sammā Sankappa) – Give up cruelty and anger.

3) Right Speech (Sammā – vācā) - One useful word better than a thousand useless words.

4) Right Action (Sammā Kammanta) – Charity, truth and kindness.

5) Right Livelihood ( Sammā Ājiva) – Right acts and action produce right Livelihood.

6) Right Effort (Sammā Vayāāma) – Cultivate some good qualities.

7) Right Mindfulness – (Sammā Sati) – Love and devotion bring happiness; bad mind brings miseries.

8) Right Concentration – (Sammā Samadhi) – Ultimate leads to liberation from the source of suffering and sorrow.

"Eight-fold path is the best of all path
The Four Noble Truths are the best of all truths
The passion lessness (Nibbāna ) is the best Dhammas ".

Dhammapada

On the other hand, according to Buddhism a man can lead his life self perfectly by practicing the Noble eight-fold path. The Noble eight-fold path concept very practical and fruitful. One does not need to be a follower of any particular religion to practice the eight-fold path.

As socialised beings we need to learn some habits in our daily life. control of self-desire is very important in our daily life.

We all know about Buddha's teaching, it expressed that the attainment of salvation depends upon the protection of character and devotion to good deeds. Only our good deeds we can reach to the supreme goal, our family will not bear the burden of our sin.

Neither sons, nor father, nor friend stand to save. There is no protection from kinsmen for one at the jaws of death. Having realised this fact a wise one restrained morally clears the way to Nibbāna expeditiously.

The Buddhist philosophy has two parts. The first Part is based on philosophical teaching and another one is moral teaching. The fundamental principle of Buddha's philosophy is the theory of equation or dependent origination.

These eight factors linked with three essentials of Buddhist discipline namely: (a) Ethical conduct (sīla), (b) mental discipline (samadhi) and (c) Wisdom (paňňā).

Ethical conduct (sīla) based on mainly love and compassion. sīla which leads to enlightenment and freedom.

Mental discipline (samādhi) which maintains how to overcome greed, hatred delusion and rid ourselves of karma. Wisdom based on intellectual side.

According to Buddha, for a man to be perfect there should be two qualities which compassion(karma) and wisdom (paňňā). Compassion means kindness, tolerate and love. On the other hand, wisdom based on the qualities of the mind.

The Buddha showed us how to overcome of human suffering and misery. Swami Vivekananda received the moral teaching from Gautam Buddha.

"The Swami was always deeply preoccupied with the historic and philosophic significance of Buddhistic doctrine".
The heart of the Buddhist philosophy on the four noble truths.

The four Noble truths are below:

1> Dukkha >> life is unsatisfactory and suffering.

2> Samudaya >> There is a cause of suffering (origin from Dukkha).

3> Nirodha >> There is a cessation of suffering or dukkha.

4> magga >> The path that leading out of suffering is called the Noble eight-fold path.

The famous Buddhist scriptures is „Dhammapada", this book generally known as the ethical scriptures.

Without ethics our actions would be random and aimless. Ethics is basically trait which helps to allow the right path and help to be honest.

This book beautifully describes what people should do or should not do.

We should follow the ethics of Discipline:

"yassa cetam samucchinna*ṃ* mūlaghacca*ṃ* samūhata*ṃ*

Sa vantadoso medhāvī sādhūrupoti vuccati"

So, here we can say no dishonest can be a saint person by virtue of dream and sweet words. sometimes we can see that due to the commission of evil deeds, the mind gets corrupted and the corrupt and impure mind is the cause of sadness.

Discipline is essential in our life, from an early age, teachers and parents advised us disciplined life. Lord Buddha cited speak not harsh word to anybody. The victim may retort, painful are indeed, revengeful words. The exchange of blows may affect.

The three-main obstacles in to finding happiness and pleasure in our life are greed, hatred delusion. Because of intentions, thought and action guide us to influence our life profound ways.

We should maintain the ethics of **Engagement:**

Engagement means relationships building. The best metaphor for developing friendship and mind its engagement is not a charity work, it's needs to serve mutual interest. In Dhammapada verse-61 clearly cited that if a man does not find the best or equal companion, he/she should go alone and do his duties in honest way. If a person contacts with fool, he will suffer misery and grief in his life.

In our daily life we should maintain some valuable relationship. Friendship is one of them. He who maintains genuine friendship and is not treacherous, being a giver, in turn, receives gifts himself. 'Eye for eye' or „tit for tat" is not noble principle.

**Na hi verena verani sammantidha kudacanam**

**Averena ca sammanti esa dhammo sanantano.**

Dhammapada verse-5

In case of other relationship Buddha clearly cited that, any type of ties and engagement are cause of sadness in human life. Wise desires neither sons nor wealth

nor kingdom for the sake of self or sake of others, not to speak of prosperity by unjust means.

We should always respect to our superiors. By respecting, the elder‟s purity comes in our mind.

Similarly, Ethics of **Altruism** is also very important factor in our life, Altruism figures prominently in Buddhism. Love and compassion are components of all forms of Buddhism. Many diseases can be cured by the one medicine of love and compassion. Buddha‟s advised through the verse that the world to stay away from all kind of violence. The sagas who are non- violent and ever endowed with self- control, attain the state of deathlessness beyond all grief.

"Ahi*ṃ*sakā ye munayo nicca*ṃ* kāyena sa*ṃ*vutā

Te yanti accuta*ṃ ṭ*hanam yattha gantvā na socare."

Dhammapada 225

The vast majority of people in whole world cannot turn monk or retire into caves or forests. However, if we follow the doctrines of lord Buddha our ethical values will be flourished as demanded in a healthy society.

We see that our present society is marching ahead but our ethical values of people behind. We find firing, explosion, torture on women, rape, corruption in education, political conflict etc are prevailed in our society. In such situation, the path and doctrines of Lord Buddha can show us the right and bright path in our lives.

Through the advices of Buddha's, we could have found that we should be free from any kind of desire. About delusion and ignorance (moha) buddhism cited that - "Those who have destroyed delusion

And broken through the dense darkness

Will wander no more (in samsāra)

Sutta Nipata

Through any kind of worldly things, we cannot reach the supreme goal of life. The external objects can only give us momentary pleasure or temporary happiness. Everyone in our society wants to be happy with money and property. Our personal and social life is a balance between giving and receiving. In Accordance with Buddha, we should serve others in need, and this is the only way to boast our happiness and confidence. It is not possible to change all the people in our society together so we have to change our self-first. His teaching has the power to awaken people to reality and introspect themselves. A peaceful harmonious society can be maintained by right speech, and action and right livelihood.

According to the Lord Buddha there are three type of actions – 1) Law of action 2) wholesome action and 3) unwholesome action. Like Hinduism, Buddhism also believes in rebirth or reincarnation according our deed or Karma.

"Austerity of life to achieve goal, every soul is capable of attending perfection. Souls are living being and still subject to the cycle of birth and death."

Through observation of ethical way of life such as through honesty, compassion, courage, modesty, and forgiveness, we can improve our community as well as our quality of life.

Ācinoti ca śāstrārtham ācāre sthāpayatyapi /

Svayamācarate yasmāt ācāryastena cocyate //

-Bhartrihari

